This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collec

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र M2045 विषय देवीस्तुति

नाव. सप्तशती (मुद्रित)

लेखक/लिपीकार —

पृष्ठ 63 काळ १/के १८०३ पूर्ण/अपूर्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशायनमः॥ श्रीमहाकाल्यैनमः श्रीमहालक्ष्म्यैनमः श्रीमहासरस्वत्यैनमः मार्कंडेयेनक्रोष्टुंकिंभागुरिंप्रतिउक्तंस्तोत्रंज
प्रतिपक्षरूपैमुनिपुत्रैरुक्तंमार्कंडेयपुराणेतद्यथामतिव्याचक्ष्महे तत्रादौव्याख्यास्यमानस्तोत्रेस्तूयमानदेवतास्वरूपंप्राधानिकरहस्याख्येग्रंथा
शेषउक्तंविविच्यदर्श्यते तत्रादौराज्ञःप्रश्नः भगवन्नवतारामेश्चंडिकायास्त्वयोदिताः एतेषांप्रकृतिंब्रह्मन्प्रधानेवक्तुमर्हसिति अत्रैतेषामितिनि
र्धारणेषष्ठी प्रकृतिंमूलकारणंतत्रोत्तरंतत्रलक्ष्यस्वरूपमाह मातुलिंगंगदांखेटंपानपात्रंचबिभ्रति नागंलिंगंचयोनिंचबिभ्रतीनृपमूर्धनि
तप्तकांचनवर्णाभातप्तकांचनभूषणाइति अलक्ष्यस्वरूपमाह शून्यंतदखिलंस्वेनपूरयामासतेजसेति लिंगंयोनिंचबिभ्रतीत्येनेनास्य
पुंरूपत्वंस्त्रीरूपत्वंचध्वनितम् एतदेवरूपंशैवाःसदाशिवइत्याहुः वैष्णवाःवासुदेवइति शाक्ताःमहालक्ष्मीरिति इयंमहालक्ष्मीः कू
स्थाप्रथममध्यमोत्तरचरित्रत्रयदेवतासमष्टिरूपासकलदेवीमाहात्म्येदेवतेतिबोध्यम् एषाशैवावैष्णवीच सदाशिवांकमारूढाशक्तिरि
च्छाह्वयाशिवा महालक्ष्मीरितिख्यातादेवीसर्वगुणान्वितेतिशिवपुराणात् लक्ष्मीतंत्रेविष्णुशक्तिरूपयालक्ष्म्याशक्रंप्रतिकाल्यादीनां
स्वावतारभेदत्वोक्तेश्च एतच्चसर्वात्म्येपर्यवस्यति मायाविशिष्टंशुद्धंब्रह्मेदंप्रधानतत्वस्थम् ततोगुणत्रयविभागेनाह शून्यंतदखिलंले
कंविलोक्यपरमेश्वरी बभाररूपमपरंतमसाकेवलेनही अत्रतमसः प्राधान्यमाश्रित्यकेवलानेत्युक्तिःस्तद्रूपमाह साभिन्नांजनसंकाशा
ष्ट्रांकितवरानना विशाललोचनानारीबभूवतनुमध्यमा खड्गपात्रशिरःखेटैरलंकृतचतुर्भुजा कबंधहारमुरसाबिभ्राणाहिशिरःस्रजम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अस्याः रूपेणतामसत्वमुत्कातदेवमोहजनकत्वोपपत्तयेज्ञानकल्यात्वप्रदर्शनेनैवहदयति सापोवाचमहालक्ष्मींनामसींप्रमदोत्तमा ना
कर्मचमेमानर्देहिनुष्यंनमोनमइति अतएवमहालक्ष्मीरपररूपंबभारेत्यनेनाविरोधः अनेनाहिमूलशक्तेरस्याश्चभेदोध्यन्यते ततोमहाल
क्ष्मीराह महामायामहाकालीमहामारीक्षुधातृषा निद्रातृष्णाचैकवीराकालरात्रिर्दुरत्यया इमांनिस्तवनामानिप्रतिपाद्यानिकर्मभिरिति
इमारुद्रेत्यन्येव्यवहरंति ततः तामित्युक्त्वा महालक्ष्मीस्वरूपमपरंनृप सत्वाख्येनातिशुद्धेनगुणेनेंदुप्रभंदधौ अक्षमालांकुशधरावीणा
रुकधारिणी साबभूववरानारीनामान्यस्यैचसाददौ अस्याःसत्वप्रधानत्वंदर्शयितुंज्ञानकलांतिरोभावाभावोनामादिप्रश्नाभावेनदर्शित
महामायामहावाणीभारतीवाक्सरस्वती आर्याब्राह्मीकामधेनुर्वेदगर्भाचधीश्वरीति इमांविष्णुरित्यन्ये श्वेतरूपधरत्वेनापिविष्णोः स्मरण
न् अत्रतमःसत्वयोः प्रविभागात्त्यामहालक्ष्मीरेव स्वयंरजःप्राधान्येनस्थितेत्युक्तमुभवति इमांब्रह्मेत्यन्येअलक्ष्यरूपंच सर्वमूलंचतु
वेदितव्यम् आसांचमूलशक्त्याअभेदउक्तएवं परस्परमपितदभिन्नाभिन्नस्यतदभिन्नत्वंमिनिन्यायेनबोध्यम् स्वस्वरूपांशेनावृतज्ञानत्व
दासांतदभेदज्ञानमपि एतास्तिस्त्रोपिकन्याएव तत्समानकक्षपुरुषांतरानुक्तेः सर्वासांपुंस्त्रीउभयरूपताच अथोवाचमहालक्ष्मींमहाकाळी
सरस्वतीम् युवांजनयतांदेव्यौमिथुनेस्वानुरूपतः इदमाज्ञादानंसंमतिरूपंबोध्यव्यम् इत्युक्तातेमहालक्ष्मीः ससर्जमिथुनंस्वयम् हि
ण्यगर्भौरुचिरौस्त्रीपुंसौकमलासनौ ब्रह्मन्विधेविरिंचेतिधातरित्याहतंनरम् श्रीःपद्मेकमलेलक्ष्मीत्याहमानाचतांस्त्रियम् अत्रमान

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University,Ramtek Collection

प्रादुर्भावमात्रेण महाकालीभारतीचमिथुनेसृजतःसह नीलकंठंरक्तबाहुंश्वेतांगंचद्वंशेखरम् जनयामासनामानितयारपिवदामिने
विष्णुःकृष्णोत्हृषीकेशोवासुदेवोजनार्दनः उमागौरीसतीचंडीसुंदरीशुभगाशुभा एवंयुवतयःसद्यःपुरुषत्वमपेदिरे पुरुषत्वमपीत्यर्थः
एतान्श्रुतसर्ववेदाःतत्कीर्याचमसर्ववेद्येत्याह चक्षुष्मंतोनपश्यंतिपश्यंतिज्ञानचक्षुषइति तत्र ब्रह्मणेप्रददौपत्नींमहालक्ष्मीनृपत्रयीं रुद्रायगौरीं
वरदांवासुदेवायचश्रियम् तत्रस्वस्वपत्न्यासहितास्तेक्रमेणब्रह्मास्रष्ट्यधिकारंविष्णुः पालनाधिकारंरुद्रः संहारादिकारंकृतवानित्यर्थेऽक्रम् इय
त्रयीमहाकालीजन्यत्वात् कर्मतःस्तमोमयीसितांस्त्रियमित्युक्तेरूपतःसत्वमयी एवंचतमः सत्वयोस्तस्यांसाम्यं ब्रह्माचमहालक्ष्मीजन्यत्वात्
हिरण्यगर्भावित्युक्तेः स्वरूपतःकर्मतश्चरजोमयइति तत्रजोद्वैगुण्यंविष्णुःसरस्वतीजन्यत्वात् सात्विकःकर्मतः कृष्णंचपुरुषमित्युक्तेः रूप-
तःतमोमयइति तत्रसत्वतमसोःसमतालक्ष्मीस्तुब्रह्मवत्द्विगुणरजोगुणा रुद्रोमहाकालीजन्यत्वात् कर्मतस्तमोमयःश्वेतांगमित्युक्तंरूप
तःसत्वमयइति तत्रसत्वतमसोःसाम्यंगौरीतुसरस्वतीजन्यत्वात् गौरीमित्युक्तेश्चकर्मतोरूपतश्चसत्वमयीतिसत्वद्वैगुण्यं अतएवतत्तद्गुणा
नुरूपसृष्ट्यादिकर्मतेषां एवंचब्रह्मविष्णोःस्त्रीपुंमिथुनंमिलितागुणत्रयमपि शिवमिथुनेतुसत्वंत्रिगुणं एकगुणंतमः रजसः सर्वथाभावइति
तत्वम् एतेप्रथमाब्रह्मादयः तदग्रेएवब्रह्मणोविष्णुरितिधारा रुद्राद्रुद्रस्तस्मात्पुनःरुद्रइतिरुद्रधारा कल्याः सरस्वतीसरस्वत्याश्चकाली
लीतिकालीधारा सरस्वत्याः कालीकालीतः सरस्वतीतिसरस्वतीधारालक्ष्म्याः लक्ष्मीःततोलक्ष्मीरितिलक्ष्मीधारा सर्वत्रापिगौरीकेशवौल

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्ष्मीब्रह्माणो सरस्वतीशंकरौचेतिसहजो सर्वत्रब्रह्मणः सरस्वतीविष्णोर्लक्ष्मीः शिवस्यगौरीपत्नीत्योत्सर्गकीरीतिः सर्वेषांरूपकमणिमूलवदेव
कदाचित्कल्पभेदेनस्थानभेदेन वालक्ष्मीतः कालीसरस्वत्योसरस्वत्याः सकाशादितरे काल्याः सकाशादितरे विष्णोब्रह्मरुद्रौब्रह्मणोरुद्रविष्णू रु
द्रान् ब्रह्मविष्णुइत्यपिस्वेच्छादिवशात् इतिनानाप्रकारपुराणादिस्थसृष्टिक्रमेकश्चिन्नविरोधइति एतेसर्वेपिसर्वज्ञत्वादिसकलशक्तिमंतः त
त्तदधिकारनैयत्यात्तुकिंचिज्ज्ञात्वादिव्यवहारोपिस्वस्वार्धे ब्रह्मादिनियमताच्च एवंयेजीवाः उपासनादिकर्मणातत्तल्लोकेसारूप्यंप्राप्तास्ते तत्त
ल्लोकीयब्रह्मवासुदेवादिभिःसमानाकारत्वात् ब्रह्मादिसंज्ञाभाजोजीवाएव एषामपिकर्मानुरूपंतत्तदधिकारप्राकट्यं एषांसर्वेषांमूला
भेदेनतदभेदस्यसत्वेस्वात्माशे आवरणहीनतयानेज्ञानभूनचसार्वात्म्येनस्तुतिर्नेविरुद्धा एवंवाअंडादिकादिब्रह्मादीनास्वप्रादुर्भूतब्रह्मा
भेदज्ञापनायैवप्राधानिकरहस्येमुख्यलक्ष्म्यादिजन्यब्रह्मादीनामेव अंडसृष्टित्वतद्भेदकत्वतत्पालकत्वतत्संहारकत्वादीनि अग्रेउक्तानीतिबोध्य
म् स्वरयासहसंभूयविरिंचोडमजीजनत् बीभेदभगवान्रुद्रस्तद्वीर्यासह्वीर्यवानित्यादिना एवंचपृथिवीतत्याधिष्ठातृभूतहरेर्योगनिद्रासंपा-
दिकायास्तादृश्या अपिकाल्यामूलशक्त्यभेदादेव तयाविसृज्यतेसर्वंसाविद्यापरमामुक्तेरित्यादिनाक्रियमाणासार्वात्म्येनस्तुतिर्नेविरुद्धा एवं-
जडात्मिकायाः प्रकृतेश्चेतनरूपाथाश्चिच्छक्तेश्चाधिष्ठात्र्यधिष्ठेययोरभेदंमत्वा योगनिद्राजगत्पतेः सैषाप्रसन्नावरदाइत्यादिना तत्रजडचेतनयोः
सामानाधिकरण्यं अत्रमूलभूतजडशक्तेर्महामायाकुंडलिनीत्यादिशब्दैर्व्यवह्रियमाणायाआधिष्ठात्रीचिच्छक्तिरपितदभेदात् महामायादिसंज्ञा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भाक् एवंतमोमयीकालीसंज्ञाशक्तिरपिनिद्रामोहादिभिः पुरुषत्वानावरकत्वान्महामायाइत्युच्यते मूलशक्त्यभेदाच्चसाचेयंशक्तिः मनोधिष्ठि
नाएवउपास्यानत्रशक्तस्यशक्तिप्रत्याश्रयत्वपिकार्योत्पत्तौशक्तेरेवप्राधान्यमतः शक्तेरेवप्राधान्यमतः शक्तिरूपास्येतिव्यवहारस्यनानुपपत्तिः एवमुक्ति
दातृत्वसर्वाश्रयत्वादिव्यवहारोपिसमंजसः उपास्यत्वंचमहाकाल्यादिद्वारामूलशक्तेरेवेतिसर्वंसमंजसम् अन्यच्चतत्रतत्रवक्ष्यामः अस्याः शा
पोद्धारोत्कीलनेकात्यायनीतंत्रोक्तेत्रयोदशाध्यायंपठित्वाप्रथमंपठेत् ततोद्वादशद्वितीयोनतएकादशंतृतीयाविधिक्रमेणपठेत् सप्तमंद्विरितिशा
पोद्धारः प्रथममध्यमचरित्रंपठित्वा ततःप्रथमंतृतीयंपठेदित्युत्कीलनंइतिकेरलाः अथप्रसंगात्स्तोत्रविधिः तत्रवाराहीतंत्रे आधारंस्थाप
यित्वातुपुस्तकंवाचयेत्ततः हस्तसंस्थापनाद्देवीभवेदर्थफलंवतः यावन्नपूर्यतेध्यायस्तावन्नविरमेत्पठेत् यदिप्रमादाद्ध्यायेविरामोभवति
प्रिये पुनरध्यायमारभ्यपठेत्सर्वंमुहुर्मुहुः अनुक्रमात्पठेद्देवीशिरःकंपादिकंत्यजेत् तथान्यत्र प्रणवंपूर्वमुच्चार्यस्तोत्रंवासंहितांपठेत्
अंत्येचप्रणवंदद्यादित्युवाचादिपूरुषः नमोंतंचपठेत्स्तोत्रंवाचकंतुप्रशस्यते यत्तुकीलके शनैस्तुजाप्यमानेस्मिन्स्तोत्रेसंपत्तिरुच्चकैरितिन
दत्युच्चैः पाठनिषेधकत्वानिषेधकंच पुस्तकेवाचनंशक्तंसहस्रादधिकंयदि ततोन्यूनस्यतुभवेद्वाचनंपुस्तकंविनाविनापीत्यर्थः
ऋषिच्छंदोगविन्यस्यपठेत्स्तोत्रंसमाहितः स्तोत्रेनदृश्यतेयत्रप्रणवन्यासमाचरेत् भीष्मपर्वणियागीतासाप्रशस्ताकलौयुगे विष्णोःस
हस्रनामारब्धस्तोत्रंपापप्रणाशनम् गजेंद्रमोक्षणंचैवतथाकारुण्यकस्तवः नारसिंहंस्तथास्तोत्रंस्तोत्रंश्रीरामसंज्ञकम् देव्याःसप्तशती

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स॰ स॰
३

स्तोत्रंतथानामसहस्रकम् श्लोकाष्टकंनैलकंठशैवंनामसहस्रकम् त्रिपुरायाःप्रसादाख्यंसूर्यस्यस्तवराजकम् पैत्रोरुचिस्तवोयश्चइंद्रा
क्षीस्तोत्रमेवच वैष्णवंचमहालक्ष्म्याःस्तोत्रमिंद्रेणभाषितम् भार्गवाख्येनरामेणशत्पान्यन्यानिकारणात् शुद्धेनाचलचित्तेनपठितव्यंप्रय
त्नतः नस्वयंलिखितंस्तोत्रंनाब्राह्मणलिपिंपठेत् नचस्वयंकृतंस्तोत्रंतथान्येनचयत्कृतम् यतःकलौप्रशंसंतिऋषिभिर्भाषितंतुयत् क्वचि
त्तु अष्टम्यांवाचतुर्दश्यांकृष्णायांतुसमाहितः ददातिप्रतिगृण्हातिनान्यथैषाप्रसीदती इतिकीलकग्रंथे सप्तशतीग्रंथेशिवशापतदुद्धारावुक्तौ तथावै
कृतिकरहस्ये ततःकृतांजलिर्भूत्वास्तुवीतचरितैरिमैः एकेनवामध्यमेननैकेनेतरयोरिह चरितार्धंतुनजपेज्जपन्छिद्रमवाप्नुयादिति अर्गलांकीलकं
चादाजपित्वाकवचंपठेत् जपेत्सप्तशतींपश्चात्क्रमएषरिचोदितः इतिकेरलसंप्रदायः इतिस्तोत्रपठनविधिः ॐनमःश्चंडिकायैनमः मार्कंडेय
उवाच सावर्णिरिति सवर्णायाश्छायायाअपत्यंसावर्णिः बाह्वादित्वादिञ् विस्तराद्गदतोममेति अपादानशेषत्वविवक्षायांषष्ठी निशाम
यजानीहि चुरोदेरूपं तस्यनान्येमितोहेतापितिमित्वानिषेधः सूर्यस्यतनयइति दक्षसावर्ण्यादिनिरासार्थः यद्वायःयकारादष्टमोमनुर्हकार
स्तस्यविशेषणंसूर्यतनयइति सचाग्निस्तेजस्वित्वेनतत्रिदिष्टत्वोत्तेनतद्बीजंरेफोलभ्यते तद्रत्वंचहकारलक्षणयोच्यते तस्यैवविशेषणांतरं
सावर्णिरिति सवर्णालोहितशुक्लकृष्णवर्णसहिताप्रकृतिः तस्याअपत्यवत्संबंधीतद्वाचकईकारः तद्वत्वंलक्षणयोअंति मोंबिंदुस्तुश्लो
केस्वरूपतएवनिवेशितइति ह्रींइतिबीजम् लब्धंतदुत्पत्तिंतन्मंत्रंप्रतिपाद्यदेवतायाउत्पत्तिंनिशामयेतिसंबंधः यद्यपिएतदुपक्रमेप्रश्ने

अ॰
३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अस्मिन्कल्पेसप्तयेन्येभविष्यंतिमहामुने मनवस्तान्समाचक्ष्वतेषुदेवादयश्चयेइत्येतदुक्तं तथापिसावर्णिकारव्यानकथनोत्तरंमार्कंडेयपुरा
णेसावर्णिकमिदंसम्यक्प्रोक्तंमन्वंतरंतव तस्यैवदेवीमाहात्म्यंपृष्टमेतत्तवोदितमित्युपसंहारेणतद्विषयकोष्टुंकिंप्रश्नस्याप्यपनयनानुपक्रमप्रा
प्तानिबंधस्तूपलक्षणमितिबोध्यम् १ महामायेति विसदृशप्रतीतिसाधनंमायातस्यामहत्तंचसर्वविषयत्वमिति महामायाईश्वरशक्तिः तस्या-
अनुभावः इदमस्यभवतीतिच्छामन्वंतरंकिंचिदधिकैकसप्ततियुगात्मककालः यथेत्यनेनतथातंप्रकारंनिशामयेत्यनुषंगोदर्शितः भागंभगसमू

मार्कंडेयउवाच सावर्णिःसूर्यतनयोयोमनुःकथ्यतेऽष्टमः निशामयतदुत्पत्तिंविस्तराद्गदतोमम १ महामायानुभावेनय
थामन्वंतराधिपः सबभूवमहाभागःसावर्णिःस्तनयोरवेः २ स्वारोचिषेतरेपूर्वेचैत्रवंशसमुद्भवः सुरथोनामराजाभूत्समस्तेक्षितिं
मंडले ३ तस्यपालयतःसम्यक्प्रजाःपुत्रानिवौरसान् बभूवुःशत्रवोभूपाःकोलाविध्वंसिनस्तथा ४ हः ऐश्वर्यस्यसमग्रस्यधर्मस्य
यशसःश्रियः ज्ञानवैराग्ययोश्चैवषण्णांभगइतीरणेतिविष्णुपुराणात् बभूवेति भाविनिभूतवदुपचारः तद्भवनस्यावश्यकत्वद्योतनाय सावर्णि
स्तनयोरवेरितिसंभ्रमेपुनरुक्तिः २ स्वारोचिषेइति स्वारोचिषाधिकारोपलक्षितेद्वितीयमन्वंतरेपूर्वमिति कथाकालापेक्षयाचैत्रस्तस्यैवमनोःसुतः
नामेतिप्रसिद्धौ ३ तस्येति सम्यक्नीतिशास्त्रानुसारेणकोलासूकरथस्यैवराजधान्यंतरम् तथाअतिशयेनकोलाविध्वंसिनइत्यर्थः ४ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्यतैरिति अतिप्रबलदंडकर्तुः छांदसत्वात्कर्मधारयादिनिः इदंपराजयनिमित्तंन्यूनैरत्यसाधनैः ५ ततइति ततः संगानंतरंनैः प्रबलैः अरिभिः शत्रुभिराक्रांतोआक्रमितः महाभागः स्वपुरंआयातः निजदेशाधिपएवाभवत् नसार्वभौमइत्यर्थः भाव्येतज्जन्मभवज्जन्मातरीणमहाराज्यमितिबुद्धौस्वीकृत्यमहाभागइत्युक्तं ६ आमात्यैरिति ततःतस्यसार्वविभक्तिकस्तासिः तत्रस्वपुरेपिकोशोऽर्थसंचयः बलंसैन्यंचापहृतंआत्मसात्कृतदुष्टत्वंराजविषयद्वेषवत्वंदुरात्मत्वंराज्यलोभाक्रांतत्वंदुर्बलत्वंक्षीणबलवत्मूरिपुकृताभिभवात् ७ ततइति हृतस्वाम्यःहृताधिपत्यः

तस्यतैरभवद्युद्धमतिप्रबलदंडिनः न्यूनैरपिसतैर्युद्धेकोलाविध्वंसिभिर्जितः ५ ततःस्वपुरमायातोनिजदेशाधिपोभवत् आक्रांतः समहाभागस्तैस्तदाप्रबलारिभिः ६ आमात्यैर्बलिभिर्दुष्टैर्दुर्बलस्यदुरात्मभिः कोशोबलंचापहृतंतत्रापिस्वपुरेततः ७ ततोमृगयाव्याजेनहृतस्वाम्यःसंभूपतिः एकाकीहयमारुह्यजगामगहनंवनम् ८ सतत्राश्रममद्राक्षीद्विजवर्यस्यमेधसः प्रशांतस्वापदाकीर्णमुनिशिष्योपशोभितम् ९ एकाकीअसहायः ८ सतत्रेति मेधाइतिऋषिनाम वस्तुतोवसिष्ठस्यनामांतरमिदम् अमुष्याःसावनारायणमहालक्ष्म्याअमानुषजन्मानिचरितैःसार्द्धैःस्तोत्रैर्वावेदवादिनाकथितानिपुराशक्रवसिष्ठेनमहात्मनास्मारोचिषेंतरेराज्ञेसुरथायमहात्मनेसमाधयेचवैश्यायप्रणतायचसीदतइतिलक्ष्मीतंत्रोक्तेः श्रीशस्तुरूपमास्थायपुराविप्रस्यमेधसः स्वमायांज्ञापयामाससुरथायसमाधयेइत्यन्यत्रप्रशांतत्वपराहिंसाविरतत्वमुनिभिस्ताच्छिष्येश्चशोभितमित्यर्थः ९ ६

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्थाविति कंचित्कालमितिकालाध्वनोरितिद्वितीयाइतश्चेतः अनियतदिग्देशंमुनिवरेति भागुरिसंबोधनं आश्रमविशेषणंवा १० सोचिंतयदितिममेतिष-
ष्ठ्यंतप्रतिरूपकामव्ययं तस्यभावोममत्वंममेदमित्यभिमानः तेनाकृष्टानिवृत्तमार्गादपकृष्टाचेतनाबुद्धिर्यस्यसः मत्पूर्वैः पूर्वजैरित्यर्थः हिः पादपूरणेउत्तरश्लोके-
नान्वयः मानसइतिपाठेपि आकृष्टंमानसंयस्य ११ मद्भृत्यैरिति तथापालनेहेतुरसद्वृत्तैरितिप्रधानैर्माहामात्रैः सहितःसप्रधानः शूरहस्तीतिकर्मधारयः किम

तस्थौकंचित्सकालंचमुनिनातेनसत्कृतः इतश्चेतश्चविचरंतस्मिन्मुनिवराश्रमे १० सोचिंतयत्तदातत्रममत्वाकृष्टचेतनः मत्पूर्वैःपालितं
पूर्वंमयाहीनंपुरंहितत् ११ मद्भृत्यैस्तैरसद्वृत्तैर्धर्मतःपाल्यतेनवा नजानेसप्रधानोमेशूरहस्तीसदामदः १२ ममवैरिवशंयातःकान्
भोगानुपलप्स्यते येममानुगतानित्यंप्रसादधनभोजनैः १३ अनुवृत्तिंध्रुवंतेद्यकुर्वंत्यन्यमहीभृताम् असम्यग्व्ययशीलैस्तैःकुर्व
द्भिःसततंव्ययम् १४ संचिंतःसोतिदुःखेनक्षयंकोशोगमिष्यति एतच्चान्यच्चसततंचिंतयामासपार्थिवः १५ ६ ६

वस्थइतिनजानेइत्यन्वयः १२ ममेतिवशंपारतंत्र्यम् कान्कियतः कीदृशान्वानजानेइत्यस्यानुषंगः अनुगताः स्तेवकाः सेवकत्वेहेतुः प्रसादेत्यादिप्रसा
दस्तुष्टिदानं धनंमासिकादिवेतनं भोजनंप्रतिदिनंदीयमानंतैः १३ अनुवृत्तावपिएतेएवहेतवः ध्रुवमितिवितर्केहामांधिगित्याध्याहारः असम्यगिति आ
यतुरीयांशाधिकोव्ययोसम्यग्व्ययः सततमितिसमस्तं १४ दुःखेनेति निर्विसर्गंपठंति विसर्गलोष आर्षः कोशोमूलधनं अन्यदनुक्तमपि १५ ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नद्येनि विप्रेतिभागुरिसंबोधनं मेधार्थकतयाऽश्रमाविशेषणंवाअभ्याशेनिकटेसवैश्यः भो इत्यामंत्रणेअत्रआश्रमे १६ सशोकइनिइष्टवियोगानुचिंतनंशोकः दुःखनिबंधनचिंतावसादोदुर्मनादौर्मनस्यसशोकइवउपलक्षनशरीरत्वात् दुर्मनाइवक्रियास्वस्थैर्यात् इत्याकर्ण्यैतिश्लोकः स्पष्टार्थः प्रणयोविश्रंभः १७ प्रश्रयो विनयः मार्कंडेयेनस्वरथंप्रतिऋष्युक्तावनुहितायांभागुरेः किंवैश्यउवाचेतिजिज्ञासामालक्ष्यमार्कंडेयआहः वैश्यउवाच समाधिरिति १८ असाधुभिः पुत्र

तत्रविप्राश्रमाभ्याशेवैश्यमेकंददर्शसः सुपृष्टस्त्वेनकस्त्वंभोहेतुश्चागमनेत्रकः १६ सशोकइवकस्मात्त्वंदुर्मनाइवलक्ष्यसे इत्याकर्ण्यवचस्तस्यभूपतेः प्रणयोदितम् १७ प्रत्युवाचसतंवैश्यः प्रश्रयावनतोनृपः वैश्यउवाच समाधिर्नामवैश्योहमुत्पन्नोधनिनांकुले १८ पुत्रदारैर्निरस्तश्च धनलोभादसाधुभिः विहीनःस्वजनैर्दारैःपुत्रैरादायमेधनम् १९ वनमभ्यागतोदुःखीनिरस्तश्चाप्तबंधुभिः सोऽहंनवेद्मिपुत्राणांकुशलं कुशलात्मिकाम् २० प्रत्यनिस्वजनानांचदाराणांचात्रसंस्थितः किंनुतेषांगृहेक्षेममक्षेमंकिंनुसांप्रतम् २१ दारैर्धनलोभाभिरस्तः अधिक्षिप्तोभर्त्सितइतियावत्चादन्यैरपीत्यर्थः विहीनश्चेनिदारैः पुत्रैर्मेधनमादायगृहीत्वा धनैर्विहीनश्च अंशस्याप्यदानात्तद्गृहितः कृतोहं १९ धनहीनत्वादेवाप्तैः सुहृद्भिः बंधुभिश्चनिरस्तस्त्यक्तोहंवनमभिआगत इत्यन्वयः सोहमिति २० प्रत्यनिंवार्तांतमेवविवृणोति किंन्विति इत्यविकल्पेनेषां पुत्रदारस्वजनानांगृहेदारापत्यादीकथंतेकिंविधास्तेवर्त्तन्तेव्यवहारः सुखाइत्युपलक्षणम् २१ ५ ५ ५ ५

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजोवाच यैरिति धनैरितिभर्त्सनरूपेनिरासे हेतुः किमितिप्रश्ने २२ वैश्यउवाच एवमिति अस्मद्गतमस्मदीयविषयकम् २३ यैरिति यैः पुत्रदारस्वजनैः पतिहार्दंस्वजनहार्दंच हार्दंस्नेहः तेष्वपितथाविधेष्वपिमेमनः हार्द्येवेत्यन्वयः २४ किमेतदिति तेषांदोषंजानन्नपियत् विगुणेष्वपिबंधुषु प्रेमप्रवणं चित्तंकरोमि तत्किमिति तस्माद्धेतोरेतन्नजानामीत्यन्वयः २५ तेषामिति तन्निमित्तं यन्मेनिश्वासादिकंजायते अप्रीतिषुप्रीतिरहितेषु अपितेषुयन्मे-

कथंतेकिन्नुसद्वृत्तादुर्वृत्ताः किन्नुमेसुताः राजोवाच यैर्निरस्तोभवाँल्लुब्धैः पुत्रदारादिभिर्धनैः तेषुकिंभवतः स्नेहमनुबध्नातिमानसम् २२ वैश्यउवाच एवमेतद्यथाप्राहभवानस्मद्गतंवचः किंकरोमिनबध्नातिममनिष्ठुरतांमनः २३ यैः संत्यज्यपितृस्नेहंधनलुब्धैर्निराकृतः पतिस्वजनहार्दंचहार्दितेष्वेवमेमनः २४ किमेतन्नाभिजानामिजानन्नपिमहामते यत्प्रेमप्रवणंचित्तंविगुणेष्वपिबंधुषु २५ तेषांकृतेमेनिश्वासोदौर्मनस्यंचजायते करोमिकिंयन्नमनस्तेष्वप्रीतिषुनिष्ठुरम् २६ मार्कंडेयउवाच ततस्तौसहितौविप्रतंमुनिंसमुपस्थितौ समाधिर्नामवैश्योसौसचपार्थिवसत्तमः २७ कृत्वातुतौयथान्यायंयथार्हंतेनसंविदम् उपविष्टौकथाःकाश्चिच्चक्रतुर्वैश्यपार्थिवौ २८

मनोनिष्ठुरंनतत्किंकरोमीत्यन्वयः २६ मार्कंडेयउवाच ततइति सहितौमित्रत्वेनसंगतौसमुपस्थितौसमुपसन्नौ २७ कृत्वेति यथान्यायंयथाशास्त्रंयथार्हंयथायोग्यंसंविदंसंभाषांउपविष्टौ अंतर्भावितण्यर्थत्वेनोपवेशितावित्यर्थः तेनेतिकर्तरितृतीयाकाश्चित्स्वपरविषयाः

२८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजोवाच भगवन्निति वदसेतियत्तार्थेआत्मनेपदम् यत्तंनवदेत्यर्थः एकंरहस्यंवदस्व नदाहमेमनसः संकल्पात्मकस्यांतः करणस्यस्वचित्तेनिश्चयात्मकस्व स्वरूपेआयत्ततांविरोधंविनादुःखायदित्यन्वयः संकल्पविकल्पात्मकमेवमंतः करणंननिश्चयात्मकमतोनमेतन्निर्णयेधिकारइतिभावः २९ दुःखहेतुत्व माह ममत्वमिति राजस्येतिसप्तम्यर्थस्यशेषत्वविवक्षायांषष्ठीराज्येइत्यर्थः तेष्वमदीयतंजाननोपिममयथा अन्यस्यअन्यस्येवराज्यादिषुममत्वम् एतत्किंकि निबंधनमित्यर्थः स्राम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानिच राज्यागानिप्रकृतयः पौराणांश्रेणयोपिच एषुस्राम्यंप्रधानम् ३० नाहमेवतथाऽयमपित्या

राजोवाच भगवंस्त्वामहंप्रष्टुमिच्छाम्येकंवदस्ततत् दुःखायन्मेमनसः स्वचित्तायत्तांविना २९ ममत्वंगतराज्यस्यराज्यांगेष्वपिवलेष्वपि जानतोपियथान्यस्यकिमेतन्मुनिसत्तम ३० अयंचनिकृतः पुत्रैर्दारैर्भृत्यैस्तथाज्झितः स्वजनेनचसंत्यक्तस्तेषुहार्दीतथाप्यति ३१ एवमेषस्तथाहृच्चहावप्यत्यंतदुःखितो दृष्टदोषेपिविषयेममत्वाकृष्टमानसो ३२ तत्कथमेतन्महाभागयन्मोहोज्ञानिनोरपि ममास्यचभवत्येषाविवेकांधस्यमूढता ३३ ह अयंचनिकृतइति निकृतःतिरस्कृतःउज्झितःत्यक्तःनीत्युपसर्गपूर्वात् कृञ्क्तः नथेतिसमुच्चये ३१ एवमितिविषयेराज्यपुत्रादौममत्वेनाकृष्टंविषयाधीनंकृतंमनसमंतः करणंयस्यसौ ३२ तत्कथमिति ज्ञानिनोर्विषयेदोषवत्यज्ञानवतोरपिममास्य चेतिपूर्वान्वयी उभयनिष्ठमोहस्यायुक्तत्वमाह यत्यतः एषाएतज्ज्ञानीयामूढता अविवेकांधस्य अविवेकवतः भवतुनतु दोषज्ञानरूपविवेकवतइति आ वयोः सायुक्तेतिभावः ३३ ५

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

अत्रोत्तरमाह ऋषिरुवाच ज्ञानमिति ननुज्ञानमात्रस्यमोहवैयर्थादिकरण्यंतवापिमतंज्ञानविषयेयस्यवानाद्यः सर्वस्यैवनिर्मोहत्वप्रसंगादित्याहज्ञा
नमिति ननुज्ञानमात्रस्यमोहवैयर्थादिकरण्यंतवापिमतज्ञानविषयेयस्यवानाद्यः सर्वस्यैवनिर्मोहत्वंप्रसंगादित्याह ज्ञानमिति अन्यस्तुनथापीत्यनेन
खंडयिष्यतेविषयिणोनिबध्नातीतिविषयोबंधकः तद्रूपेगोचरेविषयेज्ञानंसर्वस्यजंतोरस्ति नचमोहाभावइत्याह विषयश्चेति एवंवक्ष्यमाणप्रकारे
णपृथक्पृथक्भिन्नप्रकारेणज्ञानविषयत्वयातीत्यर्थः ३४ तदेवाह दिवांधाइति केषांचिदुलूकादीनांदिवाज्ञानाभावः केषांचित्काकादीनांरात्रौ

ऋषिरुवाच ज्ञानमस्तिसमस्तस्यजंतोर्विषयगोचरे विषयश्चमहाभागयातिचैवंपृथक्पृथक् ३४ दिवांधाः प्राणिनःकेचिद्रात्रा
वंधास्तथापरे केचिद्दिवातथारात्रौप्राणिनस्तुल्यदृष्टयः ३५ ज्ञानिनोमनुजाःसत्यंकिंतुतेनहिकेवलम् यतोहिज्ञानिनःसर्वे प-
शुपक्षिमृगादयः ३६ केषांचित्किंचुलुकादीनांसर्वदातथातथातुल्यदृष्टयः अंधाअनंधाइत्यर्थः एवंचज्ञानमात्रस्यमोहवैयर्थ्याधिकरणे दि-
नादौउलूकादीनांमोहोनस्यादितिभावः किंच राक्षसादीनांदिवारात्रौच विषयज्ञानवतांनकदाचिदपिमोहः स्यात् किंतुलुकादीनांसर्वदैवमोहप्रस
गइति तेषामपिकिंचिद्विषयेमोहदर्शनात् एवंचनज्ञानमात्रस्यमोहवैयर्थ्यादिकरण्य नापिज्ञानाभावस्यमोहसामानाधिकरण्यमित्युक्तं भवति अथतयेति
रात्रिसमुच्चये ३५ ननुमनुष्याएवममज्ञानित्वेनाभिमताइतिचेन्नत्राह ज्ञानिनइति मनुजाज्ञानिनइतितेमतंसत्यं पृच्छतितेनकेवलंज्ञानिनः ज्ञानि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नएवकिंनुस्वयमेवविनक्ष्योत्तरयति नहिकिंत्वज्ञानसंवलितज्ञानिनइत्यर्थः एवंज्ञानिनज्ञानित्वाभिमानस्त्वायुक्तः यतः सर्वेपश्वादयोपिएवंस-
तिज्ञानिनएवस्युःहिरेवार्थेभिन्नक्रमश्चपक्षत्वेनैवसिद्धमृगग्रहणंतद्विशेषप्रतिपत्त्यर्थमित्यर्थः ३६ तमेवार्थंमनुष्याणांपश्वादिभिस्तुल्यत्वप्रतिपा
दनेनद्रढयतिज्ञानंचेतियत् यादृशंतत्तादृशंमनुष्याणांचयत्तेषांमृगादीनामित्यर्थः अन्यदाहारभयमैथुननिद्यारूपमितिउभयोस्तुल्यंसाधारणमि
त्यर्थः ३७ अर्थक्रियासाम्यमपितयोरस्तीत्याहज्ञानेपीति तद्भोजनेननास्माकंतृप्तिरितिज्ञानेसत्यपिपतंगानितिनिरनुस्वारम् ३८ स्वशरीरापेक्ष

ज्ञानंचतन्मनुष्याणांयत्तेषांमृगपक्षिणाम् मनुष्याणांचयत्तेषांतुल्यमन्यत्तयोरुभयोः ३७ ज्ञानेपिसतिपश्यैतान्पतंगान्शाव
चंचुषु कणमोक्षादृतान्मोहात्सीड्यमानाननिक्षुधा ।३८ मानुषामनुजव्याघ्रसाभिलाषाःसुतान्प्रति लोभात्स्वत्युपकारा-
यनन्वेतान्किंनपश्यसि ३९ यावद्विरंगेष्वपि अतिप्रीतिरितितेषुमोहज्ञानयोः समानाधिकरण्यमुपपाद्यमनुष्येष्वप्याह मानुषा-
इतिव्याघ्रशब्दः श्रेष्ठवाचीमानुषाः लोभान्स्वत्युपकारलोभान् सुतान्प्रतिसाभिलाषाः एतेसुताश्चननुनिश्चयेनस्वत्युपकारायन-
नभवंति इदंकिंनपश्यसीत्यर्थः एवंपूर्वपूर्वव्यवहारंपश्यतोपि अग्रेअग्रेपुनः सुताभिलाषाइतिमोहज्ञानयोःसमानाधिकरण्यम्
तेष्वप्रीतिभावः ३९ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

नन्वेवंविधव्यवहारदर्शिनांसंसाराद्विरक्तिः कुतोनेत्यत आह तथापीति एवंविधलोकव्यवहारसाक्षात्कारोयद्यप्यास्तेतथापीत्यर्थः महामायाप्रभावेणकर्त्रभिमतामेदमिति बुद्धिरेवभ्रामकत्वादावर्तइवावर्तः संसारेपुनः पुनरावर्तकः यत्रतादृशोमोहगर्तेनिपातिताः मानुषाः संसारस्थितिमेवकुर्वंति ननुततोविरज्यंतइत्यर्थः आवर्तोभ्रमसाधनम् ४० ननुमायायाआश्चर्ययंशक्तिरत आह तदिति योगनिद्रातमः प्रधानाशक्तिः एतज्जगत्त्वयासमोत्यत इत्यन्वयः जगत्पतित्वेनतस्यमोत्वकोटिबहिर्भावः सूचितः ४१ भवादृशानांससारिणांकावार्ता अपक्वकषायाणांयोगिनामपिसामोहिकेत्याह ज्ञा

नथापिभमतावर्तेमोहगर्तेनिपातिताः महामायाप्रभावेनसंसारस्थितिकारिणः ४० तत्रात्रविस्मयः कार्योयोगनिद्राजगत्पतेः महामायाहरेश्चैतत्तयासंमोत्यतेजगत् ४१ ज्ञानिनामपिचेतांसिदेवीभगवतीहिसा बलादाकृष्यमोहायमहामाया प्रयच्छति ४२ तयाविसृज्यतेविश्वंजगदेतच्चराचरम् सैषाप्रसन्नावरदानृणांभवतिमुक्तये ४३

निनामपीति आकृष्येत्यस्यविवेकादित्यादिमोहायप्रयच्छति मोहयंति करोतीत्यर्थः तत्कृतइत्यत आह तयेति तयामूलप्रकृतिरूपयेत्यर्थः एवंच स्वकर्तव्यसृष्टिवृद्ध्ये एवंप्रभावासेत्यर्थः विश्वंसमस्तंननुएवं मुक्तिर्दुर्लभैवस्यादत आह सैषेति मोहकारणमपिसाउपासनादिभिः स्वार्पित नित्यकर्मादिभिश्चप्रसन्नामोक्षायवरदाभवंति ४२ ४३ ५ ५ ५ ५ ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्नेकस्यैववस्तुनः बंधमोक्षोभयहेतुतामुपपन्नेत्यत आह साविद्येति सर्वेश्वरस्येश्वरीईश्वरत्वसंपादिका अतोनकाचिदसंभावनानस्यामित्यर्थः किंचवि
द्याविद्योभयरूपत्वादिपिनैतदसंगतिरित्याह परमोत्तमपुरुषार्थसाधनीभूता विद्याब्रह्मज्ञानरूपासैवसनातनी अनादिरनंताचसंसारबंधहेतुरविद्याचसैवे
त्यर्थः एवंचविज्ञडप्रकृत्युभयात्मकत्वादुभयहेतुताउपपन्नेतिभावः ४४ विशेषजिज्ञासयापुनः पृच्छति राजोवाच भगवन्निति काकिंजातीयाकथंके
नप्रकारेण अस्याः कर्मचकिं ४५ यत्स्वभावेत्यादिनास्वभावस्वरूपोत्पत्तिकारणप्रश्नत्रये ब्रह्मविदांवर इत्यनेनऋषिप्रोक्तसर्वप्रकरणस्यश्रुतिशिरोनुजा

साविद्यापरमामुकेहेतुभूतासनातनी संसारबंधहेतुश्चसैवसर्वेश्वरेश्वरी ४४ राजोवाच भगवन्काहिसादेवीमहामायेतियांप्र
वान् ब्रवीतिकथमुत्पन्नासाकर्मास्याश्चकिंद्विज ४५ यत्स्वभावात्सादेवीयत्स्वरूपायदुद्भवा तत्सर्वंश्रोतुमिच्छामित्वत्तोब्रह्मविदांव
र ४६ ऋषिरुवाच नित्यैवसाजगन्मूर्तिस्तयासर्वमिदंततं तथापितत्समुत्पत्तिर्बहुधाश्रूयतांमम ४७ यित्संस्फुरितं ४६ उच्चारयति

ऋषिरुवाच नित्यैवेतिजगन्मूर्तिरित्यनेनजगत्तिरिक्तमुख्यशरीराभावोध्वनितः जगदाश्रयभूताशक्तिरित्यर्थः केनजातिप्रश्नोत्तरस्वरूपप्रश्नोत्तरंच
तयासर्वमिदंततमित्यनेनस्वभावोत्तरं सृष्टिस्वभावासेत्यर्थः ततंविस्तारितंव्याप्तमित्यर्थः व्याप्तमित्यर्थकत्वेचित्स्वभावाच्चेत्यर्थः सृष्टीत्युपलक्षणंनित्येत्यने
नमुख्योत्पत्तेरभावात्कारणस्यस्फुतरामभावेनगौण्योत्पत्तीतिदर्शितंतेनउत्पत्तितत्कारणप्रश्नोत्तरंतत्समुत्पत्तिः गौणीसा ममेत्यपादानस्यशेषत्वविवक्षा
यांषष्ठीमन्नइत्यर्थः ४७

CC-0. In Public Domain. Kavikatgunn Kalidas Sanskrit University Ramtek Collection

देवानांकार्यसिद्ध्यर्थमिति सर्वकर्मसमाप्तौ तं अनेनैव देवदेवप्रार्थनया आविर्भावस्य ध्वननात् कथमुत्पन्नेत्युत्तरमपि ४८ कथंदेवप्रार्थनयातत्कार्यसिद्ध्यर्थमवतारइति जिज्ञासानिवर्तयितुं मोहकारणस्यैवचराज्ञः पृष्टत्वेनादौमोहिकायास्तमोगुणप्रधानायाअवतारंवक्तुमितिहासमाह योगनिद्रामिति कृत्वातेब्रह्मनिद्रादिनांनेयोगनिद्रांनामशीशक्तिंभगवान् उत्पत्तिप्रलयंचैवभूतानामागतिंगतिम् वेत्तिविद्यामविद्यांच्चसर्वाच्चोभगवानितिउक्तलक्षणःनेनभूतानांप्रलयकालंज्ञात्वा सेयंपालनव्यवहारतिरोधानमंतरानतदसंभवमत्वा स्वपालनव्यवहारतिरोधायिकांतामसीशक्तिमभजन् पटेनेवतयात्मानमावृतवानि

देवानांकार्यसिद्ध्यर्थमाविर्भवतिसायदा उत्पन्नेतितदालोकेसानित्याभ्यभिधीयते ४८ योगनिद्रांयदाविष्णुर्जगत्येकार्णवीकृते आस्तीर्यशेषमभजत्कल्पांतेभगवत्प्रभुः ४९ तदाद्वावसुरौघोरौविख्यातौमधुकैटभौ विष्णुकर्णमलोद्भूतौहंतुब्रह्माणमुद्यतौ ५० सनाभिकमलेविष्णोःस्थितोब्रह्माप्रजापतिः दृष्ट्वातावसुरौचोग्रौप्रसुप्तंजनार्दनम् ५१

त्यर्थः प्रभुरित्यनेनस्वेच्छयातदंगीकारः नतुतयाबलादस्यावरणमितिध्वनितं अतएवयोगनिद्रेत्युक्तं इतरजननिद्रावन्मोहकारवश्यापादनीभवति लीलयासरस्वतीवल्लोचनपिधानमात्रंकरोति तदुक्तंहरिवंशेसरस्वतीसर्वहरस्येति मायाविष्णोः शरीरजा सेषानारायणमुखेस्थिताकमललोचनेतितेनभतः स्वस्वरूपज्ञानावरकत्वंप्रदर्शितं ४९ तदेतिमलोद्भूतावित्यनेनानयोरतितामसत्वसूचितमितरत्स्पष्टम् ५० तत्रब्रह्माकेत्यत आह सनाभिकमलेइति प्रजापतिर्निसर्गेतिब्रह्मणोविशेषणं प्रसुप्तंत्यक्तपालनव्यवहारम् ५१ ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तुष्टावेति सएकाग्रमनवच्छिन्नं हृदयंयस्यसतादृशः स्थितःसन्नित्यर्थः हृदयस्थितइत्यतः शर्परेखरिवाविसर्गलोपः विलोधनार्थायपालनव्यवहार
प्रवृत्त्यर्थंनेत्रेत्युपलक्षणम् सर्वांगस्थितत्वात्तस्याः लोकेनेत्रयोरेव भूयोनिद्राभिव्यक्तिमत्वात् नेत्रेत्युक्तिः ५२ योगनिद्रायाः मूलशक्त्यभेदेमत्वावि-
शेषयति विश्वेश्वरीमिति तत्वमेवविविच्याह जगद्धात्रीमित्यादि धात्रींजननीं अनेनजगदुत्पत्तिस्थितिलयकर्तृत्वंब्रह्मलिंगंदर्शितं अतुलामित्य

तुष्टावयोगनिद्रांतामेकाग्रहृदयस्थितः विबोधनार्थायहरेर्हरिनेत्रकृतालयाम् ५२ विश्वेश्वरींजग
द्धात्रींस्थितिसंहारकारिणीम् निद्रांभगवतींविष्णोरतुलांतेजसःप्रभुः ५३

तानिविष्णुनिद्राविशेषणानितेजसःप्र
भुरितिब्रह्मविशेषणंम् तत्स्तुत्यत्वेनात्युत्कर्षोस्याध्वनितः विष्णुमोहकतयाइतरमोहकत्वमनाश्चर्यमित्यपिध्वनितमिति आपाततोर्थः वस्तु
तोविष्णोरिति राहोः शरीरइतिवत्षष्ठी विष्णुरूपांनिद्रामित्यर्थः ब्रह्मापिसर्वेश्वरः सर्वशक्तिमान्लोकानुग्रहायस्वयंमोहितइवदुःखनिवृत्तये
इव भगवतींस्तौति ऋषेःसार्वज्ञत्वादिचैषांसर्वात्मत्वं सर्वशक्तिनामुपक्रमेदर्शितमेवेति नकश्चिद्विरोधः ५३ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कथंतुष्टावेत्यत आह ब्रह्मोवाच त्वमिति स्वाहा देवदानमंत्रोग्निपत्नीचस्वधापित्र्यदानमंत्रः पितृपत्नीचवषट्क्रियते यत्रसवषट्कारोयज्ञः यज्ञदेवाह्वा
नमंत्रश्चस्वराः षोडश आदयंस्तदात्मिकाचसुधादेवान्नं अक्षरे उपचयापचयपरिणामहीने आभ्यांसत्तामात्ररूपत्वंत्रिधामात्रात्मिकाह्रस्वदीर्घप्लुतरूपा अर्धमा
त्राव्यंजनरूपा अविशेषकत्वाध्वनालिंगितया अनुच्चार्यत्वंतदालिंगितानुतथेतिबोध्यम् त्रिधेत्यतोविशेषत इत्यंतेनप्रणवरूपताचोक्ता मात्रात्रयमकारोकार-
मकारात्मकम् तदूर्ध्वमर्धमात्रातत्रमात्रात्रयंजाग्रत्स्वप्नसुषुप्त्यभिमानिवैश्वतैजसप्राज्ञाभिधेयं अर्धमात्रातुवेदांतवाक्यार्थभूतनित्यमुक्ततुरीयाभिधे

ब्रह्मोवाच त्वंस्वाहात्वंस्वधात्वंहिवषट्कारःस्वरात्मिका सुधात्वमक्षरेनित्येत्रिधामात्रात्मिकास्थिता ५४ अर्धमात्रास्थितानित्यायानुच्चा
र्याविशेषतः त्वमेवसात्वंसावित्रीत्वंदेविजननीपरा ५५ त्वयैतद्धार्यतेसर्वंत्वयैतत्सृज्यतेजगत् तयैतत्पाल्यतेदेवित्वमत्स्यंतेचसर्वदा ५६
विसृष्टौसृष्टिरूपात्वंस्थितिरूपाचपालने तथासंहृतिरूपांतेजगतोस्यजगन्मये ५७

यातदुक्तंव्यक्तातुप्रथमामात्राद्वितीयाव्यक्तसंज्ञिता
मात्रातृतीयाचिच्छक्तिरर्धमात्रापरंपदमितित्वमेवेति सात्वमेवेतिपूर्वान्वयित्वंसावित्रीतत्सवितुरितिऋक्तदधिष्ठात्रीतद्वाच्याचेत्यर्थः हेदेवित्वंपराउत्कृ
ष्टाजननीसर्वजनकत्वात् सर्ववाग्जननीपराच ५४ ५५ सर्वंजगत् त्वयैवधार्यते सर्वधारणशक्तिमतीत्वमेवअग्रेएतत्पदानिसर्वपरामर्शकानिअत्सिआत्म
सात्करोषीतैश्चब्रह्मलिंगंदर्शितं ५६ सृष्ट्यादिकृयारूपापित्वमेवेत्याह विसृष्टाविति सप्तम्यंतानितत्काललाक्षकांनितथेतिजगद्रूपेइत्यर्थकजगन्मयेइत्यत्रछांद
सत्वात् ङीबभावः ५७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

महाविद्यामहावाक्यलक्षणा महामायासच्चिदानंदे आत्मनिसंसारित्वरूपानर्थावभासहेतुमूलविद्यामहामेधाभगवतः सर्वसत्वशक्तिः महास्मृतिः विधेः सृष्ट्यनुकूलानीतकल्पगतसकलवस्तुस्मृतिरूपा देवरूपाच महामोहेति संसारसमूलकारणरागरूपमोहस्वरूपामहादेवी सकलदेवशक्तिरूपा महासुरी हिरण्याक्षादिशक्तिरूपा ५८ सत्वरजस्तमोगुणत्रयैर्विभाव्यते यासासर्वस्यजडवर्गस्यप्रकृतिः मूलप्रधानंततात्त्यंत्वमेवएतेनपरमाण्वादीनामूलकारणत्व निरासः कालरात्रिरिति सर्वजंतुमरणोपलक्षितकल्पांतरात्रिः महारात्रिः ब्रह्मलयोपलक्षिताप्रलयरात्रिः मोहरात्रिः ममतावर्तमोहगर्तनिपातिनिमहामाया-

महाविद्यामहामायामहामेधामहास्मृतिः महामोहाचभवतीमहादेवीमहासुरी ५८ प्रकृतिस्त्वंचसर्वस्यगुणत्रयविभाविनी कालरात्रिर्महारात्रीर्मोहरात्रिश्चदारुणा ५९ त्वंश्रीस्त्वमीश्वरीत्वंह्रीस्त्वंबुद्धिर्बोधलक्षणा लज्जापुष्टिस्तथातुष्टिस्त्वंशांतिः क्षांतिरेवच ६०

त्व्यासंस्थानिकर्त्री उक्तंच दंष्ट्राकरालकालाग्निरुद्रकल्पांतिदारुणा मोहरात्रिर्मोहतनुर्जगत्सूतेजगत्करीतिदारुणत्वंचास्याः ब्रह्मज्ञानातिरिक्तानिवर्त्यत्वेन मोहरात्रिर्निशाच अस्यास्तनुस्तमोद्वारानिशादिवसनाशिनीति हरिवंशोक्तेः ५९ त्वमिति श्रीः संपत्लक्ष्मीबीजंचईश्वरीऐश्वर्यशक्तिः कामराजबीजंच ह्रीः भुवनेशीबीजंच उभयत्राप्यनुनासिकलोपः छांदसः बोधोनिर्णयात्मकज्ञानलक्षणस्वरूपयस्यास्तादृशीबुद्धिरंतःकरणं त्वमेवेत्यर्थः लज्जेति अतःकरणवृत्तिविशेषः पुष्टिरुपचयः तुष्टिरधिगतार्थादन्यत्रनुच्छत्वबुद्धिः शांतिः विषयेष्वनिंद्रियोपरमः क्षांतिः सत्यांशक्तौपरापराधसहिष्णुत्वएवकारस्त्वमित्यनंतरयोज्यः ६०

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

घोराएकहस्तस्थशिरसाभयंकरी शंखिनीति बाणश्चभुशुंडीश्चपरिघश्चायुधानियस्याः सा अनेनास्याः कल्पाः दशभुजात्वंसूचितं तदुक्तं वैकृतिकरहस्ययो
गनिद्राहरेरुक्तामहाकालीतमोगुणा मधुकैटभनाशार्थंयांतुष्टावांबुजासनः दशवक्त्रादशभुजादशपादांजनप्रभा विशालयाराजमानात्रिंशल्लोचनमालया स्फु
रद्दशनदंष्ट्रासाभीमरूपापिभूमिप रूपसौभाग्यकांतीनांसाप्रतिष्ठामहाश्रियाम् खड्गबाणगदाशूलशंखचक्रभुशुंडिभृत् परिघंकार्मुकंशीर्षंनिश्चोतद्रुधिरं
दधौ एषासावैष्णवीमायामहांकालीदुरत्यया आराधितावशीकुर्यात्पूजाकर्तुश्चराचरमितिउड्डीयोड्डियचप्राप्यनदंतीदशकर्तिका क्रमंतेवानतांगीयासाभुशुंडी

खड्गिनीशूलिनीघोरागदिनीचक्रिणीतथा शंखिनीचापिनीबाणभुशुंडीपरिघायुधा ६१ सौम्यासौम्यतराशेषसौम्येभ्यस्त्वतिसुंदरी पराप
राणांपरमात्वमेवपरमेश्वरी ६२ यच्चकिंचित्क्वचित्द्वस्तुसदसद्वाखिलात्मिके तस्यसर्वस्ययाशक्तिः सात्वंकिंस्तूयसेतदा ६३ ययात्वयाजगत्स्र
ष्टाजगत्पातात्तियोजगत् सोपिनिद्रावशंनीतः कस्त्वांस्तोतुमिहेश्वरः ६४

निगद्यते परिघोलोहबद्धोलगुडः ६१ सौम्याअक्रूराभक्तेषु असौ
म्यतरादैत्येषु अशेषसौम्येभ्यः सकलसुंदरेभ्यस्तु अतिसुंदरीत्यर्थः परेतिइदमुपलक्षणं पश्यंतीमध्यमावैखरीणां पराबीजरूपाच पराणांउत्कृष्टानांपरमा
प्रधानंत्वमेवयतस्त्वंपरमेश्वरी ६२ सत्ब्रह्मवर्गः असत्जडवर्गः तस्यसर्वस्ययाशक्तिः सायदात्वंतदात्वंकथंस्तव्येत्यर्थः पदपदार्थस्तोत्रस्तुत्यतच्छक्तिस्तुती
नांत्वत्तोन्यत्वाभावाद्भेदनिबंधनास्तुतिः कथंस्यादितिभावः ६३ स्तुत्यताभावेहेतुमाह पुनःययाब्रह्मविष्णुरुद्रात्मनाजगत्सृष्टिस्थितिलयकर्तापिनिद्रावशंनी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तः प्रापितइत्यर्थः पातिपालकः अस्मिन्स्वस्मिन्नुलयंप्रापयति तमोगुणप्रधानमायासंबंधादेवभगवतः सर्वोपसंहारेणस्वस्वरूपेवस्थानमितिभावः
६४ अहंब्रह्माशरीरग्रहणंकारितः केवलमायिकत्वाच्छरीराणामितिभावः ६५ सानंतरोक्तस्वभावात्वमित्यमेवंविधैरुदारैरक्षासाधारणैः स्वैःप्रभावैर्मा
हात्म्यैः संस्तुतावेतौमोहयइत्यर्थः मोहश्चभगवंतंप्रतिवरदातृरूपः ६६ प्रबोधंजागरणंपालनोद्यमरूपंहंतुंबोधः प्रवृत्तिः प्रवृत्तिस्वभावत्वात्तवेतिभा
वः ब्रह्मणः सृष्टित्वेनविषवृक्षोपीतिन्यायेननहनने प्रवृत्तिः विष्णुरपियद्यपिपालनप्रवृत्तः तथापिसंतापानलस्यदुष्टदहनंविनाऽसंभवात् पालनानु

विष्णुः शरीरग्रहणमहमीशानमेवच कारितास्तेयतोतस्त्वांकःस्तोतुंशक्तिमान्भवेत् ६५ सात्वमित्थंप्रभावैःस्वैरुदारैर्देविसं
स्तुता मोहयैतौदुराधर्षावसुरौमधुकैटभौ ६६ प्रबोधंचजगत्स्वामीनियतामच्युतोलघु बोधश्चक्रियतामस्यहंतुमेतौमहासु
रौ ६७ ऋषिरुवाच एवंस्तुतातदादेवीतामसीतत्रवेधसा विष्णोःप्रबोधनार्थायनिहंतुंमधुकैटभौ ६८

गुण्येनैवकदाचिद्धंतृत्वमपितस्यनानुपपन्नम् एवंचभगवत्कृतेपिमधुकैठभवधेप्राणवकर्तृकाध्ययने आचार्येणक्रियमाणेकरीषनोरिवतत्सामर्थ्या
चरणेनभगवतस्तद्धविषयकप्रवृत्तिसंपादकत्वेनप्रेरकतयातद्धंतृत्वंदेव्या अपीतिबोध्यम् ६७ ऋषिरुवाच एवंस्तुतेति तामसीआवरकत्वेन
तमःप्रधानाइयंशक्तिः मधुकैटभौएतौनिहंतुंचेत्यर्थः ६८ ५ ५ ५ ५ ५ ५ ५

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

नेत्रास्येति विष्णोरित्यादि उरोवक्षःप्राण्यंगत्वेपिनैकवच्छांदसत्वात् अव्यक्तादीश्वरात् जन्मप्रादुर्भावोयस्यतस्यब्रह्मणः दर्शनेचक्षुर्विषयेतस्था क्रियन्वयः ६९ उत्तस्थौचेति तयामुक्तस्त्यक्त इत्यर्थः अहिशयनात्शेषशयनात् सःतौतद्दशे अर्थात्तावपितंददृशानेतिकर्मव्यवहारे आत्मनेपदं ७० तौविशेषयति मधुकैटभाविति आद्यपादेनवाक्षरत्वंछांदसत्वात्वीर्यमुत्साहः पराक्रमःशक्त्यतिशयः अत्तुंग्रसितुं अनेनप्रबुद्धस्यतमसो

नेत्रास्यनासिकाबाहुहृदयेभ्यस्तथोरसः निर्गम्यदर्शनेतस्थौब्रह्मणोव्यक्तजन्मनः ६९ उत्तस्थौचजगन्नाथस्तयामुक्तो-
जनार्दनः एकार्णवेहिशयनात्तत्ततःसददृशेचतौ ७० मधुकैटभोदुरात्मानावतिवीर्यपराक्रमौ क्रोधरक्तेक्षणावत्तुंब्रह्मा
णंजनितोद्यमौ ७१ समुत्थायस्ततस्ताभ्यांयुयुधेभगवान्हरिः पंचवर्षसहस्राणिबाहुप्रहरणोविभुः ७२ तावप्यतिबलो
न्मत्तौमहामायाविमोहितौ उक्तवंतौवरोस्मत्तोव्रियतामितिकेशवम् ७३ श्रीभगवानुवाच भवेतामद्यमतुष्टौमम
वध्यावुभावपि किमन्येनवरेणात्रएतावद्धिवृतंमम ७४

रजोभिभावकत्वंस्मृचितम् ७१ ७२ तावपीति वरदृष्टोर्थः व्रि
यतांवृत्र्यतां ७३ श्रीभगवानुवाच भवेतामिति अत्रयदितदेतिपूरणीयम् यदित्तुष्टौतदातर्हिवध्यौभवेतामित्यन्वयः वृतमिति नपुं
सकेभावेक्तः ममेतिकर्तुः शेषत्वविवक्षायांषष्ठी ७४ ७ ७ ७ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋषिरुवाच वंचिताभ्यामिति तदातस्मिन्समयेइति एवंवरप्रार्थनयावंचिताभ्यांभगवतीकृतमोहवश्यात्सर्वंजगत् आपोमयंविलोक्यताभ्यांम
गवान्गदितइत्यर्थः आपोमयइत्यत्रापशब्दसमादानात् प्रकृतिकासुन्नतापः शब्दान्मयट् आपोमयमिदंसर्वमापोमूर्तिः शरीरिणामितिवत् ७५
किंगदितंतत्राह आवामिति नयत्रोर्वीयत्रयान्सलिलेनपरिप्लुतातत्रावांजहीत्यर्थः ७६ ऋषिरुवाच तथेति पूर्ववर्तमानकयाभिप्रायेणऋ

ऋषिरुवाच वंचिताभ्यामितितदासर्वमापोमयंजगत् विलोक्यताभ्यांगादितोभगवान्कमलेक्षणः ७५ आवांजहिनयत्रोर्वी
सलिलेनपरिप्लुता ७६ ऋषिरुवाच तथेत्युक्त्वाभगवताशंखचक्रगदाभृता कृत्वाचक्रेणवैछिन्नेजघनेशिरसीतयोः ७७

षिरुवाचेत्यृक्षिः अत्रभूयउपहाराभिप्रायेणवस्तुतः सप्तशतीत्वव्यवहारप्रयोजकसप्तशतमंत्रसंख्यापूरणीयतयाउक्तिः यथाचैतत्तथाकात्यायनी-
संमतिपूर्वकंसत्यांनेउपपादयिष्यामिः तत्रनयत्रोर्वीत्येवंसंपादयन् तयोःशिरसीजघनेउपस्थादूर्ध्वनाभेरधोभागेकृत्वाचक्रेणछिन्नवान् एतेनभगवद्हस्य
शुद्धमायिकत्वेनापांचभौतिकतयाजघनेमारणेपिसलिलप्लुतत्वाभावविशिष्टोर्व्यांप्रार्थितस्यवधस्याधृतिरितिपरास्तम् ७७ ६ ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उपसंहरति एवमेषेति समुत्पन्नाप्रादुर्भूता अस्यादेव्याइति अधिकरणेषष्ठ्यौअस्यां: तामस्याः मूलभूतायाः त्रिगुणामहालक्ष्म्याः तस्याइत्यर्थः अतएवतुशब्दसंगतिः भूयः प्रभावंपुनः प्रादुर्भावंभूयइत्यकस्तुत्तामस्यास्तस्याअंशाभेदात् पूर्वोक्तप्रभावोपितस्याएवध्वनयितुं यद्वा प्राधानिकरहस्योद्यच्चतुर्भुजप्रादुर्भावापेक्षयामध्यमचरित्रवक्ष्माणाष्टादशभुजाप्रादुर्भावस्यपुनस्त्वमादायतदुक्तिः तदुक्तंलक्ष्मीतंत्रे योगनिद्राहरेरुक्तायासादेवीदुरत्यया महाकाल्यास्तनुंविद्धितांमांदेशींसतानतीं मधुकैटभनाशार्थंमोहितौचतदातया जघ्नातेवरलाभेनदेवदेवेनविष्णुना एषासावैष्णवीमा-

एवमेषासमुत्पन्नाब्रह्मणासंस्तुतास्वयम् प्रभावमस्यादेव्यास्तंभूयःशृणुवदामिते ७८ इतिमार्कंडेयपुराणेसावर्णिकेमन्वंतरेदेवीमाहात्म्येमधुकैटभवधोनामप्रथमोऽध्यायः १

यामहाकालीदुरत्यया स्तुत्यावशीकृताकुर्यादिशस्तोतुश्वराचरमिति स्तुत्या विश्वेश्वरादिसूक्तरूपयातदुक्तम् विश्वेश्वर्यादिकंसूक्तंदृष्टंतद्ब्रह्मणातदा स्तुतयोयोगनिद्रायाममदेव्याः पुरंदर अस्यादेव्याः समुत्पत्तिश्चरितंस्तोत्र मित्यपि हितायसर्वभूतानांधार्यतेब्रह्मवादिभिरिति विश्वेश्वर्यादिसूक्तमेवरात्रिसूक्तमितिव्यवह्रियते कालरात्रिर्महारात्रिरितितत्ररात्रिपदाभ्यासादितिबोध्यम् विश्वेश्वरीपदेनोपक्रमात्विश्वेश्वरीसूक्तमपि ७८ इतिशब्दःसमाप्तौसावर्णिकःप्रकाशोयत्रतादृशेमन्वंतरेतद्वर्णनेइत्यर्थः इतिशिवभट्टसूतसतीगर्भजनागोजीभट्टकृतसप्तशतीव्याख्याने प्रथमोऽध्यायः १ ७ ७ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भूयः सृण्वित्कथं तत्रेति हासमाह ऋषिरुवाच देवासुरमिति असुराणामधिपेमहिषेचसति पुनर्देवानामधिपेपुरंदरेइंद्रेसतिदेवाअसुराश्चमहतीरौद्र
त्रतादृशंयुद्धशब्दशतमासीदित्यर्थः देवासुरमित्यत्रार्शआदित्वादन् रंभासुरतपस्यायाप्रसन्नस्यशिवस्यांशोयंतत्कृतोमहिषः सचतपसादेवीनिकटेमम-
सायुज्यंभवत्वितिवरंप्रार्थितवानितिकालीपुराणेस्पष्टम् १ तत्रेतिइंद्रसुरराट् २ ततइति पद्मयोनिंब्रह्माणंप्रजापतिमिति तस्यविशेषणंब्रह्मणाः-
प्रजास्रष्टृत्वेनसिद्धसंबंधत्वात् आदौदेवानांतत्रगमनं ततःपालनसंहारयोः शिवविष्ण्वोरेवाधिकारात्सब्रह्मणयोः समीपेगतं ३ यथावृत्तमितिदेवा

ऋषिरुवाच देवासुरमभिद्युद्धंपूर्णमब्दशतंपुरा महिषेसुराणामधिपेदेवानांचपुरंदरे १ तत्रासुरैर्महावीर्यैर्देवसैन्यंपराजितं जि-
त्वाचसकलान्देवानिंद्रोभून्महिषासुरः २ ततःपराजितादेवाःपद्मयोनिंप्रजापतिं पुरस्कृत्यगतास्तत्रयत्रेशगरुडध्वजौ ३ यथावृत्तं
तयोस्तद्वन्महिषासुरचेष्टितं त्रिदशाः कथयामासुर्देवाभिभवविस्तरं ४ सूर्येंद्राग्न्यनिलेंदूनांयमस्यवरुणस्यच अन्येषांचाधिकारा-
न्स्वस्वयमेवाधितिष्ठति ५ स्वर्गान्निराकृताःसर्वेतेनदेवगणाभुवि विचरंतियथामर्त्यामहिषेणदुरात्मना ६ एतद्वःकथितंसर्वममरारि
विचेष्टितं शरणंचप्रपन्नास्तोवधस्तस्यविचिंत्यतां ७

नामभिभवस्यविस्तरः प्रपंचोयत्रेतिचेष्टितविशेषणं ४ सूर्येंद्रेतिसस्वयमित्यत्रएतसदोरितिसुलोपःस्वयमितिहिसकारपाठस्तुअनचिचेतिहित्वेनबोध्यः ५ स्वर्गादितिनिराकृताःनिःसारिताः ६ एतद्वइतियःइतिह्योर्बहुवचनंगौरवात्चपरंशरणंप्रपन्नाःआगतास्मो भवामः ७

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

इत्थमिति भ्रुवोः कुरीकौटिल्येतेनकुटिलेभ्रुभेआनयेयर्थौस्तौ भ्रूशब्दस्यपृषोदरादित्वात् ह्रस्वः कुटेरिकप्रत्ययांतात्कृदिकारादिनिङीप् ब्रह्मणःकोपेपि रजआधिक्येनशिवस्यतमोगुणप्राधान्येनकोपेपितमोगुणस्याधिक्येनविष्णुकोपस्यपालकफलत्वेनसत्वाधिक्यवत्तयात्रिगुणाएषाभन्यते अतएवोक्तंवैकृतिकरहस्ये सर्वदेवशरीरेभ्योयाविर्भूतामितप्रभा त्रिगुणासामहालक्ष्मीः साक्षान्महिषमर्द्दिनी तत्रापिरजःसत्वयोराधिक्यंदेवानांरजः सत्वमयत्वात् ८ ततइति द्वितीयंततइतिप्रसिद्धादित्यर्थकंवदनादित्यस्यविशेषणम् ९ अन्येषांचेति कुपितानामितिशेषः यत्तेजः निर्गतंतच्चब्रह्मादीनांतेजश्चैक्यंएकत्वंसमगच्छ

इत्थंनिशम्यदेवानांवचांसिमधुसूदनः चकारकोपंशम्भुश्चभ्रुकुटीकुटिलाननौ ८ ततोतिकोपपूर्णस्यचक्रिणोवदनात्ततः निश्चक्रामम हत्तेजोब्रह्मणःशंकरस्यच ९ अन्येषांचैवदेवानांशक्रादीनांशरीरतः निर्गतंसुमहत्तेजस्तच्चैक्यंसमगच्छत १० अतीवतेजसःकूटंज्वलंतमिवपर्वतम् ददृशुस्तेसुरास्तत्रज्वालाव्याप्तदिगंतरं ११ अतुलंतत्रतत्तेजःसर्वदेवशरीरजम् एकस्थंतदभून्नारीव्याप्तलोकत्रयंत्विषा १२ यदभूच्छांभवंतेजस्तेनाजायतताम्मुखं याम्येनचाभवत्केशाबाहवोविष्णुतेजसा १३

न छांदसस्तङ् १० अतीवेति तत्रैत्यस्यकालेइतिदेशेइतिवाविशेषः ११ अतुलमितितत्ततः तत्रपुराणांतरप्रसिद्धेकात्यायनाश्रमेतत्तेजः एकस्थंसन्नारीअभूत्त्विषादीप्त्या १२ तेजोविभागेनांगधिभागमाह यदिति शांभोःश्वेतांगतयातत्तेजसातन्मुखंश्वेतमित्यर्थः विष्णोर्नीलवर्णतयाबाहवोदशनीलाः १३ छ छ छ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सौम्येनेतिसोमसंबंधिनेत्यर्थः छांदसत्वादिदमर्थेयण् अतएवश्वेतस्तनी ऐंद्रेणमध्यंरक्तंजंघोरूइत्यत्रपूर्वनिपातैकवद्भावः विधेरनित्यत्वान्नदोषः स्निग्धेपदेवा जंघेऽरूत्ववारुणेनेत्यन्वयः भुवःपृथ्व्याः नितंबःकटिपश्चाद्भागः १४ ब्रह्मणइति अतएवपादौरक्तौ एतदुक्तंवैकृतिकरहस्ये श्वेताननानीलभुजासुश्वेतस्तनमंडला रक्तमध्यारक्तपादानीलजंघोरुरुन्मदा सुचित्रजघनाचित्रमाल्यांबरविभूषणा चित्रानुलेपनाकांतिरूपसौभाग्यशालिनीति एवंचरूपेणापित्रिगुणात्मंभूवि तम् स्वस्थचित्तत्वात् चित्रमाल्यादिधारणम् वसूनामित्यस्यतेजसेतिशेषः एवमन्यत्रापि १५ तस्याइति प्राजापत्येनदक्षादितेजसातेनब्रह्मणः तेजसापा-

सौम्येनस्तनयोर्युग्मंमध्यमैंद्रेणचाभवत् वारुणेनचजंघोरूनितंबस्तेजसाभुवः १४ ब्रह्मणस्तेजसापादौतदंगुल्योर्कतेजसा वसू नांचकरागुल्यःकौबेरेणचनासिकाः १५ तस्यास्तुदंताःसंभूताःप्राजापत्येनतेजसा नयनत्रितयंजज्ञेतथापावकतेजसा १६ भ्रुवौ चसंध्ययोस्तेजःश्रवणावनिलस्यच अन्येषांचैवदेवानांसंभवस्तेजसांशिवा १७ ततःसमस्तदेवानांतेजोराशिसमुद्भवाम् तांवि लोक्यमुदंप्रापुरमरामहिषार्दिताः १८

दौइत्यनेननविरोधः पावकोग्निः तत्तेजसानेत्रत्रयं १६ भ्रुवौचेतिसंध्ययोस्तेजः भ्रुवावभूतामित्यन्वयः करणस्यैवकर्तृत्वविवक्षापुंनपुंसकयोः कर्णःश्रवणः श्रवणंश्रुताविहितेममाला अन्येषांचदेवानांसंबंधितेजसांशिवांचंडिसंभवः एकीभावःकार्यमेवेत्यर्थः एवमग्रिमौ १७ तत इतितेजोराशिसमुद्भवामितिसाक्षेकत्वेपिगमकत्वात्समासः मुदंहर्षं ब्रह्मादिषुविद्यमानस्यतेजसैवभगवतीआविर्भूतेतितात्पर्यं एवमायुधदानमपिबोध्यम् १८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शूलमिति विनिकृष्य आकृष्येत्यर्थः समुत्पाद्यजनयित्वेत्यर्थः पदेर्ण्यंतस्यरूपम् एवमग्रेपिअत्रचक्रंचेतिचाद्गदा १९ शंखंचेति वरुणाच्छंखस्यअग्नेः शक्तेः
वायोश्चापबाणयोर्लाभइत्यर्थः शंखंचेति चकारोवक्ष्यमाणपाशसमुच्चयेइत्यर्थः २० वज्रमितिदेयभेदादेकस्यैवदातुः क्वचित्पुनरुपादानेपिनदोषः २१ काले
ति उत्पाद्येतिशेषः प्रजानांपतिर्ब्रह्मा अक्षमालांकमंडलुंचददावित्यन्वयः ब्रह्माक्षमालाकमंडलुमितिवामनपुराणात् २२ समस्तेति कालस्तदभिमानिनीदेवता

शूलंशूलाद्विनिष्कृष्यददौतस्यैपिनाकधृक् चक्रंचदत्तवान्कृष्णःसमुत्पाद्यस्वचक्रतः १९ शंखंचवरुणःशक्तिंददौतस्यैहुताशनः मारु
तोदत्तवांश्चापंबाणपूर्णोतथेषुधी २० वज्रमिंद्रःसमुत्पाद्यकुलिशादमराधिपः ददौतस्यैसहस्राक्षोघंटामैरावताद्गजात् २१ कालदंडा-
द्यमोदंडंपाशंचांबुपतिर्ददौ प्रजापतिश्चाक्षमालांददौब्रह्माकमंडलुं २२ समस्तरोमकूपेषुनिजरश्मिन्दिवाकरः कालश्चदत्तवान्ख
ड्गंतस्याश्चर्मचनिर्मलं २३ क्षीरोदश्चामलंहारमजरेचतथांबरे चूडामणिंतथादिव्यंकुंडलेकटकानिच २४ अर्धचंद्रंतथाशुभ्रंकेयू
रान्सर्वबाहुषु नूपुरौविमलौतद्वद्ग्रैवेयकमनुत्तमं २५ अंगुलीयकरत्नानिसमस्तास्वंगुलीषुच विश्वकर्माददौतस्यैपरशुंचातिनिर्मलम् २६

तस्याइतिसंबंधत्वेनविवक्षायांषष्ठि २३ क्षीरोदश्चेति अंगुलीयकरत्नदानांतंक्षीरोदःकर्ता २४ विश्वकर्मणः परश्वस्त्रकवचदातृत्वं चूडामण्यादिककवच-
दानांतंविश्वकर्मणः कर्तृत्वमित्यन्वयः इतिकेचित् तन्मतेअर्धचंद्रशब्देनतदाकारोललाटभूषणविशेषः २५ २६ छ छ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अम्लानेत्यारभ्यपंकजदानांतंजलधिः कर्तातत्रपंकजंहस्तेदंशनंकवचं अम्लान्यशुष्काणिपंकजानियस्यांतां २७ रत्नसिंहयोर्दानेहिमवान्कर्तादददितिददानेइत्यस्यलडिरूपम् छांदसत्वात्परस्मैपदम् २८ ददाविति सुरयाअशून्यंपूर्णंयइमांपृथिवींधत्तेसशेषः नागरूपंहारंतस्यैददावित्यन्वयः अने

अरुणाप्यनेकरूपाणितथाभेद्यंचदंशनम् अम्लानपंकजांमालांशिरस्युरसिचापराम् २७ अददज्जलधिस्तस्यैपंकजंचातिशोभनम् हिमवान्वाहनंसिंहंरत्नानिविविधानिच २८ ददावशून्यंसुरयापानपात्रंधनाधिपः शेषश्चसर्वनागेशोमहामणिविभूषितम् २९

नाष्टादशभुजासहस्रभुजाचैषेतिसूचितम् तदुक्तंवैकृतिकरहस्ये अष्टादशभूजापूज्यासासहस्रभुजासती अष्टादशभुजधार्याणांविशिष्योक्तेः २९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University, Ramtek Collection

सामान्यतः अन्यैरपिदेवैरायुधैरित्यर्थः आयुधान्यत्रवक्ष्यंतेदक्षिणाधःकरक्रमात् अक्षमालाचकमलंबाणोसिःकुलिशंगदा चक्रंत्रिशूलंपर
शुंशंखोघंटाचपाशकः शक्तिर्दंडश्चर्मचापंपानपात्रंकमंडलुः अलंकृतभुजामेभिरायुधैःकमलासनां सर्वदेवमयीमीशांमहालक्ष्मीमिमांनृप पूजयन्सर्वलोकानां
सदेवानांप्रभुर्भवेदिति एवंस्वस्वरूपायुधैरस्याब्राह्मीत्वंवैष्णवीत्वंशैवीत्वंचत्रिगुणात्वंचसर्वमूलभूतशक्तेरयंप्रादुर्भावस्तत्स्मान्नइतिचसूनितम् यद्यप्यत्रब्रह्मा-
दीनांइंद्रादीनांचशरीरान्निष्क्रांततेजोदेवीविग्रहरूपेणाभिव्यक्तमासीत् आयुधानिचदेवैः स्वस्वशूलादिभ्योविनिर्गमध्यइत्येवोक्तं तथापिदेवीशक्त्यंशाएवतत्त
देवपालनैकदेशपालनशक्तित्वेनयेनदेव्यानिवेशितास्तेएवमहिषवधेनसर्वलोकरक्षणायपुनरेकीभूयदेवीरूपंभासाः एवंतदायुधाःनिजशक्त्यंशाअपीतिबो-

नागहारंददौतस्यैधत्तेयःपृथिवीमिमां अन्यैरपिसुरैर्देवीभूषणैरायुधैस्तथा ३० संमानितानन्दाच्चैःसाट्टहासंमुहुर्मुहुः तस्या-
नादेनघोरेणकृत्स्नमापूरितंनभः ३१ अमायतातिमहतातिशब्दोमहानभूत् चुक्षुभुःसकलालोकाःसमुद्राश्चचकंपिरे १५

र्थं अहंविभूत्याबहुभिरित्यादितृतीयचरितगतवचनसमूहात् लक्ष्मीतंत्रेपिशक्रंप्रतिलक्ष्मीवचनानि महालक्ष्मीरहंशक्रपुनःस्वायंभुवेंतरे हितायसर्वदेवानांज
तामहिषमर्दिनी मदीयाःशक्तिलेशायैतंमदेवशरीरजाः धृतंमयातैःसंभूतैरूपंपरमशोभनं आयुधानिचदेवानांयानियानिसुरेश्वर मच्छक्त्यस्तदाकाराण्यायु-
धानिममाश्नवन्निति ३० संमानितेति साट्टहासंमिति नादक्रियाविशेषणं साट्टहासोत्यर्थहासः नभइतिभुवर्लोकलक्षणं ३१ अमायतेतिमाङ्मानेदैर्घ्यादिछत्रान-
भ्रसमासःतेनभसंभवतीत्यर्थः भस्यनभसीत्यादि ३२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चचालेति महीधराः पर्वताः जयसर्वोत्कर्षेणवर्त्तस्वयद्वाशत्रूनभिभवेति ३३ तुष्टुवुरिति भक्त्यानम्राः अपकृष्टज्ञानवानात्माशरीरंनमनंतयेषां संक्षुब्धंआकुलंयातमितिशेषः अमरारयश्चसंक्षुब्धाइत्यर्थः ३४ सन्नद्धेति युद्धायसन्नद्धानिसज्जितानिधृतसन्नाहानिअखिलसैन्यानियेषांयोद्धुमूर्ध्वानिकृतान्यायुधानियैस्तेअमरारयः आः इतिक्रोधाविष्कारे अनेनचमहिषासुरस्यतमोमयत्वमुक्तं दूतप्रेरणात् कस्यचित्सैनिकस्यप्रथमप्रेषणाच्च स्व-

चचालवसुधाचेलुःसकलाश्चमहीधराः जयेतिदेवाश्चमुदानामूचुःसिंहवाहिनीम् ३३ तुष्टुवुर्मुनयश्चैनांभक्तिनम्रात्ममूर्तयः दृष्ट्वासमस्तंसंक्षुब्धंत्रैलोक्यममरारयः ३४ सन्नद्धाखिलसैन्यास्तेसमुत्तस्थुरुदायुधाः आःकिमेतदितिक्रोधादाभाष्यमहिषासुरः ३५ अभ्यधावततंशब्दमशेषैरसुरैर्वृतः ददर्शततोदेवींव्याप्तलोकत्रयंत्विषा ३६ पादाक्रान्त्यानतभुवंकिरीटोल्लिखितांबरां क्षोभिताशेषपातालांधनुर्ज्यानिःस्वनेनताम् ३७ दिशोभुजसहस्रेणसमंताद्व्याप्यसंस्थितां ततःप्रववृतेयुद्धंतयादेव्यासुरद्विषां ३८ शस्त्रास्त्रैर्बहुधामुक्तैरादीपितदिगंतरं महिषासुरसेनानीश्चिक्षुरारव्योमहासुरः ३९

यमेवक्रोधमोहनप्रथममेवयुद्धार्थंधावनाच्चरूपेणापितमोमयत्वाच्च अतएवरजःसत्वाधिकदेव्यास्तद्धंतृत्वम् ३५ अभ्यधावतेतिस्वरितेत् ३६ देवींविशेषयतिसार्द्धेनपादेतिधनुषोज्यायाश्चनिस्वनेन धनुषःकेंकारःज्याघोषंकारः ३७ दिशइति समंतात्सर्वतः ३८ शस्त्रास्त्रैरिति शस्त्रंकेवलंमंत्रस्तद्युक्तमस्त्रं युयुधेइति अन्येःप्रधानदैत्यैःसहितैः चामरारव्यः चिक्षुरारव्यश्च रथनागहयपादातरूपचतुरंगसेनायुतोयुयुधेइत्यर्थः ३९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

युयुधेचामरश्चान्यैश्चतुरंगबलान्वितः रथानामयुतैःषड्भिरुदग्रारव्योमहारुरः ४० अयुद्ध्यतायुतानांचसहस्रेणमहाहनुः पं-
चाशद्भिश्चनियुतैरसिलोमामहासुरः ४१ अयुतानांशतैःषड्भिर्बाष्कलोयुयुधेरणे गजवाजिसहस्रौघैरनेकैःपरिवारितः ४२ धृतो
रथानांकोट्याचयुद्धेतस्मिन्नयुध्यत बिडालाख्योयुतानांचपंचाशद्भिरथायुतैः ४३ युयुधेसंयुगेतत्ररथानांपरिवारितः अन्येचतत्रा
युतशोरथनागहयैर्वृताः ४४ युयुधुःसंयुगेदेव्यासहतत्रमहासुराः कोटिकोटिसहस्रैस्तरथानादंतिनांतथा ४५ हयानांचवृतायुः
द्धेतत्राभून्महिषासुरः तोमरैर्भिंदिपालैश्चशक्तिभिर्मुशलैस्तथा ४६

पि बिडालनयनशब्दोयोगरूढोनकेवलंयौगिकः प्रकृतेचनामैकदेशे
नामग्रहणंअतएव बिडालस्यासिनेतिवक्ष्यमाणंसंगच्छते ४३ युयुधेइतिस्पष्टम् ४४ युयुधुरिति अस्यपूर्वेणान्वयः अनुदात्तेत्वलक्षणतडोनित्यत्वात्पर-
स्मैपदंउत्तरार्द्धमुत्तरान्वयि ४५ हयानांचेति रथदंतिहयानांप्रत्येककोटिकोटिसहस्रसंख्यायुतोमहिषस्तत्राभूदित्यर्थः उत्तरान्वयिभिंदिइतिदंत्यांतः ४६ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

युयुधुरितिकेचिद्दैत्याइतिशेषः अपरेइत्यत्रान्वयि ४७ देवीमिति अपरेतुतेप्रसिद्धदैत्याइत्यर्थः मोपाभ्यामित्यात्मनेपदंनछांदसत्वात् ४८ लीलयैवआयासरहितानना ४९ मुमोचेति उत्तरार्द्धमुत्तरान्वयि धुतःकंपिताः सटाः केसरायस्येति ५० चचारेति उत्तरार्द्धमुत्तरान्वयियान्यावत् ५१ तएवेतितावं-

युयुधुःसंयुगेदेव्यास्वङ्गैःपरशुपट्टिशैः केचिच्चचिक्षिपुःशक्तिःकेचित्पाशांस्तथापरे ४७ देवींखड्गप्रहारैस्तुतेतांहंतुंप्रचक्रमुः सापि देवीततस्तानिशस्त्रान्यस्त्राणिचंडिका ४८ लीलयैवप्रचिच्छेदनिजशस्त्रास्त्रवर्षिणी अनायासाननादेवीस्तूयमानासुरर्षिभिः ४९ मुमोचासुरदेहेषुशस्त्राण्यस्त्राणिचेश्वरी सोपिक्रुद्धोधुतसटोदेव्यावाहनकेसरी ५० चचारासुरसैन्येषुवनेष्विवहुताशनः निःश्वासान्मुमुचेयाश्चयुद्ध्यमानारणेंबिका ५१ तएवसद्यःसंभूतागणाःशतसहस्रशः युयुधुस्तेपरशुभिर्भिंदिपालासिपट्टिशैः ५२ नाशयंतोसुरगणान्देवीशक्त्युपबृंहिताः अवादयंतपटहान्गणाःशंखांस्तथापरे ५३ मृदंगांश्चतथैवान्येतस्मिन्युद्धमहोत्सवे ततो देवीत्रिशूलेनगदयाशक्तिवृष्टिभिः ५४ खड्गादिभिश्चशतशोनिजघानमहासुरान् पातयामासचैवान्यान्घंटास्वनविमोहितान्५५

तइवेत्यर्थः एकैकनिश्वासादेकैकगणाः संभूतइत्यर्थः शतसहस्रशःलक्षशःतेगणाः ५२ नाशयंतइतिदेवीप्रभावेनाप्यायिताः आनकान्भावादयंतःअवादितवंतइत्यर्थः गणाःकेचिदितिशेषः ५३ मृदंगांश्चेतियुद्धमेवमहोत्सवोवीराणांहर्षत्वात् शक्तीनांवृष्टिभिर्वर्षैरित्यर्थः ५४ खड्गेतिस्पष्टम् ५५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अस्करान्सुविपाशेनबध्वाचान्यानकर्षयन् केचिद्द्विधाकृतास्तीक्ष्णैःखड्गपातैःतथापरे ५६ विपोथितानिपातेनगदयाभूविशेरते वेपुश्चकेचिद्रुधिरंमुसलेनभृशंहताः ५७ केचिन्निपतिताभूमौभिन्नाःशूलेनवक्षसि निरंतराःशरौघेणकृताःकेचिद्रणाजिरे ५८ सेनानुकारिणःप्राणान्मुमुचुस्त्रिदशार्दनाः केषांचिद्बहवश्छिन्नाश्छिन्नशीर्षास्तथापरे ५९ शिरांसिपेतुरन्येषामन्येमध्येविदारिताः छिन्नजंघास्त्वपरेपेतुरुर्व्यांमहासुराः ६० एकबाह्वक्षिचरणाःकेचिद्व्याद्विधाकृताः छिन्नेपिचान्येशिरसिपतिताःपुनरुत्थिताः ६१ कबंधायुयुधुर्दैव्यागृहीतपरमायुधाः ननृतुश्चापरेतत्रयुद्धेतूर्यलयाश्रिताः ६२

अपरेच्छिन्नग्रीवाः प्राणान्मुमुचुरित्यर्थः ५९ शिरांसीति छिन्नानीतिशेषः ६० एकइति आशिरः पादपर्यंतंपारिताइत्यर्थः उत्तरार्धमुत्तरान्वयि ६१ कबंधाइति मनुष्याणांसहस्रेषुहतेषुहतमूर्धसु तदावेशाक्कबंधःस्यादेकोमूर्धा क्रियान्वितइतिलक्षिताः कबंधोस्त्रीक्रियायुक्तमपमूर्धकलेवरं अपरेकबंधाश्चयुयुधुः तूर्यलयाश्रितानन्नृतुः ६२ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कबंधादिति उभयत्रापियुयुधुरितिशेषः छिन्नशिरसइतिस्वरूपकथनंछिन्नानिशिरांसियैरितिवा ऋषयः उभयतोधाराःखड्गाः भाषतइतिछांदसः ६३ पातितैरितिरथनागसहितैरश्वैरित्यर्थः एवमग्रेपि ६४ शोणितौघेति असुरसैन्यस्यमध्येवारणाश्चअसुराश्चवाजिनश्चेतिद्वंद्वः तेषांवारणासुरवाजिनां शोणितस्यओघः प्रवाहोयासुतादृश्योनद्यः असृक्स्रुवुः सद्यःदेव्यासहसुदृक्षणेछांदसत्वात्समासः ६५ क्षणेनेतिनयतिर्द्विकर्मकः ६६ सचेतिक्षयं

कबंधाच्छिन्नशिरसःखड्गशक्त्यृष्टिपाणयः तिष्ठतिष्ठेतिभाषंतोदेवीमन्येमहासुराः ६३ पातितैरथनागाश्चैरसुरैश्चवसुंधरा अगम्यासाभवत्तत्रयत्राभूत्संमहारणाः ६४ शोणितौघामहानद्यःसद्यस्तत्रविसुस्रुवुः मध्येचासुरसैन्यस्यवारणासुरवाजिनां ६५ क्षणेनतन्महासैन्यमसुराणांतथांबिका निन्येक्षयंयथावह्निस्तृणदारुमहाचयं ६६ सचसिंहोमहानादमुत्सृजन्धुतकेसरः शरीरेभ्योमरारीणामसूनिवविचिन्वति ६७ देव्यागणैश्चतैस्तत्रकृतंयुद्धंतथासुरैः यथैषांतुतुषुर्देवाःपुष्पवृष्टिमुचोदिवि ६८

इतिश्रीमार्कंडेयपुराणेसावर्णिकेमन्वंतरेदेवीमाहात्म्येमहिषासुरवधोनामद्वितीयोऽध्यायः २ ५ ५ ५

निन्येइतिशेषः तत्रोत्प्रेक्षते अमरारीणांशरीरेभ्यः असूनिविचिन्वतीव भूतेर्लङ्तियोअडागमः छांदसः ६७ देव्याइति चोप्यर्थेतुतुषुस्तुष्टाः ६८

इतिशिवभट्टसुतसतीगर्भजनागोजीभट्टकृतेसप्तशतीव्याख्याने द्वितीयोऽध्यायः २ ५ ५ ५ ५ ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋषिरुवाच निहन्यमानमिति निहतमित्यर्थः वर्तमानसामीप्येभूतेलट् १ ववर्षछादयामास २ तस्येति लीलया अनायासेनउत्करःसमूहःवाजिनां यंतारंचरथंचजघानेत्यन्वयः ३ चिच्छेदेति आशुगैः बाणैः विव्याधताडयामास ४ ५ सिंहमिति सव्येबामेबामंशरीरंसव्यंस्यादपसव्यंतुदक्षिणमिति

ऋषिरुवाच निहन्यमानंतत्सैन्यमवलोक्यमहासुरः सेनानीश्चिक्षुरःकोपाद्ययौयोद्धुमथांबिकां १ सदेवींशरवर्षेणववर्षसमरे सुरः यथामेरुगिरेःशृंगतोयवर्षेणतोयदः २ तस्यच्छित्वाततोदेवी लीलयैवशरोत्करान् जघानतुरगान्बाणैर्यंतारंचैववाजिनां ३ चिच्छेदचधनुःसद्योध्वजंचातिसमुच्छ्रितं विव्याधचैवगात्रेषुछिन्नधन्वानमाशुगैः ४ सछिन्नधन्वाविरथोहताश्वोहतसारथिः अभ्यधावततांदेवीं खड्गचर्मधरोसुरः ५ सिंहमाहत्यखड्गेनतीक्ष्णधारेणमूर्धनि आजघानभुजेसव्येदेवीमप्यतिवेगवान् ६ तस्याः खड्गोभुजंप्राप्यपफालनृपनंदन ततोजग्राहशूलंसकोपादारुणलोचनः ७ चिक्षेपचततस्तत्तुभद्रकाल्यामहासुरः जाज्वल्यमानं तेजोभिरविबिंबमिवांबरात् ८ दृष्ट्वातदापतच्छूलंदेवीशूलममुंचत तेनतच्छतधानीतंशूलंसचमहासुरः ९ हतेतस्मिन्महावीर्ये महिषस्यचमूपतौ आजगामगजारूढश्चामरस्त्रिदशार्दनः १०

६ तस्याइति पफालचीर्णःतस्याभुजमित्यन्वयः ७ चिक्षेपेति तत्शूलं अंबरादविबिंबमिवइत्युत्तरान्वयितेजोभीरित्यत्रलुप्तोपइतिदीर्घः ८ दृष्ट्वेति तत्एवंस्कंदरंशूलमापतत्आगच्छत् दृष्ट्वाचेत्यर्थः सचशतधानीतइतिशेषः ९ हतेइतिचामरनाम १०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सोपीतिदेव्याः प्रतिघातायमुमोचद्रुतंशीघ्रंहुंकाराभिहतांअतएवनिष्प्रभांहुंकारइति-हस्वः ११ १२ ततइतिसमुत्पत्यप्राप्तुत्य गजकुंभांतरस्थितइत्येकं पदं उच्चैः अतितरांयुयुधे १३ युध्यमानाविति नागात्गजात्युयुधातेतीत्यत्रप्रवृत्त्यसाभावाच्छांदसः अतिक्रुद्धौ १४ ततइतियुद्धानंतरंवेगात्खमुत्प

सोपिशक्तिंमुमोचाथदेव्यास्तामंबिकाद्रुतं हुंकाराभिहतांभूमौपातयामासनिष्प्रभां ११ भग्नांशक्तिंनिपतितांदृष्ट्वाक्रोधसमन्वितः चिक्षेपचामरःशूलंबाणैस्तदपिसाच्छिनत् १२ ततःसिंहःसमुत्पत्यगजकुंभांतरेस्थितः बाहुयुद्धेनयुयुधेतेनोच्चैस्त्रिदशारिणा १३ युध्यमानौततःस्तौतुतस्मान्नागान्महींगतौ युयुधातेतिसंरब्धौप्रहारैरतिदारुणैः १४ ततोवेगात्खमुत्पत्यनिपत्यचमृगारिणा करप्रहारेणशिरश्चामरस्यपृथक्कृतम् १५ उदग्रश्चरणेदेव्याशिलावृक्षादिभिर्हतः दंतमुष्टितलैश्चैवकरालश्चनिपातितः १६ देवी क्रुद्धागदापातैश्चूर्णयामासचोद्धतम् बाष्कलंभिंदिपालेनबाणैस्ताम्रंतथांधकं १७ उग्रास्यमुग्रवीर्यंचतथैवचमहाहनुं त्रिनेत्रात्रिशूलेनजघानपरमेश्वरी १८ बिडालस्यासिनाकायात्पातयामासवैशिरः दुर्धरंदुर्मुखंचोभौशरैर्निन्येयमक्षयं १९

त्यगत्वापुनस्तत्तोनिपत्यावतीर्यइत्यर्थः १५ उदग्रश्चेति रणेयुद्धेदंतैर्गजदंतनिर्मितायुधैः मुष्टिभिः तलैश्चपदैश्चइत्यर्थः यद्वा दंतैर्दंतक्षतैरित्यर्थः १६ देवीति उद्धतंतन्नामाभिंदीतिदंत्यमध्यः १७ १८ बिडालस्येति यमक्षयंयमगृहम् १९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवमिति गणान्विश्वाससंभ्रमान् २० कांश्चिदिति खुरः कवर्गादिः २१ वेगेनकांश्चिदिति वेगेनवेगयुक्तभ्रमणेनवेगोगतेर्भ्रमणंमंडलाकारगतिः२२
निपात्येति भ्रमथागणाः २३ सोपीतिउच्चान् अभ्रंलिहान् २४ वेगेनेति वेगयुक्तंभ्रमणंमंडलाकारागतिः तेनविक्षुण्णाकुट्टिताव्यशीर्यतेतिकर्मक

एवंक्षीयमाणेतुस्वसैन्येमहिषासुरः माहिषेणस्वरूपेणत्रासयामासतान्गणान् २० कांश्चित्तुंडप्रहारेणाक्षुरक्षेपैस्तथापरा
न् लांगूलताडितांश्चान्यान्शृंगाभ्यांचविदारितान् २१ वेगेनकांश्चिदपरान्नादेनभ्रमणेनच निश्वासपवनेनान्यान्पातयामा
सभूतले २२ निपात्यप्रमथानीकमभ्यधावत्सोसुरः सिंहहंतुमहादेव्याःकोपंचक्रेततोंबिका २३ सोपिकोपान्महावीर्यःखुरक्षु
ण्णमहीतलः शृंगाभ्यांपर्वतानुच्चांश्चिक्षेपचननादत्त २४ वेगाद्भ्रमणविक्षुण्णामहीतस्यव्यशीर्यत लांगूलेनाहताश्चाब्धिःप्लाव-
यामाससर्वतः २५ धुतशृंगविभिन्नाश्चखंडंखंडंययुर्घनाः श्वासानिलास्ताःशतशोनिपेतुर्नभसोचलाः २६ इतिकोपंसमाधा
तमापतंतंमहासुरं दृष्ट्वासाचंडिकाकोपंतद्वधायतदाकरोत् २७ साक्षिप्त्वातस्यवैपाशंतंबबंधमहासुरं तत्याजमाहिषरूपंसोपिबद्धो
महाधृधे २८ तैरित्यस्य सर्वतः सार्वविभक्तिकस्तसिः प्लावयामासजलेनेतिशेषः २५ धुतेतिकंपितेत्यर्थः खंडस्यखंडायस्यांक्रियायांश्वासा-
निलेनाकाशंप्रत्यस्ताः क्षिप्ताः अचलाः पुनराकाशात्पेतुरित्यर्थः २६ इतीति कोपाग्निनासंयुक्तं २७ सेति सातस्योपरिपाशंक्षिप्त्वातंबबंधेत्यन्वयः२८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततइति महिषरूपत्यागानंतरं तस्यसिंहीभूतस्यअदृश्यतदेव्येतिशेषः २९ ततइति तंपुरुषंदेवीआश्वेवखड्गचर्मणेतिसमाहारद्वंद्वः तत्सहितंसायकैश्चिच्छेदेत्यन्वयः ३० करेणेति करेणशुंडाग्रेणमहासिंहंदेवीबाहनंकर्षतइत्यस्यसिंहमित्यादिनिरकृंततेतिछांदसम् अत्रगजः सिंहंचकर्षेतिप्रसिद्धेर्विपरीत्यादस्करविनाशकोयमुत्पातः सूचितः ३१ ततइति तथैवप्राग्वदेव ३२ ततइति महिषस्यशिवावतारत्वेनजायमानदयादिविच्छेदायात्रमद्यपानंपानंमद्यं

ततःसिंहोभवत्सद्योयावत्तस्यांबिकाशिरः छिनत्तितावत्पुरुषःखड्गपाणिरदृश्यत ३१ ततएवाशूपुरुषंदेवीचिच्छेदसायकैः तं खड्गचर्मणासाद्धंततःसोभून्महागजः ३० करेणाचमहासिंहंतंचकर्ष जगर्जच कर्षतस्तुकरंदेवीखड्गेननिरकृंतत ३१ ततोमहासुरोभूयोमाहिषंवपुरास्थितः तथैवक्षोभयामासत्रैलोक्यंसचराचरम् ३२ ततःक्रुद्धाजगन्माताचंडिकापानमुत्तम् पपौपुनःपुनश्चैव जहासारुणलोचना ३३ ननर्दचासुरःसोपिबलवीर्यमदोद्धतः विषाणाभ्यांचचिक्षेपचंडिकान्प्रतिभूधरान् ३४ साचतान्प्रहितांस्तेनचूर्णयंतीशरोत्करैः उवाचतंमदोद्धतमुखरागाकुलाक्षरम् ३५

कर्मणिल्यूट् पानादरुणलोचनापुनःपुनर्जहासेत्यन्वयः ३३

ननर्देति बलंशारीरंवीर्यमुत्साहः ताभ्यांमदोगर्वः ३४ साचेति मदेनोद्धत अतिशयेनजातोमुखेरागोयस्याःसाउत्करैः उत्सेपैः आकुलाक्षरमितिवचनंक्रियाविशेषणम् मद्यस्वभावोयम् ३५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देव्युवाच गर्जगर्जेतिसंभ्रमेणाद्विरुक्तिर्मदेनवापिबामीतिपूर्वेपपाविरुक्तिः राजानंप्रतिक्रमइतिनदोषः ३६ ऋषिरुवाच एवमितिसमुत्पत्य कूर्दनंकृत्वांतंमध्याकंठेशूलेनाताडयदित्यन्वयः ३७ ततइति तयापादाक्रांतः दृढंधृतोपिसः ततःशूलताडनोत्तरंततः महिषस्वरूपीयात् निजमुखादर्धनिष्क्रांतः निःसृतार्द्धकायः एवंदेव्यावीर्येणअतिशयेनसंवृतः परिबद्धः निष्क्रमितुंनाशकदित्यर्थः ३८ अर्द्धेति एवंचशिरच्छेदोप

देव्युवाच गर्जगर्जक्षणंमूढयावन्मधुपिबाम्यहं मयात्वयिहतेत्वेवगर्जिष्यंत्याशुदेवताः ३६ ऋषिरुवाच एवमुक्त्वासमुत्पत्यसारूढांतंमहासुरं पादेनाक्रम्यकंठेचशूलेनैनमताडयत् ३७ ततःसोपिपदाक्रांतस्तयानिजमुखात्ततः अर्धनिष्क्रांत एवातिदेव्यावीर्येणसंवृतः ३८ अर्धनिष्क्रांतएवासौयुध्यमानोमहासुरः तयामहासिनादेव्याशिरच्छित्वानिपातितः ३९ ततो हाहाकृतंसर्वदैत्यसैन्यंननाशयत् प्रहर्षंचपरंजग्मुःसकलादेवतागणाः ४० तुष्टुवुस्तांसुरादेवींसहदिव्यैर्महर्षिभिः जगुर्गंधर्वपतयोननृतुश्चाप्सरोगणाः ४१ इतिश्रीमार्कंडेयपुराणेसावर्णदेवीमाहात्म्येमहिषासुरवधस्तृतीयोऽध्यायः ३

यंतंदानवंशूलंपाणिन

मितिशेषः कल्पांतरीयइतिबोध्यम् ३९ ननइति ननाशपलायितंहाहेतिरुतंयेनेतिसैन्यविशेषणं ४० तुष्टुवुरिति सुरादेंद्राद्याः दिव्यैर्ब्रह्मादिभिः सहमहर्षिभिश्चसहतुष्टुवुरित्यर्थः ४१ इतिशिवभट्टरूतसप्तशतीव्याख्याने तृतीयोऽध्यायः ३ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तुष्टुवुः स्तराइत्यक्तंतांस्तुतिमाह ऋषिरुवाच शक्रादयइति तस्मिन्महिषासुरेदेव्यानिहतेसतिइत्यन्वयः शिरोधरग्रीवाभंसःस्कंधःपुलकाःरोमांचाः १ देव्येति आत्मशक्त्यास्वशक्त्याइदंजगत् आततंव्याप्तंततंःस्तुएंच निःशेषदेवगणशक्तीनांसमूहनायतद्धये तच्छक्तिसमूहएवतेजोंशप्रचयएव चमूर्तिर्विग्रहोयस्यास्तयेत्यर्थः समूहइतिभावेकः नताःस्मेत्यत्रवाशरीतिविसर्गस्यसः २ यस्याइति यस्याअतुलंप्रभावंतेजः बलंचशरीरंवक्तुमनंत

ऋषिरुवाच शक्रादयःसुरगणानिहतेतिवीर्येतस्मिन्दुरात्मनिसुरारिबलेचदेव्या तांतुष्टुवुःप्रणतिनम्रशिरोधरांसावाग्भिःप्रहर्ष पुलकोद्गमचारुदेहाः १ देव्याययातततमिदंजगदात्मशक्त्यानिःशेषदेवगणशक्तिसमूहमूर्त्या तामंबिकामखिलदेवमहर्षिपूज्यां भक्त्यानताःस्मविदधातुशुभानिसानः २ यस्याःप्रभावमतुलंभगवाननंतोब्रह्माहरश्चनहिवक्तुमलंबलंच साचंडिकाखिलजगत्परि पालनायनाशायचाशुभभयस्यमतिंकरोतु ३ याश्रीःस्वयंसुकृतिनांभवनेष्वलक्ष्मीःपापात्मनांकृतधियांहृदयेषुबुद्धिः श्रद्धा सतांकुलजनप्रभवस्यलज्जातांत्वांनताःस्मपरिपालयदेविविश्वम् ४ सहस्रास्योपिब्रह्मास्त्वष्टापिहरःसर्वशक्तिरपिनालंनर्वाग्भाः अशुभे भ्योभयस्येत्यर्थः हंहोवासमाहारोवा ३ याश्रीरिति पापात्मनांभवनेष्वलक्ष्मीःकृतधियांनिर्मलांतःकरणानांहृदयेबुद्धिः स्वर्गापवर्गसाधनंज्ञानंसतांह दयेषुश्रद्धा आस्तिक्यबुद्धिः कुलजनप्रभवस्यशुद्धजन्मनोहृदयेषुलज्जाकरणीया प्रवृत्तिलक्षणोंतःकरणवृत्तिविशेषःनताःस्मेतिप्राग्वत् ४ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एषाआपाततःस्तुतिर्वस्तुतस्त्वनिर्वाच्यास्तुत्यैवत्याह किमिति असुरादैत्याः देवाः शिवादयः गणाः प्रमथाः तत्प्रभृतिषु अचिंत्यंसर्वोत्कृष्टत्वादनि-
रूपणीयंतवरूपं अतः किंकेनप्रकारेणवर्णयामचपरंदैत्यंनाशकारिभूरिवीर्यं अतिअत्युत्कृष्टंचपरंयुद्धेषुयानिचरितानि तान्यप्यतिअत्युत्कृष्टानि अतः
किंवर्णयामेत्यन्वयः सर्वत्राचिंत्याइति ५ मूलप्रकृतिस्त्वमेवेत्याह हेतुरिति त्वंसमस्तजगतांहेतुर्मूलंकारणम् तत्रहेतुर्यतः त्रिगुणासत्वरजस्तमोयुता
नन्वेवंरागादिसंबंधेनसर्वकारणंनस्यादतआह अपीति त्रिगुणापिदोषैः रागादिभिर्ज्ञायसेनविषयीक्रियसे यद्वा दोषैर्विशिष्टाकेनापिनज्ञायसेतदभा

किंवर्णयामतवरूपमचिंत्यमेतत्किंचातिवीर्यमसुरक्षयकारिभूरि किंचाहवेषुचरितानितवातियानिसर्वेषुदेव्यसुरदेवगणा
दिकेषु ५ हेतुःसमस्तजगतांत्रिगुणापिदोषैर्नज्ञायसेहरिहरादिभिरप्यपारा सर्वाश्रयाखिलमिदंजगदंशभूतमव्याकृताहिप
रमाप्रकृतिस्त्वमाद्या ६

वादित्यर्थः नन्वेवंपरिच्छिन्नतयासर्वहेतुत्वंनस्यादतआह हरिहरादिभिरप्यपारा अज्ञातपरिच्छेदापरिच्छेदाभा
वादित्यर्थः तत्रहेतुः सर्वाश्रयासर्वमाश्रयंयस्याः साकार्यंहिकारणमाश्रयते सर्वत्रवर्तमानाचयतश्चएवंजगत् तवांशभूतंसर्वसमष्टेर्ब्रह्मणस्त्वंदश-
त्वात् एतद्द्वयंपरिच्छिन्नत्वेव्यावाहतंस्यादितिभावः नन्वेवंविकारोपत्तिरतआह अव्याकृताषड्विधविकाररहितस्त्वात् हियतःसंसारस्याद्याप्रथमाप्रकृतिः
सत्वरजस्तमसांसाम्यावस्थासिकीदृशीपरमापरमात्मामीयते जीवभावेनविच्छिद्यतेयथा परमात्मैवप्रकृतिर्धर्माध्यासात् जीवत्वेनाध्यवसीयते ६ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्या इति हेदेवियस्याः समुदीरणेनउच्चारणेनसमस्तसुरतासकलसुरसमूहः सर्वयज्ञेषुतृप्तिं यातिसास्वाहात्वमेवासिवैप्रसिद्धं तथापितृगणस्यापितृप्ति
हेतुस्त्वमेव अतएवजनैः पितृकर्मणिस्वधाचउच्चार्यतेवास्वाहा ७ प्रकृतिरूपत्वमुक्त्वाब्रह्मापित्वमेवेत्याह येति हेदेवियामुक्तिहेतुः अविचिंत्यमनुष्ठेय
त्वचिंताया अप्यविषयंमहाव्रतं अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहरूपंयोगशास्त्रप्रसिद्धंसाधनंयस्याईदृशीचयासाभगवतीभगवद्विषयापरमाउत्कृष्ट
ष्टाविद्यातद्विषयावरणभंजिका ब्रह्मज्ञानरूपात्वमेवासि हियतः अतस्त्यक्तसमस्तरागादिभिर्मोक्षेच्छुभिः सुष्ठुनियतानिइंद्रियाणियैःवशीकृतें

यस्याःसमस्तसुरतासमुदीरणेनतृप्तिंप्रयातिसकलेषुमखेषुदेवि स्वाहासिवैपितृगणस्यचतृप्तिहेतुरुच्चार्यसेत्वमतएवजनैःस्व
धाच ७ यामुक्तिहेतुरविचिंत्यमहाव्रताचअभ्यस्यसेसुनियतेंद्रियतत्वसारैः मोक्षार्थिभिर्मुनिभिरस्तमस्तदोषैर्विद्यासिसा
भगवतिपरमाहिदेवि ८ शब्दात्मिकासुविमलर्ग्यजुषांनिधानमुद्गीथरम्यपदपाठवतांचसाम्नाम् देवीत्रयीभगवतीभवभावनाय
वार्ताचसर्वजगतांपरमार्तिहंत्री ९

द्रियैः तत्वंब्रह्मैवज्ञेयत्वेनसारोयेषांतैर्मुनिभिरभ्यस्यसेइत्यर्थः अभ्यस्यसेइत्यत्रासंधिः छांदसत्वात् संहिता
याअनित्यत्वात् ८ शब्देति सुविमलानामपौरुषत्वेनदोषरहितानांऋचांयजुषांसाम्नाचनिधानमाश्रयः उद्गीथः उद्गानंसाम्निप्रसिद्धंतेनरम्यःपदानांपाठोयेषा
मितिसाम्नोविशेषणं उद्वाउद्गीथःप्रणवःतत्पक्षेयजुषामरम्यतास्तिशब्दब्रह्मरूपाभवस्यसंसारस्यभावनायप्रवृत्त्यविच्छेदाययादेवीद्योतनशीलात्रयीवेदत्रयीसा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वंभगवती भवंतितेभवाः प्राणिनस्तेषांभवायजीवनायवार्ताकृषिवाणिज्यपशुपालत्वम् ९ तदधिष्ठात्र्यपित्वमेवेत्याह मेधासीति मेधासरस्वतीसैवदुः
खप्राप्यत्वेनदुर्गासीत्युच्यते दुर्गमसंसारसागरस्यनौः ज्ञानद्वाराएवंपूर्वार्द्धेनब्राह्मीत्वंचोक्तं प्रसिद्धनौतोव्यतिरेकमाह असंगेति साहिकर्णधारादिसंगव
ती शंभौकृताप्रतिष्ठा आस्पदंयया अर्द्धशरीरत्वात् उत्तरार्द्धेनरौद्रीत्वंवैष्णवीत्वंचोक्तं १० ईषदिति ईषत्हाससहितंछांदसः पदव्यत्ययः पूर्वार्धोक्त

मेधासिदेविविदिताखिलशास्त्रसारादुर्गासिदुर्गभवसागरनौरसंगा श्रीःकैटभारिहृदयैककृताधिवासागौरीत्वमेवशशिमौलिकृत
प्रतिष्ठा १० ईषत्सहासममलंपरिपूर्णचंद्रबिंबानुकारिकनकोत्तमकांतिकांताम् अत्यद्भुतंप्रहृतमात्तरुषातथापिवक्त्रंविलोक्यसह
सामहिषासुरेण ११ दृष्ट्वातुदेविकुपितंभ्रुकुटीकरालमुद्यच्छशांकसदृशच्छवियन्नसद्यः प्राणान्मुमोचमहिषस्तदतीवचित्रंकैर्जी
व्यतेहिकुपितांतकदर्शनेन १२

गुणविशिष्टंतववक्त्रंविलोक्यापि आत्तरोषेणप्राप्तरोषेणमहिषासुरेणसहसादर्शनसमकालमेव तथातिनिष्ठुरंयत्
प्रहृतंनदत्याश्चर्यमित्यर्थः जगन्मोहकमपिदृष्ट्वानतस्यमोहइत्यतिसुभटोयम् तादृशस्यापिवधेनदेव्याएवोत्कर्षःसिद्ध्यति ११ दृष्ट्वात्विति दृष्ट्वापीत्यर्थः
भ्रुवोःकुटीवक्रतातयाकरालंभीषणं उद्यच्छशांकेत्यनेनातिरक्तता अनेनमहिषस्यापिधीरत्वंदेव्युत्कर्षः प्राग्वदैवकैर्जीव्यतेनकेनापीत्यर्थः १२ देवीति
देविप्रसीदेत्युक्त्वाविचार्यव्यर्थमेतद्वचः प्रसन्नत्वादेवतवेत्याह भवतीपपरासानुग्रहामाबुद्धिर्यस्यास्तादृशी कथमेतत्ज्ञातंतत्राह यतोनोभवायकोप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यतीसतीत्वंनोरिपुणांकुलानिसद्योविनाशायसि तत्रसंप्रतिपत्तिमाह विज्ञातमित्यादि एवंचकोपोप्ययंरक्षणफलकोनतुस्वांशायिकइतिसत्वगुणप्रधान
त्वंदर्शितं १३ तेइतिसमताः महाजनांगिकृताः धर्मश्चदितोवर्गः धर्मार्थकाममोक्षरूपः धन्याः पुण्यवत्त्वेनप्रसिद्धाः निभृताः नितरांपोषिताः अभ्युदयदा
सर्वमनोरथदा १४ धर्म्याणीति हेदेविभवतिप्रसादात् यः सुकृतीप्राग्जन्मार्जितपुण्यवान् सः ततएवसुकृतलब्धत्वत्प्रसादादेव अत्यादृतः नित्यनैमि-

देविप्रसीदपरमाभवतीभवायसद्योविनाशयसिकोपवतीकुलानि विज्ञातमेतदधुनैवयदस्तमेतन्नीतंबलंसुविपुलंमहिषासुरस्य
१३ तेसंमताजनपदेषु धनानितेषांतेषांयशांसिनचसीदतिधर्मवर्गः धन्यास्तएवनिभृतात्मजभृत्यदारायेषांसदाभ्युदयदाभवतीप्रसन्ना
१४ धर्म्याणिदेविसकलानिसदैवकर्माण्यत्यादृतःप्रतिदिनंसुकृतीकरोति स्वर्गंप्रयातिचततोभवतीप्रसादाल्लोकत्रयेपिफलदाननुदे
वितेन १५ दुर्गेस्मृताहरसिभीतिमशेषजंतोः स्वस्थैःस्मृतामतिमतीवशुभांददासि दारिद्र्यदुःखभयहारिणिकात्वदन्यासर्वोप
कारकरणायसदार्द्रचित्ता १६

त्तिकादावतिश्रद्धावान्प्रतिदिनंसदैवषष्टिघटिकावच्छेदेनसकलानिधर्म्याणिकर्माणिकरोतिपुनस्त्वत्तएवत्त
त्प्रीत्युद्देशेनकृतकर्मण्योलब्धत्वत्प्रसादादेवस्वर्गंप्रयातितदनंतरंक्रमेणवामोक्षंचननुनिश्चयेतेनत्वंलोकत्रयेपिफलदाइतिशेषः १५ दुर्गेइति दुर्गेदुर्गमेसंकटे
इतियावत् तन्नामइतिचदारिद्र्यशब्देभावेघञ्भयंप्रतिकूलप्रतिसंधानजं आर्द्रचित्तास्निग्धचित्तादरिद्रस्यकर्मदारिद्र्यंदुःखाद्भयंहरतीतिसंबुद्धिः १६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वोपकारित्वमुपपादयति एभिरिति दैत्यैरित्यर्थः उपैतीतिलट् उपैत्वित्यर्थः एतेदैत्याः नामेत्यभ्युपगमनेनरकायेतितादर्थ्येचतुर्थी तथापिरणेमृत्युं प्राप्यस्वर्गंगच्छंतुइतिहेतुत्रयंमनसिकृत्वाजगदहितान् हंसीत्यर्थः १७ दृष्ट्वैवेति दर्शनोत्तरमेतावन्मात्रेणैवभस्मकरणयोगेषुयत्त्वंशस्त्रंपातयसि तत्तेषामुत्तमलोकप्राप्तयेइतितेष्वपिउपकारिकैवत्वमिति किंवक्तव्यंभक्तेष्विति भावः १८ खड्गेति निकरःसमूहः विस्फुरणंसर्वत्रप्रसरणंनिवहःसमूहः

एभिर्हतैर्जगदुपैतिसुखंतथैतेकुर्वंतुनामनरकायचिरायपापं संग्राममृत्युमधिगम्यदिवंप्रयांतुनत्वेतिनूनमहितान्विनिहंसिदेवि १७ दृष्ट्वैवकिंनभवतीप्रकरोतिभस्मसर्वासुरानरिषुयत्प्रहिणोषिशस्त्रं लोकान्प्रयांतुरिपवोपिहिशस्त्रपूताइत्थंमतिर्भवतितेष्वहितेषुसाध्वी १८ खड्गप्रभानिकरविस्फुरणैस्तथोग्रैःशूलाग्रकांतिनिवहेनदृशोसुराणां यन्नागताविलयमंशुमदिंदुखंडयोग्याननंतवविलोकयतांतदेतत् १९ दुर्वृत्तवृत्तशमनंतवदेविशीलंरूपंतथैतदविचिंत्यमतुल्यमन्यैः वीर्यंचहंतृहृतदेविपराक्रमाणांवैरिष्वपिप्रकटितैवदयात्वयेत्थम् २०

यद्विलयंनाशंनागतास्तदेतत् अंशुमद्यदिंदुखंडंतद्यागितद्युक्तं आननंतवविलोकयतांचैषामाश्रयादितिशेषः १९ दुर्वृत्तेति दुर्वृत्तानांवृत्तंपापंतस्यशमनंतवशीलंस्वाभाविकोगुणः तथान्यैरतुल्यमतएवाविचिंत्यंकीदृशमितिचिंताविषयं दृष्ट्वैवकिन्नेत्यादिनोक्तंरूपंरूपमाकृतिः चपरंहृताआत्मसात्कृताः देवायेनईदृशः पराक्रमोयेषांतेषांदैत्यानांहंतृवीर्यंएवंचेदृशरूपेणेदृशबलेनतेषांशस्त्रतोहननमितितदीयपापशांतयेइतितेषुदयैवत्वयाकृतेतिभावः २०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

केनेति अतिहारिमनोहरंविरोधोत्रालंकारः केनोपमेतितृतीयार्थत्वात् चित्तेकृपारिपुष्वनुपकारत्वात् निष्ठुरतानुत्पत्तेरेव अत्रकृपास्वाभाविकीनिष्ठुरतात्वारोपितेतिविरोधपरिहारइतिबोध्यम् २१ त्रैलोक्यमिति त्वयेत्यंतमेकान्वयः ततोरिपुगणाइत्यंतंअपरंवाक्यं भयमित्यतोभवमित्यंतमपरं अनेनचित्तेकृपेत्येतद्दृष्टं नमस्तइत्यनेननमस्कारातिरिक्तंप्रत्युपकारकरणेनास्माकंसामर्थ्यमितिध्वनितम् २२ शूलेनेति पाहीत्यः शत्रुभ्यइतिशेषः

केनोपमाभवतुतेत्यपराक्रमस्यरूपंचशत्रुभयकार्यतिहारिकुत्र चित्तेकृपासमरनिष्ठुरताचदृश्यात्वय्येवदेविवरदेभुवनत्रयेपि २१ त्रैलोक्यमेतदखिलंरिपुनाशनेनत्रातंत्वयासमरमूर्धनितेपिहत्वा नीतादिवंरिपुगणाभयमप्यपास्तमस्माकमुन्मदसुरारिभवन्नमस्ते २२ शूलेनपाहिनोदेविपाहिखड्गेनचांबिके धनुषास्वनेननःपाहिचापज्यानिःस्वनेनच २३ प्राच्यांरक्षप्रतीच्यांचचंडिकेरक्षदक्षिणे भ्रामणेनात्मशूलस्योत्तरस्यांतथेश्वरि २४ सौम्यानियानिरूपाणित्रैलोक्यंविचरंतितै यानिचात्यर्थघोराणितैरक्षास्मांस्तथाभुवं २५ खड्गशूलगदादीनियानिचास्त्राणितेंबिके करपल्लवसंगीनितैरस्मान्रक्षसर्वतः २६

२३ प्राच्यामिति दक्षिणेइत्यस्यदिग्भागेइतिशेषः चाद्दिग्ग्रहणंहेईश्वरीआत्मशूलस्यभ्रामणेनपरिवर्तनेनभ्रामणेनेत्यत्रहस्वाभावः संज्ञापूर्वकविधेरनित्यत्वात् २४ सौम्यानीति सृष्टिस्थितिव्यापाराणि अत्यर्थघोराणिसंहारव्यापाराणितैरस्मान्रक्षतथातैरेवभुवंपृथिवींचेत्यर्थः २५ खड्गेतिसंगःसंसर्गः २६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋषिरुवाच एवमिति नंदनंदेवोद्यानंदिव्यैः उत्कृष्टैः गंधाः श्रीनागादयः अनुलेपनंश्रीचंदनादि २७ भक्त्येति अंतःकरणेनप्रेमतयाभजनंसेवनंभक्तिः तयाप्रेमलक्षणयाभक्त्या दिव्यैर्मनोज्ञैः धूपैस्त्विति पाठः २८ देव्युवाच ब्रियतामिति देवाऊचुः भगवत्येति नकिंचिदप्यवशिष्टं २९ यदितिय तइत्यर्थः पूर्वान्वय्यर्द्धम् उत्तरार्द्धमुत्तरान्वयि यदिवापीति वाशब्दएवमर्थेयद्येवंसत्यपिवरोदेयइतिवेच्छातदावक्षमाणमस्त्वित्यर्थः अस्माकमस्म

ऋषिरुवाच एवंस्तुतासुरैर्दिव्यैःकुसुमैर्नंदनोद्भवैः अर्चिताजगतांधात्रीतथागंधानुलेपनैः २७ भक्त्यासमस्तैस्त्रिदशैर्दिव्यैर्धूपैःसुधूपिता प्राहप्रसादसुमुखीसमस्तान्प्रणतान्सुरान् २८ देव्युवाच ब्रियतांत्रिदशाःसर्वेयदस्मत्तोभिवाञ्छितं देवा ऊचुः भगवत्याकृतंसर्वंनकिंचिदवशिष्यते २९ यदयंनिहतःशत्रुरस्माकंमहिषासुरः यदिवापिवरोदेयस्त्वयास्माकंमहेश्वरि ३० संस्मृतासंस्मृतात्वंनोहिंसेथाःपरमापदः यश्चमर्त्यस्तवैरेभिस्त्वांस्तोष्यत्यमलानने ३१ तस्यवित्तर्द्धिविभवैर्धनदारादिसंपदाम् वृद्धयेस्मत्प्रसन्नात्वंभवेथाःसर्वदाबिके ३२

प्यमित्यर्थः ३० संस्मृतेति परमापदः हिंसेथाइत्यार्षः यद्वापरमाआपत् येभ्यस्तान्शत्रूनित्यर्थः उत्तरार्द्धमुत्तरान्वयि ३१ तस्येति वित्तर्द्धिविभवैरीति सहयोगेतृतीयाभवनेचसाहित्यंवित्तंज्ञानंतस्यवृद्धिरुपचयः विभवाऐश्वर्यादयः धनदारादीनांसंपदअनुरूपाआत्मभावाः आदिनापुत्रादिवृद्धयेउपचयाय ३२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋषिरुवाच इतीति तथात्मनः आत्मनश्चार्थेइत्यर्थः तथेत्यक्त्वातथास्त्वित्यक्त्वा भद्रंकालयतिवर्धयतितिभद्रकाली अंतर्हिताऽदृश्याबभूवेत्य न्वयः ३३ इतीतिस्पष्टं ३४ पुनश्चेति गौरीदेहः कारणंयस्याइत्यर्थः समुद्भवः प्रादुर्भावः यथातत्रहेतुदुष्टवधोदेवलोकरक्षणंवा ३५ ननुतेनाप्य स्याः कोर्थःस्तदाहउपकारिणीति उपकारित्वभावायइत्यर्थः नच्छृणुष्वेत्यार्षस्तद्वः तत्प्रकारंमयामत्तः निपातोयम्ख्यातंलोकप्रसिद्धं एतामुपक म्यलक्ष्मीतंत्रेलक्ष्मीवाक्यं अभिष्टुतास्करैः साहंमहिषंजघ्नुषीषणात् महिषांतकरीसूक्तं दृष्टंदेवैर्महर्षिभिः उत्पत्तिंयुद्धविक्रांतिंस्तोत्रंचेतिसुरेश्वर

ऋषिरुवाच इतिप्रसादितादेवैर्जगतोर्थेतथात्मनः तथेत्यक्त्वाभद्रकालीबभूवांतर्हितानृप ३३ इत्येतत्कथितंभूपसंभूतासा यथापुरा देवीदेवशरीरेभ्योजगत्त्रयहितैषिणी ३४ पुनश्चगौरीदेहात्सासमुद्भूतायथाभवत् वधायदुष्टदैत्यानांतथाशुंभ निशुंभयोः ३५ रक्षणायचलोकानांदेवानांतुपकारिणी तच्छृणुष्वमयाख्यातंयथावत्कथयामिते ३६ इतिश्रीमार्कंडेयपु राणेसावर्णशक्रादिकृतदेव्यास्तुतिर्नामचतुर्थोऽध्यायः ४

कथयंतिस्मबिस्तीर्णेब्राह्मणावेदपारगाः लभंतेचफलंशश्वदाधिपत्यमनश्वर म् इतिमहिषांतकरीसूक्तं देवैर्महर्षिभिश्चदृष्टम् देव्याययाततमितिश्लोकेखिलदेवमहर्षिपूज्यत्वविशेषणात् युष्माभिस्तुतयोयाश्चेतिश्लोकेम हर्षीणांस्तुतिकर्तृत्वप्रतिपादनाच्चेतिबोध्यम् ३६ इतिशिवभट्टसुतसतिगर्भजनागोजीभट्टकृतेसप्तशतीव्याख्यानेचतुर्थोध्यायः ४

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

यथावत्कथयामीतिप्रतिज्ञातमितिहासमाह ऋषिरुवाच पुरेतिकश्यपात्दत्वासुतत्रौनमुच्विज्येष्ठोशंभनिशुंभाविमौसतालज्यौचेतिवामनपु
शणोलक्ष्मीतंत्रेपि तामसेत्वंतरेशक्रमहाविद्यांविधायसा गौरीदेहात्समुद्भूताकौशिकीतितदात्यहम् वधायदुष्टदैत्यानांतथाशंभनिशंभयोः मदीयाः
शक्तयोयास्तादेवश्रेष्ठशरीरजाः तास्तास्तद्रूपधारिण्यःसाहाय्यंविदधुमम ताभिर्निहत्यदैत्येंद्रान्हतव्योमेयथातथा संहृत्यात्मनिताःसर्वामदीयाविपुषो
रिलाः अहंनिजघ्नुषीपश्चाद्दैत्यौशंभनिशंभकाविति नारायणीस्तुतिर्नामसूक्तंपरमशोभनम् पुरंदरतदादृष्टंदेवैरग्निपुरोगमैः एषासंपूजिताभक्त्यासर्वसत्वम

ऋषिरुवाच पुराशंभनिशंभाभ्यामसुराभ्यांशचीपतेः त्रैलोक्यंयज्ञभागाश्चहृतामदबलाश्रयात् १ तावेवसूर्यतांतद्वदधिकारंतथैं
दवम् कौबेरमथयाम्यंचचक्रातेवरुणस्यच २ यच्छति कौशिकीसर्वदेवेशसर्वकाममदात्यहम् उत्पत्तिर्मुद्भविष्कांतिःस्तुतिश्चेतिपुरातनैः पठ्यतेम्नि
तयंविप्रैर्वेदवेदांगपारगैः एतासांपरमामोक्षाकूटस्थासामहीयसी महालक्ष्मीर्महाभागामकृतिःपरमेश्वरी अमुष्याःस्तुतयेदृष्टंब्रह्माद्यैः सकलैःसुरैः नमोदेव्या
दिकंदेविसूक्तंसर्वफलप्रदम् इमांदेवींस्तुवंभित्यंस्तोत्रेणानेनमामीह कुशाननीत्यसकलानैश्वर्यंमहदश्नुतइति यज्जत्वावैश्यसुरथौपरांसिद्धिमवापतुरिति
अग्निमुखदेवगणदृष्टस्तोत्रंनारायणीसूक्तं तत्रनारायणिनमोस्तुतइतिबहुधाभ्यासात् नमोदेव्यैइत्यादिकंदेवीसूक्तंदेवीपदेनापक्रमादितिबोध्यं मदोगर्वः
बलंशक्तिः १ तावेवेति सुवतिकर्मणिलोकंप्रेरयतीतिसूर्यस्तत्स्वभावः सर्वलोककर्मप्रेरकतातद्वदैंदवमधिकारंतथाकौबेरंवरुणस्याधिकारमित्यन्वयः २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ताविति पवनःऋध्यतेनेनेतिकरणेक्तिन्तेनतदधिकारमित्यर्थः हृतेति आत्मसात्कृताइत्यर्थः अधिकास्त्रिरावृतादशत्रिदशाः अधिकावृत्तरूपांतभावेनै
कार्थाभावः तेनत्रयस्त्रिंशददित्यर्थः तेचार्काद्वादशरुद्राएकादशवसवोष्टौविश्वेदेवौद्वाविति एकएवत्रिशब्दस्तंत्रेणोभयार्थः निराकृताः स्वर्गादपिनिराकृ
ताः निसारिताः संस्मरंतिस्मृतवंतः वर्तमानसामीप्येभूतेलट् ३ ४ तत्रैवहेतुमाहतयेतिस्मृतासती अखिलाः परमापदइत्यन्वयः ५ इतीति भवा-
न्याअभिव्यक्तिस्थानत्वाद्धिमवद्गमनं तत्रहिमवतीशुंभनिशुंभदमन्याः सरस्वतित्वेपियथाविष्णुमायात्वंयथोक्तमुपक्रमे ६ द्योतितांसार्वात्म्येनस्तु

तावेवपवनर्द्धिंचचक्रतुर्वन्हिकर्मच ततोदेवाविनिर्धूताभ्रष्टराज्याःपराजिताः ३ हृताधिकारास्त्रिदशास्ताभ्यांसर्वेनिराकृताः
महासुराभ्यांतांदेवींसंस्मरंत्यपराजिताम् ४ तयास्माकंवरोदत्तोयथापत्सुस्मृताखिलाः भवतांनाशयिष्यामितत्क्षणात्परमाप
दः ५ इतिकृत्वामतिंदेवाहिमवंतंनगेश्वरम् जग्मुस्तत्रततोदेवींविष्णुमायांप्रतुष्टुवुः ६ देवाऊचुः नमोदेव्यैमहादेव्यैशिवायैसततं
नमः नमःप्रकृत्यैभद्रायैनियताःप्रणताःस्मृतां ७ रौद्रायैनमोनित्यायैगौर्यैधात्र्यैनमोनमः ज्योत्स्नायैचेंदुरूपिण्यैसुखायैसततंनमः ८

तिमाहदेवाऊचुः नमइतिदेवीत्युत्पादिनीमहादेवीमहतांब्रह्मादीनामपिस्वर्गादिव्यवहारप्रवर्तयित्री शिवाकल्याणरूपातद्धेतुत्वात् प्रकृत्यैसृष्टिशक्त्यैभद्रारक्षण
शक्तिः नियताःसमाहितचित्ताःप्रणताःस्मस्मेतिपादपूरणे ७ रौद्रायैइतिसंहारशक्त्यैनित्याकालानवच्छिन्नानित्याख्याशक्तिरूपाचगौरीति तद्वर्णाधात्री-
जगदाधाराज्यौत्स्नाचंद्रकिरणाइंदुमंद्रइदमुपलक्षणंज्योतीरूपस्यसुखापरमानंदरूपा ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कल्याणीतत्कर्त्रीशर्वाणिशिवशक्तिः नमः कूर्मः ९ दुर्गायै इतिदुरवज्ञेयायै दुर्गोदूरधिगमः परिच्छेदोयस्यास्तस्यैदुर्गात्संसारात्पारंकरोतीतिच सारोब
लंतद्वत्यै सर्वकारिण्यैसर्वजननैस्वंतंत्रायै प्रकृतिपुरुषयोर्भेदज्ञानंख्यातिस्तद्रुपायैप्रसिद्ध्यैच कृष्णातद्वर्णाकृष्णशक्तिश्च धूम्रातद्वर्णा १० अतीति
विद्यात्वेनसंसारशामकत्वादतिसौम्या अविद्यारूपेणसंसारहेतुत्वादतिरौद्रा नमोनमः इत्येतदुक्तिपूर्वकंनताः नम्राइत्यर्थः जगत्प्रतिष्ठा जगदुपादानकार

कल्याणैप्रणतांवृद्ध्यैसिद्ध्यैकुर्मोनमोनमः नैर्ऋत्यैभूभृतांलक्ष्म्यैशर्वाण्यैतेनमोनमः ९ दुर्गायैदुर्गपारायैसारायैसर्वकारिण्यै ख्या
त्यैतथैवकृष्णायैधूम्रायैसततंनमः १० अतिसौम्यातिरौद्रायैनतास्तस्यैनमोनमः नमोजगत्प्रतिष्ठायैदेव्यैकृत्यैनमोनमः १२ यादे
वीसर्वभूतेषुबुद्धिरूपेणसंस्थिता नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः १२ यादेवीसर्वभूतेषुचेतनेत्यभिधीयते नमस्तस्यैन
मस्तस्यैनमस्तस्यैनमोनमः १३ यादेवीसर्वभूतेषुबुद्धिरूपेणसंस्थिता नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः १४ णं देव्यैदेवशक्त्यै

कृत्तिःक्रियाः ११ येति विष्णुमायामूलविद्येतिशब्दिताःसर्वागमेषुप्रतिपादिताः नमस्तस्यैइतित्रिकेनकायिकवाचिकमानसिकरूपंनमस्कारत्रयंद-
र्शितं भक्तिश्रद्धातिशयद्योतनायवा नपौनरुक्त्यंतदुक्तं प्रहर्षहर्षशोकेषुस्वप्नदैन्यभयेषुच स्तुत्याभ्यासानुदेवासुपौनरुक्त्यंनदुष्यतीति एवमग्रेपि
१२ येतिचेतनानिर्विकल्पायाचिच्छक्तिरित्युच्यते १३ बुद्धिःसविकल्पज्ञानंतेनबुद्धिरेवचेतनेतिनपौनरुक्त्यं १४ छ छ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निद्रासुषुप्त्यवस्थास्वप्नावस्थावा १५ क्षुधाभोज्यवज्जिहीर्षा १६ छतिश्छिनतिसंतापमिति छायासंसारतापाभावः वर्णसादृश्यंच १७ शक्तिःकार्यजननसामर्थ्यं १८ तृष्णाअनात्मीयस्वीकारेच्छा १९ क्षांतिः सत्यपिसामर्थ्येऽपकाराचिकीर्षा २० जातिः गोत्रादिः २१ लज्जास्वकार्यविषयान्यथाज्ञान

यादेवीसर्वभूतेषुनिद्रारूपेणसंस्थिता नमस्तस्यै० १५ यादेवीसर्वभूतेषुक्षुधारूपेणसंस्थिता नमस्तस्यै० १६ यादेवीसर्वभूतेषुछा यारूपेणसंस्थिता नमस्तस्यै० १७ यादेवीसर्वभूतेषुशक्तिरूपेण० नमस्तस्यै० १८ यादेवी० तृष्णारूपेण० नमस्तस्यै० १९ यादेवी० क्षांतिरूपेणसंस्थिता नमस्तस्यै० २० यादेवी० जातिरूपेण० नमस्तस्यै० २१ यादेवी० लज्जारूपेणस० नमस्तस्यै० २२ यादेवी० शांति रू० नमस्तस्यै० २३ यादेवी० श्रद्धारूपेण० नमस्तस्यै० २४ यादेवी० कांतिरूपेण० नमस्तस्यै० २५ यादेवी० लक्ष्मीरूपेण० नमस्तस्यै० २६ यादेवी० वृत्तिरूपेण० नमस्तस्यै २७ यादेवी० स्मृतिरूपेण० नमस्तस्यै० २८ यादेवी० दयारूपेण० नमस्तस्यै० २९ यादेवी० तुष्टि रूपेण० नमस्तस्यै ३० यादेवी० मातृरूपेण० नमस्तस्यै० ३१ यादेवी० भ्रांतिरूपेण० नमस्तस्यै० ३२

भीः ३२ येतिशांतिरिंद्रियसंयमः

विषयोपरतिरूपः २३ श्रद्धाश्रुत्याद्युक्तर्थेआस्तिकत्वं २४ कांतिः शोभा २५ लक्ष्मीर्धनादिसंपत् २६ वृत्तिर्जीविकांवृत्तिश्च २७ स्मृतिरनुभूतविषय

ज्ञानं २७ दयापरदुःखप्रहारेच्छा २९ तुष्टिरधिगताधिकानभिलाषः ३० मातापालयित्रीमातृकाधिष्ठात्रीदेवताच ३१ भ्रांतिस्तद्भूतितत्प्रत्ययः ३२ छ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University, Ramtek Collection

इंद्रियेति यास्तिलेषुभूतेषु अंतर्यामिविद्ययास्थिताइंद्रियाणांज्ञानकारणानांज्ञानविषयाणांस्थूलसूक्ष्मानांअधिष्ठात्रीभवर्त्तिकाच तस्यैव्यास्यैदै-
व्यैव्याग्निकायेइत्यर्थः ३३ चितिःचिच्छक्तिः ३४ अत्रायंसंग्रहः विष्णुमायाचेतनाचबुद्धिर्निद्राक्षुधातथा छायाशक्तिश्चतृष्णाचक्षांतिर्जातितःपर
म् लज्जाशांतिस्ततःश्रद्धाकांतिर्लक्ष्मीस्ततःपरम् वृत्तिःस्मृतिर्दयाचैवतुष्टिर्मातातःपरम् भ्रांतिर्व्याप्तिश्चितिश्चैवत्रयोविंशतिसंख्यकाः इतोधिकम

इंद्रियाणामधिष्ठात्रीभूतानामखिलेषुया भूतेषुसततंतस्यैव्यास्यैदेव्यैनमोनमः ३३ चितिरूपेणयाकृत्स्नमेतद्व्याप्यस्थिताज
गत् नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः ३४ स्तुताःसुरैःपूर्वमभीष्टसंश्रयात्तथासुरेंद्रेणदिनेषुसेविता करोतुसानःशुभहेतु
रीश्वरीशुभानिभद्राण्यभिहंतुचापदः ३५ यासांप्रतंचोद्धतदैत्यतापितैरस्माभिरीशाचसुरैर्नमस्यते याचस्मृतातत्क्षणमेवहं-
तिनःसर्वापदोभक्तिविनम्रमूर्तिभिः ३६ नार्षस्यात्तंत्रेकात्यायनेस्फुटम् नवार्णपीठपूजाविधावेताएवत्रयोविंशतिस्तवकथनंव्याप्तिचि
त्योः त्यागश्चतदयुक्तम् कात्यायनीतंत्राविरोधात् स्तुतेतियाशुभहेतुरीश्वरीसुरैर्ब्रह्मादिभिःपूर्वंस्तुतातथाइंद्रेणचमहिषवधेसत्यभीष्टसंश्रयात् दिनेषुस
तिदिनंसेवितासानः शुभानिभद्राणिअतिशयितशुभानिकरोतु आपदश्चहंतित्यन्वयः अभीष्टसंश्रयाइतिप्रथमांतपाठेअभीष्टःवांछितः संश्रयोर्थोयस्याःस
काशात्तं साअभीष्टसंश्रयेतिदेवीविशेषणमितिशांतनव्यां ३५ येतिसांप्रतंचयाईशास्वामिनीसुरैरस्माभिः उद्धतदैत्यपीडितैः नमस्यतेस्तूयतेचकरोतुसा
नइत्येनान्वयः ३६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋषिरुवाच एवमिति तत्रदेवसन्निहितेहेराजन् पार्वतीजान्हव्यास्तोयेस्नातुमिवस्वीयस्तवादियुक्तानांदेवानामभिसंमुखंययावित्यर्थः ३७ तथापिते
षामसानंदृष्ट्वाकास्तूयतइतिपृच्छति सेतिकामदन्यास्तूयते यन्मांनाभिभाषभमदन्यायाअभावादितिभावः ततोप्यज्ञानमेवदृष्ट्वातेषांदयय स्वयमेवा
ब्रवीत् अस्याइत्थक्तिः राजानंप्रतिऋषेः शरीरकूपात्कोशतोगृहात्समुद्भूतासत्वप्रधानांशेनमादुर्भूताऽतएवशिवाअब्रवीदित्यर्थः ३८ किंनब्रवीत्तदा
ह स्तोत्रमिति समेतैः मीलितैः रणेनिशुंभेनपराजितैः अतएवशंभेननिराकृतैः स्वर्गादितिशेषः ३९ शरीरेति यत्निर्गतात्तत्कौशिकीतिगीयतेइ

ऋषिरुवाच एवंस्तवादियुक्तानांदेवानांतत्रपार्वती स्नातुमभ्याययौतोयेजान्हव्यानृपनंदन ३७ साब्रवीत्तान्सुरान्रुभ्रूर्भवद्भिः
स्तूयतेत्रका शरीरकोशतश्चास्याः समुद्भूताब्रवीच्छिवा ३८ स्तोत्रंममैतल्लिख्यतेशुंभदैत्यनिराकृतैः देवैःसमेतैःसमरेनिशुंभे
नपराजितैः ३९ शरीरकोशाद्यत्तस्याःपार्वत्यानिसृतांबिका कौशिकीतिसमस्तेषुततोलोकेषुगीयते ४०

त्यन्वयः कौशिकीतिपृषोदरादित्वात्साधु तालव्यमिदम् ४० तस्यामिति कृष्णसहोदरीत्वात्तमः प्रधानशिवशक्तित्वाच्च कृष्णवर्णत्वंसरस्वत्याः
प्रादुर्भूतत्वाच्च शिवशक्तेस्तत्तएवपुनः सरस्वत्यानिर्गमउक्तइतिबोध्यम् आश्रयः स्थानं तदुक्तंवैकृतिरहस्येगौरीदेहात्समुद्भूतायासत्त्वैकगुणाश्र-
या साक्षात्सरस्वतीप्रोक्ताशंभासुरनिबर्हिणी दधौचाष्टभुजाबाणमुसलेशूलचक्रभृत् शंखंघंटांलांगलंचकार्मुकंवसुधाधीप एषासंपूजिताभ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्यासर्वज्ञत्वंप्रयच्छति शिवपुराणसंहितायां दैत्यौशुंभनिशुंभास्त्यौभ्रातरौसंबभूवतुरिति यांचितंतपसाताभ्यांब्रह्मणःपरमेष्ठिनः अवध्यत्वंज
गत्यस्मिन्पुरुषैरस्त्रिलेरपि अयोनिजातुयाकन्यारूपंगकोशसमुद्भवा अजातपुंस्पर्शरतिरविलंबपराक्रमा तस्यावध्यावुभौसंख्येतस्यांकामाभिभूत
ये इतिचाभ्यर्थितोब्रह्माताभ्यांप्राहतथास्त्विति ततस्ताभ्यांजगद्गुते तयोर्जयायदेवेशंब्रह्माप्रार्थितवान्शिवम् विनिंद्यापिरहस्यांबांक्रोध
यित्वायथातथा तद्गौर्णकोशजांशक्तिमकामांकन्यकात्मिकाम् निशुंभशुंभयोर्हन्त्रींदेवेभ्योदातुमर्हसि एवमभ्यर्थितोधात्राभगवान्नीललो

तस्यांविनिर्गतायांतुकृष्णाभूत्सापिपार्वती कालिकेतिसमाख्याताहिमाचलकृताश्रया ४१ ततोंबिकांपररूपंबिभ्राणासुमनोहरं ददर्शचंडोमुंडश्चेभृत्यौशुंभनिशुंभयोः ४२

हितः कालीस्याहरहत्यंबामित्यक्तेक्रुद्धांतांदृष्ट्वाक्रीडार्थंकालीत्यक्तमि
तिशिवस्योक्तेः भूयसीचतवप्रीतिरगौरमिनिमेवपुः क्रीडोक्तिरपिकालीतिघटतेकथमन्यथेतिदेवीवचनमुपन्यस्यकथंचिद्देवीदेवाज्ञयादेवीगौत-
माश्रमंप्राप्यनपश्चरित्वारजोगुणाधिक्यात् ब्रह्मगुणोगौररूपंप्राप्यनीलकोशमुत्सृष्टवतीततः कोशाद्विनिष्क्रान्ताकौशिकीत्यक्तम् तत्कोशंसहसोत्सृ
ज्यगौरीसासमजायत सातुमायात्मिकाशक्तियोगनिद्राहरेःस्मृतेति ततःप्रत्यागतयादेव्यादेव्यंप्रतिकौशिकीमहिमाकथितः किंदेवेननसादृश्या
यासृष्टाकौशिकीमया तादृशीकन्यकालोकेनभूतानभविष्यति अजातपुंस्पर्शरतिरधृस्याचातिसुंदरीति ४१ ततोंबिकामितिपरमुत्कृष्टं ४२ छ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ताभ्यामिति शंभायेतिक्रियायोगेचतुर्थी कापिअनिर्वाच्या ४३ नैवेति असौदेवीकापिअनिर्वाच्या अतोज्ञायताम् मनुष्यद्वारातत्स्वरूपंविचार्य तांगृह्यतांचअंगीक्रियतांच ४४ ननुकिमर्थमंगीकारस्तस्याइत्यतआह स्त्रीरत्नमिति उत्तमस्त्रीत्यर्थः भवान्तांद्रष्टुमर्हतिसातवदर्शनयोग्याऽऽ तोंगीक्रियतामितिभावः तुहेतौ ४५ ननुयदिसारत्नभूताकथमस्माकंस्यादतआह यानीति यानिगजाश्वादिनिरत्नानिस्वजातिश्रेष्ठानितुहेतौ

नाभ्यांशंभायचाख्यातासातीवसुमनोहरा काप्यास्तेस्त्रीमहारत्नमासूयंतिहिमाचलम् ४३ नैवंताद्दक्कचिद्रूपंदृष्टंकेनचिदुत्तमम् ज्ञायतांकाप्यसौदेवीगृह्यतांचासुरेश्वर ४४ स्त्रीरत्नमतिचार्वंगीद्योतयंतीदिशस्त्विषा सातुतिष्ठतिदैत्येंद्रतांप्रवान्द्रष्टुमर्हति ४५ यानिरत्नानिमणयोगजाश्वादीनिवैप्रभो त्रैलोक्येतुसमस्तानिसांप्रतंभांतितेगृहे ४६ ऐरावतःसमानीतोगजरत्नंपुरंदरात् पारिजाततरुश्चायंतथैवोच्चैःश्रवाहयः ४७ विमानहंससंयुक्तमेतत्तिष्ठतितेगृणे रत्नभूतमिहानीतंयदासीद्वेधसोद्भुतम् ४८ एवंचसमस्तानिसमस्तरत्नानियतस्तवगृहे अतइयमपितवप्रविष्यत्येवेतिभावः ४६ तदेवविवृणोति ऐरावतइति इरावतीसुरासमुद्रेजातः ऐरावतः पारिणः पारावतोब्धेर्जातः पारिजातः उच्चैःश्रवसीयस्यसउच्चश्रवाः ४७ विमानमिति वेधसोयरम्यदस्यापियद्विमानमानीतंतदद्भुतम् एवंचांडांतवर्तिसकलाज्जयत्संसूचितं आनीतंबलान्नतुदत्तंस्वदत्तवरत्वाच्चतेनोपेक्षित इतिहृदयम् ४८

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

निधिरिति किंजल्किनीतन्नामिकांददावित्यस्यभयादितिशेषः ४९ छत्रमिति कांचनस्त्राविस्वर्णवर्षणशीलंप्रजापतेर्दक्षस्यभयंरिपूणामजेयः ५० मृत्योरिति उत्क्रांतिर्मरणंपरिग्रहेपरिजनेकरणव्युत्पत्याहस्तेवा ५१ निशुंभस्येति अब्धिजातारत्नजातयश्चनिशुंभस्यपरिग्रहेइत्यर्थः अग्निशौचे अग्निरेवनैर्मल्यकरणंययोरित्यर्थः कल्पवृक्षोपकल्पितंअग्निदेवत्यं अग्निप्रक्षेपान्निर्मलंवासोयुग्मं अग्निशौचास्व्यमाहुः ५२ एवमिति तेइतिकर्तुः

निधिरेषमहापद्मःसमानीतोधनेश्वरात् किंजल्किनींददौचाब्धिर्मालामम्लानपंकजाम् ४९ छत्रंतेवारुणंगेहेकांचनस्त्रावि तिष्ठति तथायस्यंदनवरोयःपुरासीत्प्रजापतेः ५० मृत्योरुत्क्रांतिदानाम्नशक्तिरीशत्वयाहृता पाशःसलिलराजस्यभ्रातुस्त वपरिग्रहे ५१ निशुंभश्चाब्धिजाताश्चसमस्तारत्नजायतः वन्हिश्चापिददौतुभ्यमग्निशौचेचवाससी ५२ एवंदैत्येंद्ररत्नानिसमस्ता न्यादृतानिते स्त्रीरत्नमेषाकल्याणित्वयाकस्मान्नगृह्यते ५३ ऋषिरुवाच निशम्येतिवचःशुंभःसतदाचंडमुंडयोः प्रेषयामा-ससुग्रीवंदूतंदेव्यामहासुर ५४ इतिचेतिचवक्तव्यासागत्यावचनान्मम यथाचाभ्येतिसंप्रीत्यातथाकार्यंत्वयालघु ५५

शेषत्वविवक्षायांषष्ठी ५३ ऋषिरुवाच निशम्येति सुग्रीवंतन्नामानंदूतम् ५४ इतिचेतितीतिइदंचेत्यर्थः वक्ष्माणस्यपरामर्शः अनेनशुंभनि शुंभयोरजोगुणमयत्वंसूचयिति अतएवतद्बुधार्थंसत्वगुणप्रधानोवतारइतिबोध्यम् लघुशीघ्रम् ५५ ७ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सइति सः दूतः ततः शंभात्सकाशात् यत्रशैलोद्देशेसादेवी आस्ते तत्रगत्वा श्लक्ष्णमनुत्कटंमधुरयाकोमलयागिराप्राहेत्यन्वयः २६ दूतउवाचं देवी ति नकेवलंदैत्येश्वरएव किंतुत्रैलोक्यस्यपरमेश्वरइत्यर्थः सकाशंसमीपं ५७ तदेवोपपादयति अव्याहतेति देवयोनिषुदेवतासुदेवाश्चतेजगद्योन यश्चेत्यर्थात् ५८ तदुक्तिमाह ममेति यज्ञांशान्उपभुंजे ५९ अशेषतः अशेषाणिहृतमित्यन्वयि ६० क्षीरोदेति तदश्वरत्नंहृत्वाइंद्रात्बलात्का

सतत्रगत्वायत्रास्तेशैलोद्देशेतिशोभने सादेवीतांततःप्राहश्लक्ष्णंमधुरयागिरा ५६ दूतउवाच देविदैत्येश्वरःशुंभस्त्रैलो क्येपरमेश्वरः दूतोहंप्रेषितस्तेनत्वत्सकाशमिहागतः ५७ अव्याहताज्ञःसर्वासुयःसदादेवयोनिषु निर्जिताखिलदैत्यारिस यदाहशृणुष्वतत् ५८ ममत्रैलोक्यमखिलंममदेवावशानुगाः यज्ञभागानहंसर्वानुपाश्नामिपृथक्पृथक् ५९ त्रैलोक्यवरर त्नानिसमवश्यान्यशेषतः तथैवगजरत्नंचहृत्वादेवेंद्रवाहनम् ६० क्षीरोदमथनोद्भूतमश्वरत्नममामरैः उच्चैश्रवससंज्ञंतत्प्रणि पत्यसमर्पितम् ६१ यानिचान्यानिदेवेषुगंधर्वेषूरगेषुच रत्नभूतानिभूतानितानिमय्येवशोभने ६२ स्त्रीरत्नभूतांत्वांदेविलोके मन्यामहेवयम् सात्वमस्मानुपागच्छयतोरत्नभुजोवयम् ६३

रेणगृहीत्वाअमरैः प्रणिपत्यसमर्पितमित्यर्थः उच्चैःश्रवसेत्यत्रापिअ जितियोगविभागादच्समासांतः ६१ यानिचेति रत्नभूतानिभूतानिरत्नरूपाणिस्थितानीत्यर्थः ६२ स्त्रीति वयामित्यात्मगौरवार्थंबहुवचनम् ६३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मांवेति उरुविक्रमंमहाविक्रमम् वैप्रसिद्धौ ६४ परमेति प्राप्यसइतिछांदसस्तङ् मत्परिग्रहात्मदाश्रयात्समालोच्यविचार्यमत्परिग्रहतांम
त्वत्नीत्वं ६५ ऋषिरुवाच इत्थंकेति अंतःस्मितत्वेनसावहेलनमुत्तरंसूचितम् ६६ देव्युवाच सत्यमिति अत्रशुंभविषयेत्रैलोक्याधिपतिरि

मांवाममानुजंवापिनिशुंभमुरुविक्रमम् भजत्वंचंचलापांगीरत्नभूतासिवैयतः ६४ परमैश्वर्यमतुलंप्राप्स्यसेमत्परिग्र-
हान् एतद्ध्यासमालोच्यमत्परिग्रहतांव्रज ६५ ऋषिरुवाच इत्युक्तासातदादेविगंभीरांतःस्मिताजगौ दुर्गांभगवतीभ
द्राययेदंधार्यतेजगत् ६६ देव्युवाच सत्यमुक्तंत्वयानात्रमिथ्याकिंचित्त्वयोदितम् त्रैलोक्याधिपतिःशुंभोनिशुंभश्चा-
पितादृशः ६७ किंत्वत्रयत्प्रतिज्ञातंमिथ्यातत्क्रियतेकथं श्रूयतामल्पबुद्धित्वात्प्रतिज्ञायाकृतापुरा ६८ योमांजयतिसंग्रा
मेयोमेदर्पव्यपोहति योमेप्रतिबलोलोकेसमेभर्तास्यविष्यति ६९ तदागच्छतुशुंभोत्रनिशुंभोवामहासुरः मांजित्वाकिं
चिरेणात्रपाणिंगृह्णातुमेलघु ७० तिसमत्वम् ६७ किंत्विति अत्रपरिग्रहत्वविषयेअल्पबुद्धित्वादितिसंभवायप्रतिज्ञाहानौचमहान्दोषः पापं-
चपुरुषपरिग्रहे ६८ प्रतिज्ञातमाह योमामिति जयतिसंग्रामातिरिक्तेनापिप्रकारेणसंग्रामेयोमेदर्पबलत्वाभिमानंव्यपोहति यश्चमेप्रतिबलःसमान
बलः पूर्वपूर्वाभावेउत्तरः तादृशश्चतत्तत्र एवेतिगूढआशयः ६९ तदिति पाणिग्रहणात्पूर्वंममगमनमनुचितमितिभावः ७० ६५ ६५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दूतउवाच अवलिप्तेति अवलेपोगर्वः एवंभागुक्तंयद्येपुमान् अपिनतिष्ठेत् तदग्रेस्त्रीनतिष्ठेदेवेतिभावः ७१ नन्वहंदेवीत्यतः स्थास्यामित्यतआह अन्येषामपीतिद्वाभ्याम् एकिकेतिकुत्सायामसकृत् ७२ ७३ उपसंहरति सात्वमिति मयैवेत्यनेनागमनेन्येषांसर्वेषांदुष्टतयागौरवंनतिष्ठेदित्यर्थः तदेवविपक्षेबाधकमाह केशाकर्षणेननिर्द्धूतंखंडितंगौरवंयस्यास्तादृशीमागमिष्यसि अङ्कितमानजोर्थः सकाकुश्च ७४ देव्युवाच एवमेतदिति

दूतउवाच अवलिप्तासिमैवंत्वंदेविब्रूहिममाग्रतः त्रैलोक्येकःपुमांस्तिष्ठेदग्रेशुंभनिशुंभयोः ७१ अन्येषामपिदैत्यानांस र्वेदेवानवैयुधि तिष्ठंतिसंमुखेदेविकिंपुनःस्त्रीत्वमेकिका ७२ इंद्राद्याःसकलादेवास्तस्थुर्येषांनसंयुगे शुंभादीनांकथंतेषां स्त्रीप्रयास्यसिसंमुखं ७३ सात्वंगच्छमयैवोक्तापार्श्वंशुंभनिशुंभयोः केशाकर्षणानिर्द्धूतगौरवामागमिष्यसि ७४ देव्युवाच एवमेतद्बलीशुंभोनिशुंभश्चातिवीर्यवान् किंकरोमिप्रतिज्ञामेयदनालोचितापुरा ७५ सत्वंगच्छमयैवोक्तंयदेतत्सर्वमा दृतः तदाचक्ष्वासुरेंद्रायसचयुक्तंकरोतुयत् ७६ इतिश्रीमार्कंडेयपुराणेसावर्णदेवीमाहात्म्येदेवीदूतसंवादेपंचमोऽध्यायः५

सोपहासंयत् यत्प्रतिज्ञेत्यस्यकृतेतिशेषः ७५ सत्यमिति मयायदेतदुक्तंतत्सर्वमादृतः सन्तस्मैआचक्ष्वसः युक्तंतत्करोतुचेत्यन्वयः आदृतइ- त्यनेनान्यूनातिरिक्तंवदेतिसूच्यते ७६ इतिशिवभट्टसुतसतीगर्भजनागोजीभट्टकृतेसप्तशतीव्याख्यानेपंचमोऽध्यायः५ ध ७

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋषिरुवाच इतीति अमर्षः कोपः समाचष्टउक्तवान् विस्तरात्शुंभपंचनात् १ तस्येति दैत्यानामधिपंसेनापतिम् २ हेइति दुष्टंदुर्वचनामधि
धृष्टामाकुलां ३ अमरोदेवः मरइतिवाछेदः मरोमर्त्यः ४ ऋषिरुवाच तेनेति सहस्राणामसुराणांषष्ट्यावृतइत्यन्वयः ५ सदृक्षेति तुहिनंहिमम्
मूलंसमीपं ६ विपक्षेबाधकमाह नचेदिति ततः तर्हिएषःपुरोदृश्यमानोहं ७ देव्युवाच दैत्येश्वरेणेति एवंकेशाकर्षणविह्वलाम् बलंसामर्थ्यंअ

ऋषिरुवाच इत्याकर्ण्यवचोदेव्याःसदूतोऽमर्षपूरितः समाचष्टसमागम्यदैत्यराजायविस्तरात् १ तस्यदूतस्यतद्वाक्यमाक
र्ण्यासुरराट्ततः सक्रोधःप्राहदैत्यानामधिपंधूम्रलोचनम् २ हेधूम्रलोचनाशुत्वंस्वसैन्यपरिवारितः तामानयबलाद्दुष्टांकेशाक
र्षणविह्वलां ३ तत्परित्राणदःकश्चिद्यदिवोत्तिष्ठतेपरः सहृतव्योमरोवापियक्षोगंधर्वएववा ४ ऋषिरुवाच तेनाज्ञप्तस्ततःशीघ्रंसदै-
त्योधूम्रलोचनः वृतःषष्ट्यासहस्राणामसुराणाद्रुतंययौ ५ सदृस्वातांततोदेवींतुहिमाचलसंस्थितां जगादोच्चैःप्रयाहीतिमूलशुं
भनिशुंभयोः ६ नचेत्प्रीत्याद्यभवतीमद्यतारसुपैष्यति ततोबलान्नयाम्येषकेशाकर्षणविह्वलां ७ देव्युवाच दैत्येश्वरेणप्रहितो
बलवान्बलसंवृतः बलान्नयसिमामेवंततःकिंतेकरोम्यहं ८ ऋषिरुवाच इत्युक्तःसोभ्यधावत्तामसुरोधूम्रलोचनः हुंकारेणैवतं
भस्मंसाचकारांबिकाततः ९ अथक्रुद्धंमहासैन्यमसुराणांतथांबिका ववर्षसायकैस्तीक्ष्णैतथाशक्तिपरश्वधैः १०

वशतांच सावष्टंभोक्तिरेषा ८ ऋषिरुवाच इतीति तंसाभस्मचकारेत्यन्वयः ९ अथेति अंबिकाकर्त्री अतएवतथास्वारस्यम् १० ७ ८ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निर्नायकसैन्येदेव्याः पयासोव्यर्थइतिमत्वासिंहोयुद्धेतनइति तत्रहेतुगर्भविशेषणम्स्ववाहनइति अर्थाच्चादित्वात्पुंस्त्वंस्त्रीयवाहनइत्यर्थः पाणा तमाविशत् ११ कांश्चिदितिससिंहः आक्रांतिराक्रमणंतेनच अधरेणअधरकायेनाधरोष्ठेनच अन्यान्महासुरान् जघानेत्यन्वयः १२ केषामिति

ततोधुतसटःकोपात्कृत्वानादंसुभैरवम् पपातासुरसेनायांसिंहोदेव्याःस्ववाहनः ११ कांश्चित्करमहारेणदैत्यानास्येनचापरान् आक्रम्यचाधरेणान्याञ्जघानसमहासुरान् १२ केषांचित्पाटयामासनखैःकोष्ठानिकेसरी तथापाणिप्रहारेणशिरांसिकृतवान्पृथक् १३ विच्छिन्नबाहुशिरसःकृतास्तेनतथापरे पपौचरुधिरंकोष्ठादन्येषांधुतकेसरः १४ क्षणेनतद्बलंसर्वंक्षयंनीतं महात्मना तेनकेसरिणादेव्यावाहनेनातिकोपिना १५ श्रुत्वातमसुरंदेव्यानिहतंधूम्रलोचनं बलंचक्षयितंकृत्स्नंदेवीकेसरिणातताः १६ चुकोपदैत्याधिपतिःशुंभःप्रस्फुरिताधरः आज्ञापयामासचतौचंडमुंडौमहासुरौ १७ हेचंडहेमुंडबलैर्बहुभिरिहारितौ तत्रगच्छतगत्वाचसासमानीयतांलघु १८

कोष्ठानि उदरमध्यानिततोविस्तृतांगुलिःपाणिः १३ १४ १५ श्रुत्वेति क्षयितमिति क्षयशब्दादाख्यातसंज्ञंतात्क्तः कृतक्षयमिति १६ तौपूर्वोक्तौ १७ हेचंडेति बहुलैर्बहुभिरित्यर्थः गच्छतगच्छतं छंदोनुरोधाद्द्विर्वचनलोपः लघुशीघ्रम् १८

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

आनयनेप्रकारद्वयमाह केशेष्विति आकर्षणमात्रादनागमनेबंधनं वइतिगौरवाद्बहुवचनं तृतीयासहयुधियुद्धेप्रसक्तेयदितथानयनेसंदेहस्तदासर्वैर्दैत्यैः सकलायुधैः साविशेषेणनिहन्यतांमार्यतामित्यर्थः १९ उपसंहरति आगम्यतामित्यंतेनसर्वथागृहीतुमशक्याचेदेवंहंतव्यानान्यथेत्याह बध्वेति अथेतिपक्षांतरे यदिशक्यतेतर्हिबध्वातांगृहीत्वैवागंतव्यमित्यर्थः २० इतिशिवभट्टसुतसतीनागोजीभट्टकृतेसप्तव्याख्यानेषष्ठोऽध्यायः ६ ऋषिरुवाच आज्ञप्तास्तइति

केशेष्वाकृष्यबध्वावायदिवःसंशयोयुधि तदाशेषायुधैःसर्वैरसुरैर्विनिहन्यताम् १९ तस्यांहतायांदुष्टायांसिंहेचविनिपातिते शीघ्रमागम्यतांबध्वागृहीत्वातामथांबिकाम् २० इतिश्रीमार्कंडेयपुराणे माहात्म्येधूम्रलोचनवधोनामषष्ठोऽध्यायः ६ ऋषिरु० आज्ञप्तास्तेततोदैत्याश्चंडमुंडपुरोगमाः चतुरंगबलोपेताययुरभ्युद्यतायुधाः १ ददृशुस्ततोदेवीमीषद्धासांव्यवस्थिताम् सिंहस्योपरिशैलेंद्रशृंगेमहतिकांचने २ तेदृष्ट्वातांसमादातुमुद्यमंचक्रुरुद्यताः आकृष्टचापासिधरास्तथान्यतत्समीपगाः ३ ततःकोपंचकारोच्चैरंबिकातानरीन्प्रति कोपेनचास्यावदनंमषीवर्णमभूत्तदा ४

१ शैलेंद्रशृंगेहिमाचलशृंगे सिंहस्योपरिस्थितामित्यन्वयः २ तेइतिचंडादयः शंभप्रधानाःसमादातुंगृहीतुंउद्यमंउद्योगंउद्यताः उन्मादवंतः आकृष्टंआकर्णांतकृष्टंचापंयैस्तेकोशोद्धृतासयश्चयतत्समीपगाः गृहीतुमुद्यतानारक्षणार्थंसमीपगाइत्यर्थः ३ अनेनचंडादीनामतितामसत्वंसूचितं अतस्तद्धार्थेतामसीप्रादुर्भावमाहततइति मषीलिप्तिसाधनंद्रव्यंतद्वत्श्यामवर्णंनिःसरमाणकालीप्रतिबिंबादिति भावः ४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भ्रुकुटीति तस्याः कुपितदेव्याः विनिष्क्रांतानिःसृता ५ विचित्रेति खड्गांगपट्टिकाकंकालपंजरस्थंवा नरमालेत्यत्रनरशब्दस्तन्मुंडलक्षणिकः द्वीपीव्याघ्रः शुष्कमांसानिर्मांसदेहाअतएवातिभैरवा ६ अतीति अतिशयितोविस्तारोयस्यतादृशंवदनंयस्याइत्यर्थः ललनंचालनंनिमग्नानिनिम्नप्रविष्टानि आरक्तानिनयनानियस्यास्त्रीनेत्रत्वात् ७ ८ पार्ष्णीति पार्ष्णिग्राह्योग्रजपार्ष्णिरक्षकः अंकुशग्राहीमहामात्रः योधोगजारूढोवीरः ९ तथैवेति

भ्रुकुटीकुटिलात्तस्यालल्लाटफलकाद्भुतं कालीकरालवदनाविनिष्क्रांतासिपाशिनी ५ विचित्रखड्गांगधरानरमालाविभूषणा द्वीपिचर्मपरिधानाशुष्कमांसातिभैरवा ६ अतिविस्तारवदनाजिह्मालल्लनभीषणा निमग्नारक्तनयनानादापूरितदिङ्मुखा ७ सावेगेनाभिपतिताघातयंतिमहासुरान् सैन्येतत्रसुरारीणामभक्षयततद्बलम् ८ पार्ष्णिग्राहांकुशग्राहीयोधघंटासमन्वितान् समादायैकहस्तेनमुखेनिक्षेपवारणान् ९ तथैवयोधंतुरगैरथंसारथिनासह निक्षिप्यक्लेदशनैश्चर्वयंत्यतिभैरवं १० एकंजघ्राहकेशेषु ग्रीवायामथचापरं पादेनाक्रम्यचैवान्यसुरसान्यमपोथयत् ११ तैर्मुक्तानिचशस्त्राणिमहास्त्राणितथासुरैः मुखेनजग्राहरुषाद शनैर्मथितान्यपि १२

योधमिति जातावेकवचनं एवंरथमपरमन्यमित्यादानाम् चवर्यंतीति वर्तमानसामीप्येभूतेलट् अतिभैरवमितिक्रियाविशेषणम् १० एकमिति अपोथयत् अवधीत् ११ तैरपि मथितान्यपिमथितानिचकारेत्यन्वयः १२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बलिनामिति महात्मनांमहादेहानाम् १३ १४ १५ शरवर्षैरिति चंडःशरवर्षैर्मुंडः सहस्रशः क्षिप्तैश्चक्रैः छादयामासइत्यन्वयः एवंपूर्वश्लोकेचं
ड्यग्रहणंमुंडस्याप्युपलक्षणं १६ तानीतिमुखंविशमानानिच धनोदरंविशमानान्यर्कबिंबानीवबभुः शानच् छांदसः १७ तत इति भीममितिक्रि-

बलिनांतद्बलंसर्वमसुराणांमहात्मनां ममर्दाभक्षयच्चान्यानन्यांश्चात्ताडयत्तथा १३ असिनानिहताःकेचित्केचित्खड्गांगताडिताः
जग्मुर्विनाशमसुरादंताग्राभिहतास्तथा १४ क्षणेनतद्बलंसर्वमसुराणांनिपातितं दृष्ट्वाचंडोभिदुद्रावतांकालीमतिभीषणाम् १५
शरवर्षैर्महाभीमैर्भीमाक्षीणांमहासुरः छादयामासचक्रैश्चमुंडस्तिग्मैःसहस्रशः १६ तानिचक्राण्यनेकानिविशमानानितन्मुखं
बभुर्यथार्कबिंबानिसुबहूनिघनोदरम् १७ ततोजहासातिरुषाभीमंभैरवनादिनी कालीकरालवल्कांतदुर्दर्शद्शनोज्ज्वला १८
उत्थायचमहासिंहंदेवीचंडमधावत गृहीत्वाचास्यकेशेषुशिरस्तेनासिनाछिनत् १९ अथमुंडोभ्यधावत्तांदृष्ट्वाचंडंनिपातितम्
तमप्यपातयद्भूमौसाखड्गाभिहतंरुषा २०

याविशेषणम् वल्कांतेवल्कमध्येविकटदंतत्वाद् दुर्दर्शाः येदशनाः तेषांतेजसाउज्ज्वलातेजोम-
या १८ उत्थायचेति महासिंहंमहाखड्गं उत्थायउत्थाप्य सकोपवारणंयथास्यात्तथा हमित्युक्त्वादेवीचंडमधावत अस्यचंडस्यतेनोद्यतेनभासिना १९
अथेति स्वड्गाभिहतपूर्वोद्यतखड्गाद्यभिहतंअस्यशिरोनच्छिन्नंखड्गप्रहारमात्रम् २०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हतशेषमितिस्पष्टम् सैन्यं कर्तृ ततःयुद्धभूमितः भयेनातुरं विह्वलसत् दिशोभेजेअपलायत २१ शिरइति मुंडंसशिरस्कंसदेहमित्यर्थः प्रचंडाट्टहासे
नमिश्रंयुक्तंयथाभवतितथाचंडिकांयल्ललाटफलकानिर्गतांतांदेवींप्राहेत्यर्थः २२ मयेति अत्रयुद्धयज्ञेमहापशूइतिरूपकंउपहृतौउपहारीकृतौप्र-
धानांगद्वारेणचंडस्योपहारः २३ ऋषिरुवाच ताविति तालींललाटभवांकल्याणीति कर्तृविशेषणं चंडिकाकौशिकी २४ यस्मादितिचंडशिरो-

हतशेषंततःसैन्यंदृष्ट्वाचंडंनिपातितम् मुंडंचसुमहावीर्यंदिशोभेजेभयातुरम् २१ शिरश्चंडस्यकालीचगृहीत्वामुंडमेवच प्रा
हप्रचंडाट्टहासमिश्रमभ्येत्यचंडिकाम् २२ मयातवात्रोपहृतौचंडमुंडौमहापशू युद्धयज्ञेस्वयंशुंभंनिशुंभंचहनिष्यसि २३
ऋषिरुवाच तावानीतौततोदृष्ट्वाचंडमुंडौमहासुरौ उवाचकालींकल्याणींललितंचंडिकावचः २४ यस्माच्चंडंचमुंडंचगृहीत्वा
त्वमुपागता चामुंडेतिततोलोकेख्यातादेविभविष्यसि २५ इतिश्रीमार्कंडेयपुराणेसा० माहात्म्येचंडमुंडवधोनामसप्तमोऽ
ध्यायः ७ ऋषिरुवाच चंडेचनिहतेदैत्येमुंडेचविनिपातिते बहुलेषुचसैन्येषुक्षयितेष्वसुरेश्वरः १

द्वारा हेदेविख्याता भविष्यसी
त्यन्वयः चामुंडेति पृषोदरादित्वात्साधुः अनेनेयंतामसीकौशिकीजन्याकालीकौशिकीनियम्याभवतीत्याहुः २५ इति शिवभट्टसुतसतीगर्भज
नागोजीभट्टकृतेसप्तशतीव्याख्यानेसप्तमोऽध्यायः ७ छ ऋषिरुवाच चंडइति क्षयितेसुकृतक्षयेषु १ छ छ

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततइति तेषांवधजकोपेनास्वाधीनचेताःअनएवरुग्वधेप्यस्यप्रवृत्तिरितिभावः सर्वसैन्यानामितिदैत्यानांविशेषणम् २ अद्येति उद्यायुधास्तत्संज्ञकाश्च कंबूनांतन्नाम्नांचतुराशीतिर्दैत्याइतिशेषः ३ कोटीति कोटिवीर्याणितन्नामानि धौम्राःधूम्रवंश्याः ४ कालकाः तन्नामानःदौर्ह्रदाः दुर्ह्रदोपत्यानिमौर्याः तन्नामानः तथाकालकायाअपत्यानिकालकेयाः असुराःसंज्ञाःससामग्रीकाः ५ इतीति भैरवमुग्रं ६ आयातमिति आगतमित्यर्थः अतरंमध्यं ७ ततइति

ततःकोपपराधीनचेताःशुंभःप्रतापवान् उद्योगंसर्वसैन्यानादैत्यानामादिदेशह २ अद्यसर्वबलैर्दैत्याःषडशीतिरुदायुधाः कंबूनां-चतुराशीतिर्निर्यातुस्वबलैर्वृताः ३ कोटिवीर्याणिपंचाशदसुराणांकुलानिवै शतंकुलानिधौम्राणांनिर्गच्छंतुममाज्ञया ४ का लकादौर्ह्रदामौर्याःकालकेयास्तथासुराः युद्धायसज्जानिर्यांतुचाज्ञयात्वरितामम ५ इत्याज्ञाप्यासुरपतिःशुंभोभैरवशासनः निर्जगाममहासैन्यःसहस्रैर्बहुभिर्वृतः ६ आयांतंचंडिकादृष्ट्वातत्सैन्यमतिभीषणम् ज्यास्वनैःपूरयामासधरणीगगनांतरं ७ ततः सिंहोमहानादमतीवकृतवान्नृप घंटास्वनेनतन्नादानंबिकाचोपबृंहयत् ८ धनुर्ज्यासिंहघंटानांनादापूरितदिङ्मुखा निनादैर्भीषणैःकालीजिग्येविस्तारितानना ९

तन्नादानिति बहुवचनंमहानादमित्येकत्वविवक्षया अतीवेत्यस्यानेकवारमित्यर्थेवा उपबृंहयदित्यत्रागमशास्त्र स्यानित्यत्वात् अडभावः ८ धनुरिति निनादैःस्वीयैरापूरितदिङ्मुखाकालीधनुर्ज्यासिंहघंटानांभीषणैर्नादैर्जिग्येजितादेव्याधनुरादिशब्दैःकालीशब्दोजितइतिभा वः ९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदिति कालीचंडीललाटजासरोषैः सक्रोधैः १० एतस्मिन्निति देवीदानवसंपातावसरेभवायसंपदे ११ ब्रह्मेति विष्णुशब्देनवराहनृसिंहावपिशा
क्तयः स्वातिरेकिण्योदेवताः शक्तिशक्तिमतोस्तादात्म्यात् १२ ब्राह्म्यादिरूपैरित्यर्थकंतद्रूपैरितिव्याचष्टे यस्येति तद्वत्तथाविदरूपभूषणवाहनेत्य

तन्निनादमुपश्रुत्यदैत्यसैन्यैश्चतुर्दिशम् देवीसिंहस्तथाकाल्यासरोषैःपरिवारिताः १० एतस्मिन्नंतरेभूपविनाशायसुरद्विषाम् भवायामरसिंहानामतिवीर्यबलान्विताः ११ ब्रह्मेशगुहविष्णूनांतथैवेंद्रस्यशक्तयः शरीरेभ्योविनिष्क्रम्यतद्रूपैश्चंडिकांययुः १२ यस्यदेवस्ययद्रूपंयथाभूषणवाहनम् तद्वदेवहितच्छक्तिरसुरान्योद्धुमाययौ १३ हंसयुक्तविमानाग्रेसाक्षसूत्रकमंडलुः आयाताब्रह्मणःशक्तिर्ब्रह्माणीसाभिधीयते १४ माहेश्वरीवृषारूढात्रिशूलवरधारिणी महाहिवलयाप्राप्तचंद्ररेखाविभूषणा १५ कौमारीशक्तिहस्तात्चमयूरवरवाहना योद्धुमभ्याययौदैत्यानंबिकागुहरूपिणी १६

र्थः १३ हंसेति विमानाग्रेइत्यस्यस्थितेतिशेषः अक्षसूत्रंजपमालाब्रह्माणीब्रह्माणमानयतिचेष्टयतीतिव्युत्पत्त्यायंशब्दःसाधुः १४ माहेश्वरीति महाऽहितक्षकानंतौबलयौयस्याः चंद्ररेखाचंद्रकलासेवविभूषणंयस्याः १५ कौमारीति गुहरूपिणी गुहसमानाकाराः कुमारसंबंधिनी शक्तिरायया-
वित्यर्थान्नपौनरुक्त्यम् ऐंद्रीत्यत्रापियथाशक्रस्तथैवसेतिवत् अंबिकापदेनगुहस्यशिवव्यूहत्वंसूचयति १६ ७ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तथैवेति अत्रशार्ङ्गपदेनबाणोप्युपलक्ष्यते बाहुभिर्गरुडारूढाशंखचक्रगदासिनी शार्ङ्गबाणधराजतावैष्णवीरूपश्चलिनीतिवामनपुराणात् एतेनास्याःषड्भुजात्वंसूचितम् १७ यज्ञेति यज्ञांगकल्पितंवराहाकारं बिभ्रतोहरेरित्यनेनास्याःविष्णुत्वमेवेतिसूचितम् एवंनृसिंहोपितथैवकालीपुराणे शरभवराहयुद्धेविष्णोः शरभपक्षपातित्ंवराहबलहारकत्वमुक्तम् नृसिंहस्यचवराहानुयायित्वमुक्तंविरुध्यतइतिवाच्यम् तस्यलीलामात्रत्वात् १८

तथैववैष्णवीशक्तिर्गरुडोपरिसंस्थिता शंखचक्रगदाशार्ङ्गखड्गहस्तात्युपाययौ १७ यज्ञवाराहमतुलंरूपंयाबिभ्रतोहरेः शक्तिःसाप्याययौतत्रवाराहींबिभ्रतीतनुम् १८ नारसिंहीनृसिंहस्यबिभ्रतीसदृशंवपुः प्रासातत्रसटाक्षेपक्षिप्तनक्षत्रसंहतिः १९ वज्रहस्तातथैवैंद्रीगजराजोपरिस्थिता प्राप्तासहस्रनयनायथाशक्रस्तथैवसा २० ततःपरिवृतस्ताभिरीशानोदेवशक्तिभिः हंन्यंतामसुराःशीघ्रंममप्रीत्याहचंडिकाम् २१

१९ वज्रेति यथाशक्रइत्याकारपरम् एवंचसर्वासुतत्तदाकारतादृष्ट्व्यागजराजऐरावतः २० अतिथिशिष्टतेजसः कौशिक्याः सविधिनियंतुमशक्तास्तादेवशक्तीरीशानोदेव्यैर्दर्शितवानित्याह ततइति ताभिःपरिवृतः ईशानःममप्रीत्या एताभिर्देवशक्तिभिः सहासुराहन्यंतामितिचंडिकामाहेत्यन्वयः स्वशक्तेः पार्वत्याः प्रादुर्भूतत्वेनधृष्टतयाईशानएवतथोक्तवानितिभावः अंडाधिकारिणइमेब्रह्मादयः अंडांतराधिकारिणांशंभादिजितत्वेनधृष्टत्वासंभवात् २१ ७ ७ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वस्यापिसहायप्रदर्शनेनैष धृष्टाभगवतीतस्योत्तरमाह किंतुकाचित्तच्छक्तिरित्याह ततइति अतीभीषणादर्शनमात्राद्भयंकरी अत्युग्ररौद्रत्वमा
शिवानांशृगालीनांशतेननिनादिनी शतशब्दोऽनंतवाचीनिनददनंतशिवावृता २२ साचेति धूम्रजटिलंधूम्रवर्णजटावंतं अपराजितातदाख्याम
परैरजिताचदूतभावंगतावहत्वंगच्छशुंभनिशुंभयोः पार्श्वेचगच्छेत्यन्वयः आहेति निपातः कालमात्रेतेनाब्रवीदित्यर्थः त्रिमूर्त्यंतशिवापेक्षयाऽ

ततोदेवीशरीरात्तुविनिष्क्रांतातिभीषणा चंडिकाशक्तिरत्युग्राशिवाशतनिनादिनी २२ साचाहधूम्रजटिलमीशानमपरा-
जिता दूतत्वंगच्छभगवन्पार्श्वेशुंभनिशुंभयोः २३ ब्रूहिशुंभंनिशुंभंचदानवावातिगर्वितौ येचान्येदानवास्तत्रयुद्धायसमुपस्थिता:२४ त्रैलोक्यमिंद्रोलभतांदेवाःसंतुहविर्भुजः यूयंप्रयातपातालंयदिजीवितुमिच्छथ २५ बलावलेपादथचेद्भवंतोयुद्धकांक्षिणः तदागच्छततृप्यंतुमच्छिवाःपिशितेनवः २६ यतोनियुक्तोदौत्येनतयादेव्याःशिवःस्वयम् शिवदूतीतिलोकेस्मिंस्ततः साख्यातिमागता २७

स्याः कौशिक्यास्तत्प्रादुर्भावसमकक्षतया आधिक्येनतस्यदूत्येनतत्प्रेषणमनुचितम् २३ ब्रूहीति येचतत्रशुंभानिकेऽन्येदा
नवास्तांश्चब्रूहीत्यन्वयः युद्धायसमुपस्थिताः युद्धंकर्तुम् २४ वचनमाह त्रैलोक्यमितिस्पष्टम् २५ बलेति अवलेपोगर्वः मच्छिवाः यामयासहनिनदंत्यः मादु-
भूताः पिशितमांसम् २६ यतइति दूतमेवदौत्यम् प्रज्ञाद्यण् शिवदूतीगौरादित्वात्ङीप् अर्षोगपूर्वपदादितिवा २७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेपीति अमर्षेणसर्वतः पूरिताः यतः यंदेशमाक्रम्यकात्यायनीस्थितातंदेशंजग्मुरित्यन्वयः मूलशक्त्यभेदेनास्या अपिकात्यायनीत्वोक्तिः २८ ततइति प्रथममादौअग्रेसंमुखेववर्षुरितिगुणः छांदसःउद्धतःप्रकटः अनेननस्त्रीप्रथमतोहंतुमयोग्येतिविवेकराहित्येनरौद्राविष्टत्वंसूचितं २९ मोर्वीटंकारेणशक्ति तंधनुस्तस्मान्मुक्तैः ३० तस्येति तस्याअग्रतइतिछेदः छांदसंसंधिः तयाचंडिवत् तदादेव्याशस्त्रच्छेदः खड्गांगंकालपंजरं पदिकावाकालीललादजा

तेपिश्रुत्वावचोदेव्याःशर्वाख्यातंमहासुराः अमर्षापूरिताजग्मुर्यत्रकात्यायनीस्थिता २८ ततःप्रथममेवाग्रेशरशक्त्यृष्टिवृष्टिभिः ववर्षुरुद्धतामर्षास्तांदेवीममरारयः २९ सात्वतान्प्रहितान्बाणान्शूलशक्तिपरश्वधान् चिच्छेदलीलयाध्मातधनुर्मुक्तैर्महेषुभिः३० तस्याग्रतस्तथाकालीशूलपातविदारितान् खट्वांगपोथितांश्चान्यान्कुर्वतीव्यचरत्तदा ३१ कमंडलुजलाक्षेपहतवीर्यान्हतौजसः ब्रह्माणीचाकरोच्छत्रून्येनयेनस्मधावति ३२ माहेश्वरीत्रिशूलेनतथाचक्रेणवैष्णवी दैत्याजघानकौमारीतथाशक्त्यातिकोपना ३३ ऐंद्रीकुलिशपातेनशतशोदैत्यदानवाः पेतुर्विदारिताभूमौरुधिरौघप्रवर्षिणः ३४ तुंडप्रहारविध्वस्तादंष्ट्राग्रक्षतवक्षसः वाराहमूर्त्यो च्चपतंश्चक्रेणचविदारिताः ३५

कुर्वतीनुक्तशस्त्राभावात् ३१ कमंडल्विति आक्षेपःप्रक्षेपः वीर्यबलं हतौजसः हततेजसः धावतीतिस्मयोगेभूतेलट्येन येनप्रदेशेन ३२ माहेश्वरीतिस्पष्टं ३३ ऐंद्रीति दैत्यदानवयोर्मातृतोभेदः ऐंद्याः कुलिशपातेनेत्यर्थः ३४ तुंडेति वाराहीचासौ मूर्तिश्चवाराहमूर्तिस्तयाचक्रेणेत्यनेनवा रात्यामुखमेववराहसदृशंनत्वंन्यत् एवंशक्तिमतोवराहस्यापिबोध्यम् ३५ छ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नखैरितिआजौरणेअंबरमाकाशं ३६ चंडेति चंडउत्कटः सकोपोवाशिवदूत्यभिदूषिताइतितृतीयासमासः प्रापितमूर्च्छाःसाशिवदूती ३७ इतीतिपूर्वोक्तैर
भ्युपायैःसंग्रामसाधनैः दैत्यान्मदर्यंतंमातृगणंदृष्ट्वानेशुःपलायिताइत्यन्वयः ब्रह्माण्याद्याअष्टमातरः ब्राह्मीमाहेश्वरीचैवकौमारीवैष्णवीतथा वाराहीना
रसिंह्यैंद्रीचांमुंडामातरस्मृताइतिडामरतंत्रेनवार्णविधानेउक्ताः ३८ पलायनेति रक्तंबीजंकारणंयस्यसःरक्तबीजः ३९ तदेवाह रक्तेतिअस्यरक्तबीजस्यमेदिन्याः

नखैर्विदारितांश्चान्यान्भक्षयंतीमहासुरान् नारसिंहीचचाराजौनादापूर्णदिगंबरा ३६ चंडाट्टहासैरसुराःशिवदूत्यभिदूषिताः पेतु
र्विदारिताभूमौतांश्चखादाथसातदा ३७ इतिमातृगणंक्रुद्धंमर्दयंतंमहासुरान् दृष्ट्वाभ्युपायैर्विविधैर्नेशुर्देवारिसैनिकाः ३८ पलाय-
नपरान्दृष्ट्वादैत्यान्मातृगणार्दितान् योद्धुमभ्याययौक्रुद्धोरक्तबीजोमहासुरः ३९ रक्तबिंदुर्यदाभूमौपतत्यस्यशरीरतः समुत्पततिमेदि
न्यास्तत्प्रमाणोमहासुरः ४० युयुधेसगदापाणिरिंद्रशक्त्यामहासुरः ततश्चैंद्रीस्ववज्रेणरक्तबीजमताडयत् ४१ कुलिशेनाहतस्याशुबहु
सुस्रावशोणितं समुत्तस्थुस्ततोयोधास्तद्रूपास्तत्पराक्रमाः ४२ यावंतःपतिताःस्तस्यशरीराद्रक्तबिंदवः तावंतःपुरुषाजातास्तद्वीर्यबलवि-
क्रमाः ४३ तेचापियुयुधुस्तत्रपुरुषारक्तसंभवाः समंमातृभिरत्युग्रशस्त्रपातातिभीषणं ४४

मेदिन्यांस्थित्वेत्यर्थःल्यप्लोपेपंचमी ४० रक्तबी-
जः ४१ कुलिशेनेतिआहतस्यरक्तबीजस्य ४२ यावंतइतिवीर्यंप्रभावः बलंशारीरं विक्रमःपराक्रमःउत्साहरूपः ४३ तइतिसमंसह अत्युग्रेति शस्त्रविशेषणंसमस्तम् ४४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुनश्चेति ववाहेतिवहिर्गतावित्यस्यरूपम् ४५ वैष्णवीति ऐंद्र्याःशक्तेरितंपराङ्मुखंस्वसंमुखंप्राप्तंएनंवैष्णवीचक्रेणाभिजघानगदयाचताडयामासेत्य
न्वयः ४६ ४७ शक्त्येति ४८ सचापीति अहनदितिछांदसं दितेरपत्यंदैत्यः महांतोसुराः यस्मादितिनपौनरुक्त्यं मातॄः ब्राह्मादिशक्तीः पृथक्प्रत्येकं ४९

पुनश्चवज्रपातेनक्षतमस्यशिरोयदा ववाहरक्तंपुरुषास्ततोजाताःसहस्रशः ४५ वैष्णवीसमरेचैनंचक्रेणाभिजघानह गदयाता
डयामासऐंद्रीतमसुरेश्वरं ४६ वैष्णवीचक्रभिन्नस्यरुधिरस्रावसंभवैः सहस्रशोजगद्व्याप्तंतत्प्राणैर्महासुरैः ४७ शक्त्याजघानकौ
मारीवाराहीचतथासिना माहेश्वरीत्रिशूलेनरक्तबीजंमहासुरं ४८ सचापिगदयादैत्यःसर्वाएवाहनत्पृथक् मातॄःकोपसमाविष्टोर
क्तबीजोमहासुरः ४९ तस्याहतस्यबहुधाशक्तिशूलादिभिर्भुवि पपातयोवैरक्तौघस्तेनासन्शतशोसुराः ५० तैश्चासुरासृक्संभू
तैरसुरैःसकलंजगत् व्याप्तमासीत्ततोदेवाभयमाजग्मुरुत्तमं ५१ तान्विषण्णान्सुरान्दृष्ट्वाचंडिकाप्राहसत्वरा उवाचकालींचामुंडे
विस्तीर्णवदनंकुरु ५२ मच्छस्त्रपातसंभूतान्रक्तबिंदुन्महासुरान् रक्तबिंदोःप्रतीच्छत्वंवक्त्रेणानेनवेगिना ५३

५० तैश्चेति उत्तमंनि
रतिशयंसकलंजगदित्यतिशयोक्तिः ५१ तानिति तान्विषण्णान् दृष्ट्वासत्वरात्वरयासहिताचंडिकासुरान्प्राह यूयंमाविषीदतेतिशेषः ५२ एवंसुराना
श्वास्यविस्तीर्णवदनेन रक्तबिंदोरिति जात्यपेक्षयाततोजातान्महासुरान् मच्छस्त्रपातसंभूतान्रक्तबिंदूंश्चभूमिमप्राप्तानेवप्रतीच्छगृहाण ५३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंचपानसमयेत्वद्वक्त्रंसमुत्पन्नान्महासुरान्भक्षयंतीरणेचरविहरएवंप्रकारेणैवदैत्यःक्षयंगमिष्यति ५४ भक्षमाणाइति उत्पत्स्यंतीति अनुदातेत्वलक्षण
तङोऽन्नित्यत्वान्नतङ् ५५ मुखेनेति शोणितंअभूगतमेवविस्तीर्णत्वाद्वदनस्य असोरक्तबीजः तत्रयुद्धे ५६ नचेति अल्पिकांदेव्याश्चिदानंदात्मत्वा

भक्षयंतीचररणेतदुत्पन्नान्महासुरान् एवमेषक्षयंदैत्यःक्षीगारक्तोगमिष्यति ५४ भक्षमाणास्त्वयाचोग्रानचोत्पत्स्यंतिचापरे
इत्युक्त्वातांततोदेवीशूलेनाभिजघानतं ५५ मुखेनकालीजगृहेरक्तबीजस्यशोणितम् ततोसावाजघानाथगदयातत्रचंडिकां
५६ नचास्यावेदनांचक्रेगदापातोल्पिकामपि तस्याहतस्यदेहात्तुबहुसुस्रावशोणितम् ५७ यतस्ततस्तद्वक्त्रेणचामुंडासंप्रती
च्छति मुखेसमुद्गतायेस्यारक्तपातान्महासुराः ५८ तांश्चखादाथचामुंडापपौतस्यचशोणितं देवीशूलेनवज्रेणबाणैरसिभिर्ऋ
ष्टिभिः ५९ जघानरक्तबीजंतंचामुंडापीतशोणितं सपपातमहीपृष्ठेशस्त्रसंघसमाहतः ६० नीरक्तश्चमहीपालरक्तबीजोमहासुरः तत-
स्तेहर्षमतुलमवापुस्त्रिदशानृप ६१

दितिभावः ५७ यतस्ततइतिसर्वतइत्यर्थः अतिविस्तीर्णत्वात्वदनस्यउत्तरार्द्धमुत्तरान्वयि ५८ तांश्चेति येसमुद्गता
स्तांश्चखादउत्तरार्द्धमुत्तरान्वयि असिंकृतप्रहाराअसयस्तैः असिभिरितिक्रियापेक्षंबहुवचनंऋष्टिभिरित्यप्येवं ऋष्टिरुभयतोधारासिः ५९ जघानेति शस्त्रसंघैः
समूहैःसमाहतइतितृतीयातत्पुरुषःउत्तरार्द्धमुत्तरान्वयि ६० नीरक्तश्चेतिकातर्यात् निःशेषरुधिरत्वात् नीरक्तश्चसन्पपातेति मातृगणोब्राह्म्यादिसमूहोननर्तेत्यर्थः ६१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रुधिरपानमदोद्धतः एतेनयुद्धावसानेवीरपानंसूचितं ६२ इतिशिवभट्टसुतसतीगर्भजनागो० कृतेसप्तशतीव्याख्यानेअष्टमोऽध्यायः ८ राजोवाच विचित्र-
मिति राजासुरयः चरितंकर्म माहात्म्यंप्रभावः समाहारद्वंद्वः आश्रितंजनकम् १ २ ऋषिरुवाच चकारेति आहवेरणे ३ हन्यमानमितिउद्वहन् धारयन्मुख्य

हतेमातृगणस्तस्मिन्ननर्तासृङ्मदोधृतः ६२ इतिश्रीमार्कंडेयपुराणेसा०माहात्म्येरक्तबीजवधाख्योऽष्टमोऽध्यायः ८ राजोवाच
विचित्रमिदमाख्यातंभगवन्भवताममदेव्याश्चरितमाहात्म्यंरक्तबीजवधाश्रितं १ भूयश्चेच्छाम्यहंश्रोतुंरक्तबीजेनिपातिते चकारशुं
भोयत्कर्मनिशुंभश्चातिकोपनः २ ऋषिरुवाच चकारकोपमतुलंरक्तबीजेनिपातिते शुंभासुरोनिशुंभश्चहतेष्वन्येषुचाहवे ३ हन्यमा
नंमहासैन्यंविलोक्यामर्षमुद्वहन् अभ्यधावन्निशुंभोथमुख्ययासुरसेनया ४ तस्याग्रतस्तथापृष्ठेपार्श्वयोश्चमहासुराः संदष्टौष्ठपुटाःक्रु
द्धाहंतुंदेवीमुपाययुः ५ आजगाममहावीर्यः शुंभोपिस्वबलैर्वृतः निहंतुंचंडिकांकोपात्कृत्वायुद्धंतुमातृभिः ६ ततोयुद्धमतीवासीद्दे-
व्याशुंभनिशुंभयोः शरवर्षमतीवोग्रंमेघयोरिववर्षतोः ७ चिच्छेदास्तांश्छरांस्ताभ्यांचंडिकास्वशरोत्करैः ताडयामासचांगेषुशस्त्रौघै
रसुरेश्वरौ ८ निशुंभोनिशितंखड्गंचर्मचादायसुप्रभं अताडयन्मूर्ध्निसिंहंदेव्यावाहनमुत्तमं ९ यानिजया ४ संदष्टौष्ठपुटाःदंताभ्यामंतः संधृतौष्ठाः
तथासतिपूटाकारताभवति ५ ६ ततइतिदेव्याइतिसहार्थेतृतीया ७ चिच्छेदेतिताभ्यामस्तान्क्षिप्त्वानित्यन्वयः ८ निशुंभइतिसुप्रभमितिखड्गचर्मणोर्विशेषणं ९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ताडितइति क्षुरप्रःक्षुरविशेषः बाणविशेषोवाचर्मवालकः अष्टासंख्याकरत्वादिघटितंचंद्राकारसहितं १० छिन्नेइति शक्तिक्षेपोदेवींप्रति अभिमुखाग
तांदेवीविच्छेदेत्यर्थः ११ कोपति जयाहग्रहणपूर्वकेपक्षेपेत्रयहिः आयांतंतच्छूलं १२ आविध्यभ्रामयित्वादेव्याकर्त्र्यांत्रिशूलेनकरणेनसापिगदाभि
न्नाभस्मत्वमागता अप्रापिताच अंतर्भावितण्यर्थात्कृः १३ पुंगवश्रेष्ठं अत्रनिशुंभस्यमूर्च्छासंपादनेननपातनं १४ तस्मिन्निति प्रययौशक्रइतिशेषः १५

ताडितेवाहनेदेवीक्षुरप्रेणासिमुत्तमं निशुंभस्याशुचिच्छेदचर्मचाष्टभ्यचंद्रकम् १० छिन्नेचर्मणिखड्गेचशक्तिंचिक्षेपसोसुरः तामप्यस्यद्विधाचक्रेचक्रेणाभिमुखागतां ११ कोपाध्मातोनिशुंभोथशूलंजयाहदानवः आयांतंमुष्टिपातेनदेवीतच्चाप्यचूर्णयत् १२ आ
विध्याथगदांसोपिचिक्षेपचंडिकांप्रतिं सापिदेव्यात्रिशूलेनभिन्नाभस्मत्वमागता १३ ततःपरशुहस्तंतमायांतंदैत्यपुंगवं आहत्यदेवी
बाणौघैरपातयत्भूतले १४ तस्मिन्निपतितेभूमौनिशुंभेभीमविक्रमे भ्रातर्यतीवसंक्रुद्धःप्रययौयोद्धुमंबिकां १५ सरथस्तस्तथात्युच्चै
र्गृहीतपरमायुधैः भुजैरष्टाभिरतुलैर्व्याप्याशेषंबभौनभः १६ तमायांतंसमालोक्यदेवीशंखमवादयत् ज्याशब्दंचापिधनुषश्चकारातीवदुःसह १७ पूरयामाससकुक्षिर्नभोनिजघंटास्वनेनच समस्तदैत्यसैन्यानांतेजोवधविधायिना १८

सइति तथासामुद्रिकप्रकारेणात्युच्चैर्भुजै

र्नभोव्याप्यबभावित्यर्थः १६ आयांतमागच्छंतम् १७ स्वनेनचेति चेनशंखज्याशब्दयोः समुच्चयः वधोनाशः विधायिनेतिस्वनविशेषणम् १८

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

उपदिशः सामान्यदिगाक्षेपोपदिक्त्वंपूर्वादीनांदशानां तदाहदशेति १९ समुत्पत्यसमुत्पत्यपुनरुत्पतीर्यपृथ्वींतिरोहिताच्छादिताःआसन् २० अथाट्टहास-मिति अट्टहासोमहाहासः शकंध्वादित्वात्पररूपं अशिवंशिवाभिन्नं पूर्णांभयदं २१ दुरात्मन्निति तिष्ठतिष्ठेतिकोपेसंभ्रमेद्विरुक्तिः आकाशेसंस्थितैर्देवैः दानवसं-ग्रामदर्शनायतत्रस्थितैः २२ शुंभेनेति महोल्केयेति महाज्वालावृत्याशक्त्येत्यर्थकम् यद्वा तन्नामकशक्त्येत्यर्थकम् २३ सिंहेति उत्तरार्द्धस्थतथापीत्या

ततःसिंहोमहानादैस्त्याजितेभमहामदैः पूरयामासगगनंगांतथोपदिशोदिश १९ ततःकालीसमुत्पत्यगगनंक्ष्मामताडयत् करा-भ्यांतन्निनादेनप्राक्स्वनास्तेतिरोहिताः २० अथाट्टहासमशिवंशिवदूतीचकारह तैंःशब्दैरसुरास्त्रस्तुःशुंभःकोपंपरंययौ २१ दुरात्मं स्तिष्ठतिष्ठेतिव्याजहारांबिकायदा तदाजग्मत्यभिहितंदेवैराकाशसंस्थितैः २२ शुंभेनागत्ययाशक्तिमुक्ताज्वालातिभीषणा आ-यांतीवह्निकूटाभासानिरस्तामहोल्कया २३ सिंहनादेनशुंभस्यव्याप्तंलोकत्रयांतरं निर्घातनिःस्वनोघोरोजितवानवनीपते २४ शुं भमुक्तान्शरान्देवीशुंभस्तत्प्रहितान्शरान् चिच्छेदस्वशरैरुग्रैःशतशोथसहस्रशः २५ ततःसाचंडिकाक्रुद्धाशूलेनाभिजघानतं सतदाभिहतोभूमौमूर्छितोनिपपातह २६

दिनिर्घातनिःस्वनःउत्पातध्वनिः जितवानित्यस्यशुंभनादमितिशेषः २४ शुंभेति भ्रमेनदेवीशुंभयोः समयुद्धमुक्तम् २५ ततइति समयुद्धं असहमानाअतएवक्रुद्धा अभिहतः समंताद्धतोभिहतः २६ ७ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततइति शुंभमूर्छानंतरंनिशुंभयोः पूर्वमूछितः आत्तंगृहीतं २७ पुनरिति दनोःपुत्रोपिदितिजसमानशीलित्वाद्दितिजः अयुतंदशसहस्रंचक्रायुधेनेत्येकवच-
नंप्रत्येकाभिप्रायेण २८ ततइति दुर्गेसंकटेआर्तेः पीडायाः नाशिनीतिणिनिप्रत्ययः २९ ततइति दैत्यसेनयासमावृतः ३० शितधारेणतीक्ष्णधारेण ३१

ततोनिशुंभःसंप्राप्यचेतनामात्तकार्मुकः आजघानशरैर्देवींकालींकेसरिणंतथा २७ पुनश्चकृत्वाबाहूनामयुतंदनुजेश्वरः चक्रायुधेन
दितिजश्छादयामासचंडिकां २८ ततोभगवतीक्रुद्धादुर्गादुर्गातिनाशिनी चिच्छेदतानिचक्राणिस्वशरैःसायकांश्चतान् २९ ततो
निशुंभोवेगेनगदामादायचंडिकां अभ्यधावतवैहंतुंदैत्यसेनासमावृतः ३० तस्यापततएवाशुगदांचिच्छेदचंडिका खड्गेनशितधारे-
णसचशूलंसमाददे ३१ शूलहस्तंसमायांतंनिशुंभममरार्दनं हृदिविव्याधशूलेनवेगाविद्धेनचंडिका ३२ भिन्नस्यतस्यशूलेनहृदय-
ान्निःसृतोपरः महाबलोमहावीर्यस्तिष्ठेतिपुरुषोवदन् ३३ तस्यनिष्क्रामतोदेवीप्रहस्यस्वनवत्ततः शिरश्चिच्छेदखड्गेनततोसावपत
द्भुवि ३४ ततःसिंहश्चखादोग्रंदंष्ट्राक्षुण्णशिरोधरान् असुरांस्तांस्तथाकालीशिवदूतीतथापरान् ३५

शूलेति समायांतंसंमुखमायातं-
वेगाविद्धेनवेगाक्षिप्तेन ३२ भिन्नस्येति अपरइति शरीरभेदेननतुक्षेत्रज्ञत्वेननिःसृतःनिरगात् ३३ स्वनवदितिप्रहस्येत्यस्यविशेषणं मनोमय्यामायया
मांहंतुमिच्छतीति तस्यमूर्खत्वदर्शाप्रहसितमित्यर्थः ३४ ततइति उग्रमितिक्रियाविशेषणं सिंहःकाली शिवदूतीचचखादेत्यन्वयः ३५

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

निराकृताः ध्वस्ताः मंत्रोच्चारणवः ३६ ३७ खंडंखंडंखंडंखंडप्रकाराः खंडस्यखंडावयस्यां क्रियायांतथाकृताः आद्येप्रकारेगुणवचनस्येतिद्वित्वं वज्रेणचखंडंखंडंकृताइत्येव ३८ विनेशुर्मृताः नष्टाः पलायिताः ३९ इतिशिवमहापुराणेसप्तमसंहितायांनागोत्कृतेससप्ततीव्याख्यानेनवमोऽध्यायः ९ ऋषिरुवाच निशुंभमिति १

कौमारीशक्तिनिर्भिन्नाःकेचिन्नेशुर्महासुराः ब्रह्माणीमंत्रपूतेनतोयेनान्येनिराकृताः ३६ माहेश्वरीत्रिशूलेनभिन्नाःपेतुस्तथापरे वाराहीतुंडघातेनकेचिच्चूर्णीकृताभुवि ३७ खंडंखंडंचचक्रेणवैष्णव्यादानवाःकृताः वज्रेणचैंद्रीहस्ताग्यविमुक्तेनतथापरे ३८ केचिद्विनेशुरसुराःकेचिन्नष्टामहाहवात् भक्षिताश्चापरेकालीशिवदूतीमृगाधिपैः ३९ इतिमार्कंडेयपुराणेसाव्मान्निशुंभवधोनामनवमोऽध्यायः ९ ऋषिरुवाच निशुंभंनिहतंदृष्ट्वाभ्रातरंप्राणसंमितं हन्यमानंबलंचैवशुंभःक्रुद्धोब्रवीद्वचः १ बलावलेपदुष्टेत्वंमादुर्गेगर्वमावह अन्यासांबलमाश्रित्ययुद्ध्यसेयातिमानिनी २ देव्युवाच एकैवाहंजगत्यत्रद्वितीयाकाममापरा पश्यैतादुष्टमय्येव विशंत्योमद्विभूतयः ३

बलेति बलगर्वेण दुर्विनीते दुर्गेमागर्वमावह यात्वमतिमानिनीसती अन्यासांबलमाश्रित्ययुद्ध्यसेइत्यन्वयः २ देव्युवाच एकैवेति एकास्वगतस्वजातीयभेदहीनापरमात्मस्वरूपत्वात् अपरान्यामम सहायभूताद्वितीयाकाश्चिनकापीत्यर्थः अनुभूयमानस्तुभेदोनवास्तवइत्याह पश्येति वाक्यार्थस्यकर्मत्वंमद्विभूतयइत्यनेनभेदं अन्यबलाश्रयणाद्योमांजयतिसंग्रामेइत्यादिप्रतिज्ञातंमानिनीत्युक्तंनिरस्यति ३ ७.

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततइति तनोःशरीरेलयं अपृथग्भावं अनेनब्रह्मादिभ्यः आविर्भूतानामप्यत्रलयदर्शनेनसमस्तोपादानत्वमस्याएवेतिदर्शयति तच्चमूलशक्त्यभेदादित्युक्तं ४ देव्युवाच अहमिति अहंविभूत्यैश्वर्येणबहुभिःरूपैः यद्बहुत्वमास्थितातद्बहुत्वंमयासंहृतंतस्मादहमेकैवतिष्ठामि त्वमपिरणेस्थिरोभवेत्यर्थः अनेना

ततःसमस्तास्तादेव्योब्रह्माणीप्रमुखालयं तस्यादेव्यास्तनौजग्मुरेकैवासीत्तदांबिका ४ देव्युवाच अहंविभूत्याबहुभिरिहरूपै र्यदास्थिता तत्संहृतंमयैकैवतिष्ठाम्याजौस्थिरोभव ५ ऋषिरुवाच ततःप्रववृतेयुद्धंदेव्याःशुंभस्यचोभयोः पश्यतांसर्वदेवा नामसुराणांचदारुणं ६ शरवर्षैःशितैःशस्त्रैस्तथास्त्रैश्चैवदारुणैः तयोर्युद्धमभूद्भूयःसर्वलोकभयंकरं ७ दिव्यान्यस्त्राणिशत शोमुमुचेयान्यथांबिका बभंजतानिदैत्येंद्रस्तत्प्रतीघातकर्तृभिः ८ मुक्तानितेनचास्त्राणिदिव्यानिपरमेश्वरी बभंजलीलयैवो ग्रहुंकारोच्चारणादिभिः ९ ततःशरशतैर्देवीमाच्छादयतसोसुरः सापितत्कुपितादेवीधनुश्चिच्छेदचेषुभिः १० छिन्नेधनुषिदैत्येंद्रस्तथाशक्तिमथाददे चिच्छेददेवीचक्रेणतामप्यस्यकरस्थितां ११

पितदेवइदीकृतम् ५ ऋषिरुवाच ततइति पश्यतामित्यनादरेषष्ठी दारुणंदेवानामसुराणांचभयंकरं ६ भूयः महत् ७ दिव्यानीति तत्प्रतीघातकर्तृभिः तन्नदस्त्रविध्वंसिभिःअस्त्रैः ८ मुक्तानीति उग्रंचतत्हुंकारोच्चारणंचतदादिभूतंयेषामस्त्राणां ९ तत्तस्मात्कुपिताधनुःइषुभिःसह १० छिन्नेइति तथातेनप्रकारेणछिन्नेधनुषीत्यन्वयः ११ ५ ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततइति खड्गंशतचंद्रंचर्मचेतिचेनाश्वसारथ्योःसमुच्चयः १२ १३ तदाहहताश्वइति १४ १५ समुष्टिमितिदेव्याःहृदयेइत्यन्वयः तलंप्रसृतचपेटः १६
१७ उच्चैर्गगनमित्यन्वयः आस्थितः आश्रितवान् निराधारास्वप्रयत्नेनरथनागभावहेतुहीना तेनशुंभेन १८ नियुद्धंबाहुयुद्धं तद्विशेषणंभथममितिमुख्या

ततःखड्गमुपादायशतचंद्रंचभानुमत् अभ्यधावततांदेवीदैत्यानामधिपेश्वरः १२ तस्यापततएवाशुखड्गंचिच्छेदचंडिका धनुर्मु-
क्तैःशितैर्बाणैश्चर्मचार्ककरामलं १३ हताश्वःसतदादैत्यश्छिन्नधन्वाविसारथिः जग्राहमुद्गरंघोरमंबिकानिधनोद्यतः १४ चिच्छेदा
पतन्तस्तस्यमुद्गरंनिशितैःशरैः तथापिसोभ्यधावत्तांमुष्टिमुद्यम्यवेगवान् १५ समुष्टिंपातयामासहृदयेदैत्यपुंगवः देव्यास्तंचापिसा
देवितलेनोरस्यताडयत् १६ तलप्रहाराभिहतोनिपपातमहीतले सदैत्यराजःसहसापुनरेवतथोत्थितः १७ उत्पत्यचप्रगृह्योच्चैर्दोर्भ्यां
गगनमास्थितः तत्रापिसानिराधारायुयुधेतेनचंडिका १८ नियुद्धंखेतदादैत्यश्चंडिकाचपरस्परम् चक्रतुःपरमंसिद्धमुनिविस्म-
यकारकं १९ ततोनियुद्धंसुचिरंकृत्वातेनांबिकासह उत्पात्यप्राभ्रामयामासचिक्षेपधरणीतले २० सक्षिप्तोधरणींप्राप्यमुष्टिमुद्यम्य
वेगतः अभ्यधावत्तदुष्टात्माचंडिकानिधनेच्छया २१ अर्धकं सिद्धाः देवयोनिविशेषाः मुनयःऋषयः १९ ततइति उत्पात्यकंदुकवदुपरिक्षिप्त्वा
पतनसमयेचरणमुद्धृत्यभ्रामयामास धरणीतलेचिक्षेपचेत्यर्थः उत्पाद्यउत्पात्यउत्क्षिप्येतिपाठत्रयमपीतिकेचित् २० सइति दुष्टात्मादुष्टस्वभावः २१ ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तमिति जगत्यांक्षितौ २२ सइति क्षिणुक्षिणुहिंसायामितिधातोःक्षतः २३ २४ उत्पातेति उत्पातसूचकामेघाःउल्कादिव्यंतेजः प्राक्शुंभवधात् तथा तद्वत्सरितोमार्गवाहिन्यः नपूर्ववदुत्पथगामिन्यः आसन्तत्रशुंभे २५ २६ अवादयन्निति पुण्याःअनुकूलाः २७ जज्वलुरिति अग्नयःआहवनीयादयः शांताःसौम्याःसंतोजज्वलुः शांताःदिक्षुजनिताः स्वनाः उत्पातसूचकस्फुरणादिशब्दायेषांते २८ इतिशिवभट्टसुतसतीगर्भजनागोजीभट्टकृतेसप्तश

तमायांतंततोदेवीसर्वदैत्यजनेश्वरं जगत्यांपातयामासभित्वाशूलेनवक्षसि २२ सगतासुःपपातोर्व्यांदेवीशूलाग्रविक्षतः चालय न्सकलांपृथ्वींसाब्धिद्वीपांसपर्वताम् २३ उत्पातमेघाःसोल्कायेप्रागासंस्तेशमंययुः सरितोमार्गवाहिन्यस्तथासंस्तत्रपातिते २४ ततःप्रसन्नमखिलंहतेतस्मिन्दुरात्मनि जगत्स्वास्थ्यमतीवासीन्निर्मलंचाभवन्नभः २५ ततोदेवगणाःसर्वेहर्षनिर्भरमानसाः बभू वुर्निहतेतस्मिनांधर्वाललितंजगुः २६ अवादयंस्तथैवान्येननृतुश्चाप्सरोगणाः ववुःपुण्यास्तथावाताःसुप्रभोभूद्दिवाकरः २७ ज ज्वलुश्चाग्नयःशांताःशांतदिग्जनितस्वनाः २८ इतिश्रीमार्कंडेयपुराणेसार्वर्णिकेमाहात्म्ये शुंभवधोनामदशमोध्यायः १०

ऋषिरुवाच तीव्याख्यानेदशमोऽध्यायः १० ६ ऋषिरुवाच देव्येति तत्रयुद्धेवन्हिपुरोगमाःवन्हिमुख्याः कात्यायनीमित्य- नेनपरस्परंमासामैक्यंसूचयति इष्टस्यशुंभादिवधस्यलंभात्प्राप्तेः नुमागमः विकाशीनिविकस्वराणिवक्त्राणियेषांते तुपादपुरणेविका

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शिताः आशाः यैः १ देवीति प्रपन्नाः भक्ताः आदरेप्रसीदेतिविरुक्तिः चराचरस्यमध्येत्वमीश्वरीस्वतंत्राइतरत्सर्वंत्वत्परतंत्रमितिभावः
२ आधारभूतेति विश्वस्याधारभूतात्रहेतुः यतः महीस्वरूपेणेतिस्थितिः अपांस्वरूपस्थितयाअवभिन्नस्वरूपेणेतिस्थितयागमकत्वा
त्समासः आप्यायतेआपीत्यतः कर्मणियकौ अननोपलक्षणेनसार्वात्म्यंविवक्षितम् ३ त्वमिति हेदेवि आद्यपादेपालनशक्तिमत्वम्

देव्याहतेतत्रमहास्करेंद्रेसेंद्राःस्करावह्निपुरोगमास्ताम् कात्यायनींतुष्टुवुरिष्टलंभाद्दिकाशिवल्कारस्तविका
शिताशाः १ देविप्रपन्नार्तिहरेप्रसीदप्रसीदमातर्जगतोखिलस्य प्रसीदविश्वेश्वरिपाहिविश्वंत्वमीश्वरीदेवचरा
चरस्य २ आधारभूताजगतस्त्वमेकामहीस्वरूपेणयतःस्थितासि अपांस्वरूपस्थितयात्वयैवदाप्यायतेकृत्स्न
मलंघ्यवीर्ये ३ त्वंवैष्णवीशक्तिरनंतवीर्याविश्वस्यबीजंपरमासिमाया संमोहितंदेवसमस्तमेतत्त्वंवैप्रसन्ना
भुविमुक्तिहेतुः ४

द्वितीयेकारणशक्तिमत्वम् माया ऽविद्यात्वयैतत्संमोहितंसंसारगर्तेपातितम् तत्किंमोक्षोनास्त्यवेत्य
तआह त्वंप्रसन्नाकृतप्रसादावैप्रसिद्धम् भुविजगतिमुक्तिहेतुः ४ ५ ५ ५ ५ ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विद्याइति अंगानि ६ वेदाश्चत्वारो ४ मीमांसा ११ न्यायविस्तरः १२ पुराणं १३ धर्मशास्त्रं १४ च विद्यात्येनाश्चतुर्दश आयुर्वेद धनुर्वेदगांधर्वार्थशास्त्रैः सहाष्टादशभेदाः अंशाः सकलाश्चतुः षष्टिकलोपेताः पतिव्रत्यसौंदर्यतारुण्याद्युपेताः समस्ताः स्त्रियोपितवांशाः त्वय्येकयैतत्पूरितं अंतर्बहिश्चव्याप्तं त्वत्तः पृथक्भूतस्याभावात् अतस्तेस्तव्येस्तुत्येविषयेपरापरागौणीमुख्याचयाउक्तिस्तद्रूपास्तुतिः कातेइत्यर्थः यद्वाउक्तिरूपात्वमेवातः कातेस्तुतिः ५ पुनरपिस्तुतेरघटनामाह सर्वेति सर्वभूताविश्वात्मिकादेवीद्योतनशीलाः स्वर्गमुक्त्योः प्रकर्षेणदात्रीति यदात्वंस्तुतानदातवस्तुतयेपरमाअधिकाउक्तयः

विद्याःसमस्तास्तवदेविभेदाःस्त्रियःसमस्ताःसकलाजगत्सु त्वयैकयापूरितमंबयैतत्कातेस्तुतिःसव्यपरापरोक्तिः५सर्वभूताय
दादेवीस्वर्गमुक्तिप्रदायिनी त्वंस्तुतास्तुतयेकावाभवंतुपरमोक्तयः ६ सर्वस्यबुद्धिरूपेणजनस्यहृदिसंस्थिते स्वर्गापवर्गदेदेवी-
नारायणिनमोस्तुते ७ कलाकाष्ठादिरूपेणपरिणामप्रदायिनी विश्वस्योपरतौशक्तेनारायणिनमोस्तुते ८ काभवंतुनकापीत्यर्थः ६

तथाप्युपगम्याइत्याह सर्वस्येति बुद्धिर्निश्चयात्मकंज्ञानंतद्धीरेवस्वर्गापवर्गदात्वं नारायणस्यविष्णोः शक्तिर्नारायणितत्संबोधनेशक्तसत्वप्रधानावैष्णवीत्वमिति
ध्यतेनेतुष्यं यद्वा नारस्यजीवसमूहस्यायनीस्थानभूतानद्रूपात्साधनं ७ कलेति अष्टादशनिमेषास्तुकाष्ठाद्विंशत्तुताः कलाआदिनाक्षणमुहूर्तादयः परि ४३
णामोजनानामवस्थाविशेषः तेनाखंडकालरूपत्वं तदेवपुनराह विश्वस्योपरतौनाशेशक्तेनानाशक्तिमतिइत्यर्थः संबोधनंकालस्यैवजगद्रक्षकत्वात् ८ ७

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वेति सर्वमंगलानांमंगलत्वरूपेशिवेकल्याणकर्त्रिशरण्येशरणार्हेत्र्यंबकेत्रिनेत्रेगौरिगौरवर्णेअनेनगौरीत्वमप्यस्याःध्वनितम् ९ सृष्टीति आद्या
र्द्धेनब्रह्मादीनांसृष्ट्यादिशक्तिः त्वमेवेत्यन्तम् सनातनिनित्येगुणानांमहदादीनांआश्रयभूते अगुणमये अविद्यामानगुणकृतविकारे १० शरणे-

सर्वमंगलमांगल्येशिवेसर्वार्थसाधिके शरण्येत्र्यंबकेगौरिनारायणिनमोस्तुते ९ सृष्टिस्थितिविनाशानांशक्तिभूतेस
नातनि गुणाश्रयेगुणमयेनारायणिनमोस्तुते १० शरणागतदीनार्तपरित्राणपरायणे सर्वस्यार्तिहरेदेविनारायणिन
मोस्तुते ११ हंसयुक्तविमानस्थेब्रह्माणीरूपधारिणि कौशांभःक्षरिकेदेविनारायणिनमोस्तुते १२ त्रिशूलचंद्राहिधरेम
हावृषभवाहिनी माहेश्वरीस्वरूपेणनारायणिनमोस्तुते ॥१३॥

तिदीनाः सार्वदिकदुःखभाजः आर्ताः तस्करादीपीडिताः परायणस्तत्परः तदुपपादकमार्तिहरेइति यतः आर्तेः पीडायाः हंत्रीत्यर्थः ११
हंसेति हंसयुक्तविमानस्थितेब्रह्माणीरूपधारिकेकुशंजलंतस्यायंकौशः कमंडलुः तदंभः क्षरतीतिक्षरिकातस्याः संबुद्धौक्षरिकेसेचि
केक्षुरसेचनेइतिधातुः १२ त्रिशूलेति माहेश्वरीस्वरूपेणेतिपूर्वार्द्धेनान्वयि १३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मयूरेति मयूरकुक्कुटंतत्पिच्छंतेनचनेकुक्कुटः ककुभेपिच्छेपुत्रेचचरणायुधेइतिमेदिनी मयूरपिच्छध्वजवतीत्यर्थः ध्वजेनशिखिबर्हाणामुच्छ्रितेनसमावृतेनिहरिवंशोक्तेः यद्वा युद्धचातुर्यदिदृक्षयोपार्जितायेमयूरकुक्कुटास्तैरायुक्तिरावणंयस्याः तत्संबुद्धौ यद्वाकुक्कुटः क्षुद्राविशेषः कुक्कुटस्ताम्रचूडेचभूषायामपिदृश्यतेइति यद्वा आरक्तनेत्रपिच्छाद्यौमयूरः कुक्कुटःस्मृतः यद्वा कुक्कुटानिदेवसैन्यानितैरायुक्तइति अनयेऽघरहिते

मयूरकुक्कुटयुतेमहाशक्तिधरेनघे कौमारीरूपसंस्थानेनारायणिनमोस्तुते १४ शंखचक्रगदाशार्ङ्गगृहीतपरमायुधे प्रसीदवैष्णवीरूपेनारायणिनमोस्तुते १५ गृहीतोग्रमहाचक्रेदंष्ट्रोत्कृत्तवसुंधरे वराहरूपिणिशिवेनारायणिनमोस्तुते १६ नृसिंहरूपेणोग्रेणहंतुंदैत्यान्कृताद्यमे त्रैलोक्यत्राणसहितेनारायणिनमोस्तुते १७ किरीटिनिमहावज्रसहस्रनयनोज्ज्वले वृत्रप्राणहरेचैंद्रिनारायणिनमोस्तुते १८ शिवदूतीस्वरूपेणहतदैत्यमहाबले घोररूपेमहारावेनारायणिनमोस्तुते १९ दंष्ट्राकरालवदनेशिरोमालाविभूषणे चामुंडेमुंडमथनेनारायणिनमोस्तुते २० कुमारशक्तेरिवरूपसंस्थानम् अवयवसन्निवेशश्चयस्याः १४ शंखेति शंखादीनिगृहीतानिपरमायुधानियया १५ १६ नृसिंहेति त्रैलोक्यत्राणायसम्यक्हितेसमोमस्याहितेलोपः १७ किरीटिनीति महावज्रेमहत्वज्रंयस्याः १८ शिवेति हतंदैत्यानांमहाबलंययासा यद्वा हतदैत्याचासौमहाबलिश्चकरोपहारयोः पुसिबलिरिति १९ २०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हेलक्ष्मि महाविद्याउपनिषत्श्रद्धाआस्तिक्यबुद्धिः पुष्टिसहितस्वधे महारात्रिर्हिरण्यगर्भोदयरूपामहती अविद्यासर्वावरणसमर्थोमहामोहः तद्रूपे २१ मेधेइति मेधाधारणावतीबुद्धिः सरस्वतीवाग्देवता वरेश्रेष्ठेभूति सत्वप्रधानेछांदसोगुणाभावः अनेनसात्विकीत्वम् वभ्रूरजोगुणाःतद्युक्तेता मसितमोगुणयुक्ते इदंमूलशक्त्यभिप्रायेणानियतिर्दिष्टंतद्रूपेईशेसमर्थे २२ सर्वेति देवीत्यस्यद्विरुक्तिःप्रसादने त्राहीत्यार्षम् २३ एतद्दिनिसर्वेषू

लक्ष्मिलज्जेमहाविद्येश्रद्धेपुष्टिस्वधेध्रुवे महारात्रिमहामायेनारायणिनमोस्तुते २१ मेधेसरस्वतिवरेभूतिबाभ्रवितामसि नियतेत्वंप्रसीदेशनारायणिनमोस्तुते २२ सर्वस्वरूपेसर्वेशेसर्वशक्तिसमन्विते भयेभ्यस्त्राहिनोदेविदुर्गेदेविनमोस्तुते २३ एतत्तेवदनंसौम्यंलोचनत्रयभूषितम् पातुनःसर्वभूतेभ्यःकात्यायनिनमोस्तुते २४ ज्वालाकरालमत्युग्रमशेषासुरसूदनम् त्रिशूलंपातुनोभीतेर्भद्रकालिनमोस्तुते २५ हिनस्तिदैत्यतेजांसिस्वनेनापूर्ययाजगत् सायंघंटापातुनोदेविपापेभ्योनःसुतानिव २६ असुरासृग्वसापंकचर्चितस्तेकरोज्वलः शुभायखड्गोभवतुचंडिकेत्वांनतावयम् २७

तेभ्यः सर्वभूतविकारेभ्यः प्राणिभ्यश्चकात्यायनितदाश्रमभवे २४ ज्वालेति नोस्मान् भीतेर्भयात् २५ हिनस्तीवि अनः प्राणिमातासुतानिवनोस्मान् पापेभ्यःपात्वित्यर्थः अततेः पचाद्यच् जनन्यांशकटेप्यनः २६ असृरेति चर्चितोलिप्तः करंहस्तंउज्ज्वलयति करैःकिरणैरुज्ज्वलोवा २७ छ छ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रोगानिति अशीष्टान् अपहंसीत्यनुरुध्यते विपत् इष्टवियोगलक्षणविपत्तिः यतस्त्वामाश्रिता अन्येषामाश्रयतांप्रयांति अन्यैराश्रयणीयाभवंतीत्यर्थः २८ एतदिति कदनंनाशः धर्मद्विषोसुराःअद्यप्रभृतिनाआत्ममूर्तिमेव अनेकैःरूपैः ब्रह्माण्यादिलक्षणैः प्रभेदैतृतीया बहुधाबहुप्रकाराअन्यात्वदितराकानका पीत्यर्थः २९ विद्यासिति विद्यासुज्ञानेषुउपायभूतानियानिशास्त्रादीनि तेषुमत्वा युक्तेषुविवेकदीपेषुउपनिषत्सु आद्येषुवाक्येषुकर्मकांडपरवेदवा

रोगानशेषानपहंसितुष्टारुष्टास्कामान्सकलानभीष्टान् त्वामाश्रितानांनविपन्नराणांत्वामाश्रितात्याश्रयतांप्रयांति २८ एत-
त्कृतंयत्कदनंत्वयाद्यधर्मद्विषांदेवमहासुराणां रूपैरनेकैर्बहुधात्ममूर्तिंकृत्वाविकेतत्प्रकरोतिकान्या २९ विद्यासुशास्त्रेषुविवेकदीपे
ष्वाद्येषुवाक्येषुचकात्वदन्या ममत्वगर्तेतिमहांधकारेविभ्रामयत्येतदतीवविश्वं ३० रक्षांसियत्रोग्रविषाश्चनागायत्रारयोदस्युबलानि
यत्र दावानलोयत्रतथाब्धिमध्येतत्रस्थितात्वंपरिपासिविश्वं ३१ विश्वेश्वरीत्वंपरिपासिविश्वंविश्वात्मिकाधारयसीतिविश्व विश्वेशवं
द्याभवतीभवंतिविश्वाश्रयायेत्वयिभक्तिनम्राः ३२ क्येषुचसत्स्वेवममत्वगर्तेनतदाश्रयेमहांधकारेसंसारेएतद्विश्वंत्वदन्याका अतीवविभ्रामयतिन-

कापीत्यर्थः ३० रक्षोंसीति नागाःसर्पाःअत्रयत्रेत्यनुरुध्यतेदस्यवः चौराः दावोवनं तथाब्धिमध्येयत्रोर्वाग्न्यादयः तत्रत्वमेवव्यापकत्वात् स्थिताविश्वपरिपासीत्य
न्वयः ३१ यतस्त्वंविश्वेश्वरी अतोविश्वंपरिपासियतःत्वंविश्वात्मिकाअतस्त्वंतद्धारयसि यतोभवतीविश्वेशानांइंद्रब्रह्मादीनांमपिस्तुत्या अतस्त्वयिभक्तिनम्राःयेतेवि-
श्वाश्रयाः भवंति ३२

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

देवीति हेदेवि नोस्मान् सद्यः क्षणमात्रेणशत्रुभीतेः पालयययाधुनैवसंप्रत्येवासुरवधात् पालितवत्यसितयेत्यर्थः सर्वजगतांपापानिप्राशुशीघ्रंप्रशमं नय उत्पातानांपाकः फलदानकालस्तेनजनितान्महोपसर्गान् मार्यादींश्चप्रशमंनयअसंधिरार्षः ३३ प्रणतानामितिदृश्येलब्धे ३४ देव्युवाच वरदेतियंव रंयमनसीप्सितार्थंवृणुध्वंप्रार्थयध्वम् ३५ देवाऊचुः सर्वबाधेति सर्वाश्चासौबाधाचेत्यर्थः इदंवैरिविनाशनस्यविशेषणंएवमेवशुंभादीनाशनवदेव ३६

देविप्रसीदपरिपालयनोरिभीतेर्नित्यंययासुरवधादधुनैवसद्यः पापानिसर्वजगतांप्रशमंनयाशूउत्पातपाकजनितांश्चमहोपसर्गान् ३३ प्रणतानांप्रसीदत्वंदेविविश्वार्तिहारिणि त्रैलोक्यवासीनामीड्येलोकानांवरदाभव ३४ देव्युवाच वरदाहंसुरगणावरंयंमनसेच्छथ तंवृणुध्वंप्रयच्छामिजगतामुपकारकं ३५ देवाऊचुः सर्वबाधाप्रशमनंत्रैलोक्यस्याखिलेश्वरि एवमेवत्वयाकार्यमस्मद्वैरिविनाशनं ३६ देव्युवाच वैवस्वतेंतरप्राप्तेअष्टाविंशतिमेयुगे शुंभोनिशुंभश्चैवान्यावुत्पत्स्येतेमहासुरौ ३७ नंदगोपगृहेजाताय शोदागर्भसंभवा ततस्तौनाशयिष्यामिविंध्याचलनिवासिनी ३८

देव्युवाच वैवस्वतेइति अंतरेमन्वंतरे अष्टाविंशतिमे अष्टाविंशतिसंख्याकेयेमद्वापरश्छांदसः युगेचतुर्युगे तत्रकलिद्वापरसंधावनयोरुत्पत्तिः ३७ नंदगोपस्यगृहेणामहालक्ष्म्यंशभूता नंदाभगवतीनामयाभविष्यतिनंदजा कनकोत्तमकांतिः सासुकांतिकनकांबरा कमलांकुशपाशाब्जैरलंकृतचतुर्भुजा इंदिराकमलालक्ष्मीःसाश्रीरुक्मांबुजासनेतिरहस्योक्तेः ३८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुनरपीति इयमपिद्वापरेऽतीतेतत्रैवचतुर्युगेऽवतीर्णेत्याहुः वैप्रचित्तान् विप्रचित्तिवंशीयान् ३९ ४० ततइति एषारक्तदंतिकाकाल्यशभूताअत्रदंते त्युपलक्षणम् केशायुधसर्वावयवेषुरक्तत्वमस्या अतएवास्यारक्तचामुंडात्वेनव्यवहारः अत्रसर्वत्राहमितिनिर्देशः परस्परमपिशक्तीनामभेदाभिप्रायेण ४१ भूयश्चेति अनंभसि कूपादिजलशून्यायामपीत्यर्थः अयोनिजायथेदानींपार्वतीदेहाविर्भावएवमपिचेत्यर्थः ४२ ततइति यतयस्मान्मुनीन्निरी-

पुनरप्यतिरौद्रेणरूपेणपृथ्वीतले अवतीर्यहनिष्यामिवैप्रचित्तांश्चदानवान् ३९ भक्षयंत्याश्चतानुग्रान्वैप्रचित्तान्महासुरान् रक्तादंताभविष्यंतिदाडिमीकुसुमोपमाः ४० ततोमांदेवताःस्वर्गेमर्त्यलोकेचमानवाः स्तुवंतोव्याहरिष्यंतिसततंरक्तदंतिकाम् ४१ भूयश्चशतवार्षिक्यामनावृष्ट्यामनंभसि मुनिभिःसंस्तुताभूमौसंभविष्याम्ययोनिजा ४२ ततःशतेननेत्राणांनिरीक्षिष्यामियन्मुनीन् कीर्तयिष्यंतिमनुजाःशताक्षीमितिमांततः ४३ ततोहमखिलंलोकमात्मदेहसमुद्भवैः भरिष्यामिसुराःशाकैरावृष्टेःप्राणधारकैः ४४

क्षिष्यामितमस्मात् ४३ वैवस्वतमन्वंतरेएकचत्वारिंशत्तमेयुगेशताक्षीशाकंभर्यवतारः तस्मिन्नेवांतरेशक्रचत्वारिंशत्तमेयुगेइतिलक्ष्मीतंत्रोक्तेः तत्रैवदुर्गमासुरवधः शाकंभरींस्तुवध्यायन्शक्रसंपूज्ययन्नमन् अक्षय्यामश्नुतेभूतिमन्नपानोद्भवांरतिमितिचतत्रैव ४४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शाकंभरीति एषापार्वत्यंशाएवशाकंभरीनीलवर्णेत्याद्युक्तेः दुर्गनामासुरः तत्रैवशाकंभर्यवतारएव शाकंभरीशताक्षीसासैवदुर्गाप्रकीर्तिताउ
मागौरीसतिचंडीकालिकासाचपार्वतीति तत्रमूलकरीराग्रफलकांडाधिरूढकाः त्वक्पुष्पंकवचंचेतिशाकंदशविधंस्मृतं ४५ दुर्गेतिभीमंभयंकरं४६
भक्षयिष्यामिइत्यंतस्थयद्वयविशिष्टम् ४७ भीमेति भीमापिनीलवर्णैवदंष्ट्रादशनभासुरा चंद्रहासंचडमरुंशिरपात्रंचबिभ्रती एकवीराकाल-

शाकंभरीतिविख्यातिंतदायास्याम्यहंभुवि तत्रैवचवधिष्यामिदुर्गमाख्यंमहासुरं ४५ दुर्गादेवीतिविख्यातंतन्मेनामभवि-
ष्यति पुनश्चाहंयदाभीमंरूपंकृत्वाहिमाचले ४६ रक्षांसिभक्षयिष्यामिमुनीनांत्राणकारणात् तदामांमुनयःसर्वेस्तोष्यंत्यान
म्रमूर्तयः ४७ भीमादेवीतिविख्यातंतन्मेनामभविष्यति यदारुणाख्यस्त्रैलोक्येमहाबाधांकरिष्यति ४८ तदाहंभ्रामरंरूपंकृत्वा
संख्येयषट्पदं त्रैलोक्यस्यहितार्थायवधिष्यामिमहासुरं ४९ भ्रामरीतिचमांलोकास्तदास्तोष्यंतिसर्वतः इत्थंयदायदाबाधादान-
वोत्थाभविष्यति ५०

रात्रिर्निद्रातृष्णादुरत्ययेत्युक्तेरियंकाल्यंशएव पंचाशत्तमेचतुर्युगेवैवस्वतमन्वंतरेएवभीमावतारइतिलक्ष्मीतंत्रे अरुणाख्यो
रुणनामा ४८ तदेतिभ्रामरं पाणिधृतभ्रमरं असंख्येयाःषट्पदाःयस्मिन्रूपेतत् ४९ भ्रामरीति तेजोमंडलदुर्धर्षाभ्रामरीचित्रकांतिभृत् चित्रभ्रमरपा
णिःसामहामारीतिगीयते महामायामहाकालीमाहामारीक्षुधातृषाइत्युक्तेरियमपिकाल्यंशएवसर्वतः सर्वत्रवैवस्वतेंतरेएवषष्टितमेचतुर्युगेभ्रामर्यवतारइ
तिलक्ष्मीतंत्रेइत्थमित्यादुत्तरान्वयि ५०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेतिस्पष्टम् ५१ इतिशिवभट्टकृतसप्तशतीगर्भजनागोजीभट्टकृतेससशतीव्याख्यानेएकादशोऽध्यायः ११ देव्युवाच एभिरिति मधुकैटभवधादिलक्षणैरित्यर्थः सकलां ऐहिकींपारलौकिकीं समाहितोनन्यमनाः १ तदेवाह मधुकेति शुंभनिशुंभयोरिति वैपरीत्यं अष्टम्यादीदीनत्रयेक्रयकी-

तदातदावतीर्याहंकरिष्याम्यरिसंक्षयं ५१ इतिश्रीमार्कंडेयपुराणेसावर्णिकेमन्वंतरेदेवीमाहात्म्येदेवैःकृतानारायणीस्तुतिर्नाम एकादशोऽध्यायः११ देव्युवाच एभिःस्तवैश्चमांनित्यंस्तोष्यतेयःसमाहितः तस्याहंसकलांबाधांनाशयिष्याम्यसंशयं १ मधुकैटभनाशंचमहिषासुरघातनम् कीर्तयिष्यंतियेतद्वद्वधंशुंभनिशुंभयोः २ अष्टम्यांचचतुर्दश्यांनवम्यांचैकचेतसः श्रोष्यंतिचैवयेभक्त्यामममाहात्म्यमुत्तमं ३ नतेषांदुष्कृतंकिंचिद्दुष्कृतोत्थानचापदः नभविष्यतिदारिद्र्यंनचैवेष्टवियोजनं ४ शत्रुतोनभयंतस्यदस्युतोवानराजतः नशस्त्रानलतोयौघात्कदाचित्संभविष्यति ५ तस्मान्ममैतन्माहात्म्यंपठितव्यंसमाहितैः श्रोतव्यंचसदाभक्त्यापरंस्वस्त्ययनंहितत् ६

र्तनशंकादूरीकरणाय २ श्रोष्यंतिचात्पठिष्यंति अष्टम्यामित्यादिमुख्यकालकथनम् ३ नतेषामिति दुष्कृतंपापंदरिद्रशब्दात्पञ्च दारिद्र्यम् ४ शत्रुरितिनशस्त्रेतिसंग्रामभीरूविषयम् तोयौघाज्जलप्रवाहात् ५ तस्मादिति सदानित्यं हियतः तत् माहात्म्यंस्वस्तिकल्याणंतस्यायनंमार्गः ६ ७ ८ ९.

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

उपसर्गानिति माहात्म्यंकर्तुमहामारीजनक्षयकरीदेवतातस्याः समुद्भवीयेषांतानुपसर्गानुपद्रवान् तथात्रिविधंव्याधिरागद्वेषादिरूपंभाव्याधिं
कंभूतमेतादिजभयंभ्रमाद्याधिभौतिकंदैवकृतवज्रपातदारिद्र्याद्याधिदैविकंतद्रूपमुत्पातं अनिष्टंदिव्यंभौममांतरिक्षंचेतित्रिविधमुत्पातंच ७
यत्रेति यत्रायतनेगृहे ममममत्संबंध्येतत्सम्यगर्थावधारणपूर्वकं अस्खलितवर्णादिच्च ८ बलीति बलिप्रदानंदेवतोद्देशेनपश्वाद्युपहारः पूजागं

उपसर्गानशेषांस्तुमहामारीसमुद्भवान् तथात्रिविधमुत्पातंमाहात्म्यंशमयेन्मम ७ यत्रतत्पठ्यतेसम्यङ्नित्यमायतनेमम
सदानतद्विमोक्ष्यामिसान्निध्यंतत्रमेस्थितम् ८ बलिप्रदानेपूजायामग्निकार्येमहोत्सवे सर्वमेतच्चरितमुच्चार्यश्राव्यमेवच ९
जानताजानतावापिबलिपूजांतथाकृताम् प्रतीक्षिष्याम्यहंप्रीत्यावह्निहोमंतथाकृतं १० शरत्कालेमहापूजाक्रियतेयाचवार्षिकी
तस्यैन्ममैतन्माहात्म्यंश्रुत्वाभक्तिसमन्वितः ११ सर्वबाधाविनिर्मुक्तोधनधान्यसुतान्वितः मनुष्योमत्प्रसादेनभविष्यतिनसंशयः १२

धादिनार्चनम् अग्निकार्यंहवीदेवत्योहोमः महोत्सवः पुत्रजन्मविवाहादि उच्चार्यंइतिद्विजविषयम् ९ तत्फलमाह जानतेति जानताविधिज्ञेनअजान
तातदन्येन बलिसहितांपूजांतथावेद्यावेद्यप्रकारेणमन्माहात्म्योदीरणादौसती यथाकथंचिदपिकृतमेतत् प्रतीक्षिष्यामिअंगीकरिष्यामीत्यर्थः १० शरदृ
ति शरत्कालेआश्विनशुक्लप्रतिपदमारभ्यक्रियमाणादुर्गोत्सवरूपा याचवार्षिकीवर्षशब्दोवर्षादौलाक्षणिकः तेनचैत्रशुक्लप्रतिपदमारभ्यक्रियमाणाइत्यर्थः ११
१२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उत्पत्तयः प्रादुर्भावान् द्वितीयार्थे प्रथमा पराक्रमंचेति पूर्वान्वयि युद्धेष्वित्युपलक्षणम् १३ उपपद्यते प्राप्यते कुलंच नंदते वर्द्धते १४ शांतिकर्म उपसर्गादि निवर्तककर्म तस्मिन् तत्स्थान इत्यर्थः अन्ये सप्तम्यौ विषयार्थे १५ तदेव विवृणोति उपसर्गा इति दुःस्वप्नशब्दौ तु फले इति नपुंसकत्वम् १६ बालग्रहाः पूत

श्रुत्वा ममैतन्माहात्म्यं तथा चोत्पत्तयः शुभाः पराक्रमं च युद्धेषु जायते निर्भयः पुमान् ११ रिपवः संक्षयं यांति कल्याणं चोपपद्यते नंदते च कुलं पुंसां माहात्म्यं मम शृण्वताम् १४ शांतिकर्मणि सर्वत्र तथा दुःस्वप्नदर्शने ग्रहपीडासु चोग्रासु माहात्म्यं शृणुयान्मम १५ उपसर्गाः शमं यांति ग्रहपीडाश्च दारुणाः दुःस्वप्नं च नृभिर्दृष्टं सुस्वप्नमुपजायते १६ बालग्रहाभिभूतानां बालानां शांतिकारकम् संघातभेदे च नृणां मैत्रीकरणमुत्तमम् १७ दुर्वृत्तानामशेषाणां बलहानिकरं परम् रक्षोभूतपिशाचानां पठनादेव नाशनम् १८ सर्वं ममैतन्माहात्म्यं मम सन्निधिकारकम् पशुपुष्पार्घधूपैश्च गंधदीपैस्तथोत्तमैः १९ विप्राणां भोजनैर्होमैः प्रोक्षणीयैरहर्निशम् अन्यैश्च विविधैर्भोगैः प्रदानैर्वत्सरेण या २०

नाद्याः संघातभेदे मैत्रीविघट्टने १७ दुर्वृत्तानां दुष्टानां व्याघ्रसूचकानाम् १८ पश्वित्यादिश्लोकद्वयमेकान्वयम् पशुर्बलिः अर्घौष्टांगः आपः क्षीरं कुशाग्राणि दध्यक्षततिलानि च यवाः सिद्धार्थकाश्चैव ह्यष्टांगोऽर्घः प्रकीर्तितः १९ विप्राणामिति प्रोक्षणीयैः पंचामृताभिषेकादिभिः एतैरन्यैर्विविधा भोगाः स्रगादयः प्रदानैः मदुद्देशेन विप्रेभ्यो दीयमानैः वासोलंकारादिभिः एतैरहर्निशं क्रियमाणैर्या[illegible]ति भवति २०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सास्मिन्सुचरितेसकृच्छ्रुतइत्यर्थः श्रवणमुपलक्षणंश्रवणेधिकफलत्वमितिकश्चित् श्रुतमित्याद्युत्तरान्वयि २१ ममजन्मनांकीर्तनंश्रुतंसंदित्यर्थः युद्धे
षित्युत्तरान्वयि २२ तस्मिन्निति ब्रह्मर्षिभिःकृताःस्तुतयः तथापिममतावर्तइत्याद्ययः ब्रह्मर्षिःसुमेधाः बहुवचनंपूजायांवस्तुतस्तुयुष्माभिः स्तुत
योयाश्चेत्यनेननारायणीसूक्तं नमोदेव्यादेव्यादिकंचसूक्तं तथाब्रह्मणाऋषिभिः सह यायुष्माभिः कृताः महिषांतकरीसूक्तरूपाइत्यर्थः यथात

प्रीतिर्मेक्रियतेसास्मिन्सकृत्सुचरितेश्रुते श्रुतंहरतिपापानितथारोग्यंप्रयच्छति २१ रक्षांसिकरोतिभूतेभ्योजन्मनांकीर्तनंमम
युद्धेसुचरितंयन्मेदुष्टदैत्यनिबर्हणम् २२ तस्मिन्कृतेवैरिकृतंभयंपुंसांनजायते युष्माभिस्तुतयोयाश्चयाश्चब्रह्मर्षिभिःकृताः२३
ब्रह्मणाचकृतास्तास्तुप्रयच्छंतिशुभांमतिम् अरण्येप्रांतरेवापिदावाग्निपरिवारितः २४ दस्युभिर्वावृतः शून्येगृहीतोवापिशत्रु
भिः सिंहव्याघ्रानुयातोवावनेवावनहस्तिभिः २५

रक्षतौऋषीणामपिकर्तृत्वं यथाभागेवनिरूपणात्कृताइतिचदृष्टाइत्यर्थकम् र क्षीतंत्रैकवाक्यत्वादित्यवधेयम् एवंचैतानिसर्वाणिस्तोत्राण्यकृतकादीनीतिबोध्यम् २३ ब्रह्मणेति त्वंस्वाहेत्यादिरात्रिसूक्तरूपाः शुभांमोक्षा-
स्युदयसाधनींप्रयच्छंतिददति अरण्यइत्यादिश्लोकचतुष्टयमेकान्वयि प्रांतरे दूरशून्यमार्गे अरण्यइत्यस्यदावाग्नीत्यादिनान्वयः प्रांतरइत्यस्यदस्यु
भिरित्यादिनान्वयः २४ वनहस्तिभिरित्यस्यवृतोवेतिशेषः २५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राज्ञेति कुद्धेनराज्ञाचवध्य इत्याज्ञप्तइत्यन्वयः सर्वत्रवासमुच्चये महार्णवेपोतेनाविस्थितोवातेनाघूर्णितआकुलितश्च २६ पतत्सुचेति सर्वासुधा-
धासुमहापीडासुवेदनयादुःखेनाभ्यर्दितश्च २७ स्मरन्निति मुच्येतेति कर्मकर्तरिलङ्संकरंदुःखंउत्तरार्द्धसुत्तरान्वयी २८ दूरादेवेति ममचरितंस्म
रतःममप्रभावात् दूरात्पलायंत इत्यन्वयः उत्तरार्द्धः ऋषिरुवाचेत्यादिः चंडोदारुणः २९ पश्यतामिति अनादरेषष्ठि उत्तरार्द्धसुत्तरान्वयि निरातंकाः

राज्ञाकुद्धेनचाज्ञप्तोवध्योबंधगतोपिवा आघूर्णितोवावातेनस्थितःपोतेमहार्णवे २६ पतत्सुचापिशस्त्रेषुसंग्रामेभृशदारुणे
सर्वबाधासुघोरासुवेदनाभ्यर्दितोपिवा २७ स्मरन्ममैतच्चरितंनरोमुच्येतसंकटात् ममप्रभावात्सिंहाद्यादस्यवावैरिणस्तदा २८
दूरादेवपलायंतेस्मरंतश्चरितंमम ऋषिरुवाच इत्युक्त्वासाभगवतीचंडिकाचंडविक्रमा २९ पश्यतामेवदेवानांतत्रैवांतरधी-
यत तेपिदेवा निरातंकाः स्वाधिकारान्यथापुरा ३० यज्ञभागभुजःसर्वेचक्रुर्विनिहतारयः दैत्याश्चदेव्यानिहतेशुंभेदेवरिपौयुधि
३१ जगद्विध्वंसिनीतस्मिन्महोग्रेतिलविक्रमे निशुंभेचमहावीर्येशेषाः पातालमाययुः ३२ एवंभगवतीदेवीसानित्याप्यिपुनःपु
नः संभूयकुरुतेभूपजगतःपरिपालनं ३३

निर्भयाः ३० यज्ञभागाभुजःसंतः स्वाधिकारान्चक्रुरित्यन्वयः दैत्याः शेषाः दैत्याः पातालमाययुरि
त्यत्रतस्तेनान्वयः ३१ जगद्विति आययुःप्राविशन् ३२ एवमिति संभूयदृश्यशरीरात्प्रादुर्भूयअंतरधीयतेतिकर्मकर्तरिलङ् ३३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुष्पमोहकारणमुपसंहरति तयेति प्रसूयतेजनयति अर्थार्चितापफलमुद्दिश्यकृतभक्तिर्विज्ञानमात्मतत्वज्ञानंयच्छति तुष्टा फलोद्देशेनक्रियमा
णकर्मणऋद्धिंप्रयच्छति संहिताया अविवक्षितत्वान्नसंधिः ३४ व्यासमिति महतोब्रह्मादिनपिकलयति अधिकारेषुवर्तयति सामहाकालीतया
महाकालेप्रलयेमहामारीसंहारक्रियातद्रूपातयैतत्सकलंव्यासमित्यन्वयः ३५ सैवेति कालेप्रलयेमहामारीसंहारशक्तिः सृष्टिःसर्गशक्तिः भजा

तयैतन्मोह्यतेविश्वंसैवविश्वंप्रसूयते सायार्चिताचविज्ञानंतुष्टारुद्धिंप्रयच्छति ३४ व्यासंतयैतत्सकलंब्रह्मांडंमनुजेश्वर महा
काल्यामहाकालेमहामारीस्वरूपया ३५ सैवकालेमहामारीसैवसृष्टिर्भवत्यजा स्थितिंकरोतिभूतानांसैवकालेसनातनी ३६
भवकालेनृणांसैवलक्ष्मीर्वृद्धिप्रदागृहे सैवाभावेतथालक्ष्मीर्विनाशायोपजायते ३७ स्तुतासंपूजितापुष्पैर्धूपगंधादिभिस्तथा
ददातिवित्तंपुत्रांश्चमतिंधर्मेतथाशुभाम् ३८ इतिश्रीमार्कंडेयपुराणेसा०देव्याश्चरितमाहात्म्यनामद्वादशोऽध्यायः १२ छ.
ऋषिरुवाच एतत्तेकथितंभूपदेवीमाहात्म्यमुत्तमं एवंप्रभावासादेवीययेदंधार्यतेजगत् १ जन्महीना कालेस्थितिकाले सनातनी-

नाशहीना ३६ भवकालेसंपत्समयेवृद्धिप्रदेतिलक्ष्मीविशेषणं अभावेविपत्काले ३७ पुष्पैधुपदीपगंधाद्यैःसंपूजितेत्यर्थः ३८ इतिशिवमदृसुतसती०सम
शतीव्याख्यानेद्वादशोऽध्यायः १२ ऋषिरुवाच एतदिति एवमुक्तप्रकारेणधार्यतइतिसृष्टिप्रलययोरुपलक्षणं हेभूपेतिसुरथसंबोधनं १ छ.

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विद्यातत्वज्ञानंतथैवेतिसमुच्चये तयादेव्यात्वंकरथःएषवैश्यःसमाधि उत्तरार्द्धमुत्तरान्वयि तथैवान्येचैत्यर्थः विवेकिनः अधिगतलोकशास्त्राः २ मोत्यं तइति मोहोमिथ्याज्ञानंउपैहीतिवृद्धिच्छांदसी ३ आराधितेति सैवैत्यनेनसर्वत्रफलदात्रीयमेवेतिसूचितम् भोगःऐहिकः मार्कंडेयउवाच इतीति ४ प्रणिपत्येति संशितव्रतं तीव्रव्रतं निर्विण्णोदुःखाकुलः ममतेस्वीयत्वाध्यवसायः ५ जगामेति सराजावैश्यचेत्यर्थः एवमग्रेपि ६ देवीसूक्तंऋ

विद्यातथैवक्रियतेभगवद्विष्णुमायया तयात्वमेषवैश्यश्चतथैवान्येविवेकिनः २ मोत्यंतेमोहिताश्चैवमोहमेष्यंतिचापरे तामुपैहिमहाराजशरणंपरमेश्वरीं ३ आराधितासैवनृणांभोगस्वर्गापवर्गदा मार्कंडेयउवाच इतितस्यवचःश्रुत्वासुरथःसनराधिपः ४ प्रणिपत्यमहाभागंतमृषिंसंशितव्रतं निर्विण्णोतिममत्वेनराज्यापहरणेनच ५ जगामसद्यस्तपसेसचवैश्योमहामुने संदर्शनार्थमंबायानदीपुलिनमास्थितः ६ सचवैश्यस्तपस्तेपेदेवीसूक्तंपरंजपन् तौतस्मिन्पुलिनेदेव्याःकृत्वामूर्तिमहीमयीं ७

ग्वेदप्रसिद्धमित्येके यस्तुतीदेवीसूक्तंनमोदिव्याइत्यादिकंपंचमाध्यायस्थस्तुतिरूपं तत्रसर्वदेवतायाः कूटस्थायाःमहालक्ष्म्याःस्तोत्रंशंभ्वादिवधार्थनिर्दिष्टं सर्वक्लेशपरिहारैश्वर्यादिफलकंतत्कामाप्त्यांजसेभनुपदश्रुतत्वात् बुद्धिसन्निहितत्वाच्चेदमेवदेवीसूक्तंदेवीपदेनगृहीतुसुचितंलक्ष्मीतंत्रसंमतश्चायमर्थः इतिभागेवनिरूपितमित्यपरे प्राणाधः संस्थितंबीजंव्योमबीजंहुताशनः त्रिकोणबिंदुनादाढ्यंप्रणवादिनमोंतकं अंबिकासिद्धिदंह्येयंदेवीसूक्तंपरंस्मृतमितिकश्चित्पठ्यते ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अर्हणांपूजांअग्नितर्पणंहोमः पुष्पधूपौगंधदीपावुपलक्षकौ आदौयताहारौअल्पाहारौ ततौनिराहारौ अनेनहठयोगः सूचितः तन्मनस्कौदेवीमनस्कौ समाहितौत्यक्तवात्यचेष्टौ ८ तौबलिंचपशुकूष्मांडादुपहारंददतुरेवेत्यस्यराजेत्यादि राजैवनिजरुधिरसिक्तं एतेनवैश्यस्यतत्वज्ञानेच्छयासात्विकत्वेनकथंराजसपूजायांप्रवृत्तिरित्यपास्तम् राजसपूजाधिकारत्वेनततस्तस्यसात्विकफलेबाधकाभावाच्च ब्राह्मणस्यसात्विकपूजयाराजसफलवत्

अर्हणांचक्रतुस्तस्याःपुष्पधूपाग्नितर्पणैः निराहारौयताहारौतन्मनस्कौसमाहितौ ८ ददतुस्तौबलिंचैवनिजगात्रासृगुक्षितं एवंसमाराधयतोस्त्रिभिर्वर्षैर्यतात्मनोः ९ परितुष्टाजगद्धात्रीप्रत्यक्षंप्राहचंडिकां देव्युवाच यत्प्रार्थ्यतेत्वयाभूपत्वयाचकुलनंदन १० मत्तस्तत्प्राप्यतांसर्वंपरितुष्टाददामिवाम् मार्कंडेयउवाच ततोवव्रेनृपोराज्यमविभ्रंश्यन्यजन्मनि ११ अत्रापिचनिजंराज्यंहतशत्रुबलंबलात् सोपिवैश्यस्ततोज्ञानंवव्रेनिर्विण्णमानसः १२

जितात्मनोर्जितचित्तयोः ९ प्रत्यक्षमितिक्रियाविशेषणं देव्युवाच यदित्युत्तरार्द्धम् कुलनंदनेतिवैश्यसंबोधनम् ज्ञानार्थितत्वेनप्रशस्तत्वात् १० मत्तइति प्राप्यतांस्वीक्रियतां तत्प्रार्थ्यमानम् मार्कंडेयउवाच ततइत्यर्द्धम् अविभ्रंशिचिरस्थायि ११ अत्रापिचेति अत्राप्यस्मिन्जन्मन्यपि बलाद्धतशत्रुबलमितिराज्यविशेषणं ज्ञानंतत्वज्ञानंनिर्विण्णमानसः संसाराद्विरक्तमानसः १२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ममेत्यहमितिचयः संगस्तद्विच्युतिस्तन्नाशस्तत्करमितिज्ञानविशेषणम् समासोनछांदसः प्राप्तत्वंमुक्तीच्छयातिबुद्धिमत्वाच्च देव्युवाच स्वल्पै
रिति स्वराज्यमित्यसमस्तम् १३ हत्वेति तत्रराज्येतवास्खलितमस्खलनंभविष्यति उत्तरार्द्धमुत्तरान्वयि १४ सावर्णिकइतियद्वाचकंनामतदुपल
क्षितोमनुरित्यर्थः वैश्येत्याद्युत्तरान्वयि अस्मत्तइति बहुवचनंस्वस्यसार्वात्म्यद्योतकम् १५ तमिति संसिद्ध्यैमुक्तये तादर्थ्येनचतुर्थी ज्ञानंब्रह्मज्ञानं

ममेत्यहमितिप्राज्ञसंगविच्युतिकारकम् देव्युवाच स्वल्पैरहोभिर्नृपतेस्वंराज्यंप्राप्स्यतेभवान् १३ हत्वारिपूजनस्खलितंतत्
वत्तत्रभविष्यति मृतश्चभूयःसंप्राप्यजन्मदेवाद्विवस्वतः १४ सावर्णिकोमनुर्नामभवान्भुविभविष्यति वैश्यवर्यत्वयायश्चवरो
स्मत्तोभिवांछितः १५ तंप्रयच्छामिसंसिद्ध्यैतवज्ञानंभविष्यति मार्कंडेयउवाच् इतिदत्वातयोर्देवीययाभिलषितंवरं १६
बभूवांतर्हितासद्योभक्त्याताभ्यामभिष्टुता एवंदेव्यावरंलब्ध्वासुरथःक्षत्रियर्षभः सूर्याज्जन्मसमासाद्यसावर्णिर्भवितामनुः १७ इतिश्रीमार्कंडेयपुराणेसावर्णिकेमन्वंतरेदेवीमाहात्म्येसुरथवैश्ययोर्वरप्रदाननामत्रयोदशोऽध्यायः १३ ७

मार्कंडेयउवाच इतीनि १६ बभूवेति देव्याइत्यपादानेपंचमी सूर्यादिति सावर्णिर्भवितामनुरिति अस्यपुनरादिराचारात् वक्ष्यमाणकात्या
यनीतंत्राच्च अंतेमनुरित्यनेनसावर्णिरित्यारभ्यसावर्णिर्भवितामनुरित्यंतोयंमहामालामंत्राइतिसूचयतीति तदुक्तंलक्ष्मीतंत्रे सम्यक्तद्वदिस्थितेत्येवं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जन्मकर्मावलिस्तुतिः एतांहिजपत्वाज्ञात्वाऽपीयानोनरःसदा विधूयनिखिलांमायासम्यक्ज्ञानंसमश्नुते सर्वाःसंपदआप्नोति पुनोतिसकलाप्दः
इतिसर्वेष्टसिद्धिः १७ इतिकालोपनामकशिवभट्टसुतसतीगर्भजनागोजीभट्टकृतेससशतीव्याख्यानेत्रयोदशोऽध्यायः १३ ७ ७
सामविधिब्राह्मणोयथः कामयेतपुनर्नप्रत्याजायेयमित्यपुनर्भवमधिकृत्यतदनुसंधेयोस्यामंत्रऊक्तः रात्रिंप्रपद्येपुनर्भूमयोभूंकन्यांशिखंडिनींपा
शहस्तांयुवतिंकुमारिणींआदित्यश्चक्षुषेवांतः प्राणायसोमोगंधायाः स्नेहायमनोनुज्ञायपृथिव्यैशरीरमिति अस्यरात्रौजपमात्रात्सिद्धिः अस्य
फलंमरणकालज्ञानंपरमफलंतुमोक्षइति तत्रैवोक्तम् अयंचदेवीविषयोमंत्रः कन्यांकुमारींधीमहितद्वायत्र्यर्थस्यकन्यांकुमारिणींमित्यत्रप्रत्यभि-
ज्ञानात् रात्रिंतद्वूणां अस्यास्तुतुस्तमोद्वारानिशादिवसनाशिनीतिदेवीमुपक्रम्यहरिवंशोक्तेः पुनर्भूः असुरवधार्थंनानावतारग्रहात् अतएवमयोभू-
मणिनासुरवदात्री कन्यांभजातपुस्पर्शरतिरधृष्याचातिसुंदरीतिशिवोक्तेः शिखंडिनी मयूरपिच्छभूषणामयूरकलापध्वजाच भूषणैस्तुमयूराणामं-
गदाद्यैश्चभास्वरा ध्वजेनशिखिबर्हाणासुच्छ्रितेनसमावृतेतिहरिवंशोक्तेः पाशहस्ताअसुरबंधनार्थं तथायुवतिः नित्यंबाल्यवार्द्धक्यावस्थारहिता कं
समोहनावतारेक्षणंशैशवाभिनयेपितदानीमेवयौवनाविष्करणोक्तेः एवंभूतायाराज्ञ्यभिमानिदेवतायाः प्रभावादादित्यश्चक्षुषेचक्षुरक्षितुंभवसि यत्र
वानभवतीतिक्रमेणार्थः मनस्तदधिष्ठात्रीदेवताअनुज्ञाय अनुज्ञामानंरक्षितुंभवतु पृथिव्यैशरीरमित्यस्यविभक्तिपरिणामेनपृथिवीशरीरायेत्य
र्थः अथास्यससशतीत्यव्यवहारप्रयोजकससशतहोममंत्रविभागोदर्शितः कात्यायनीतंत्रेमार्कंडेयऋषिः प्रोक्तः प्रथमंश्लोकतःप्रिये व्यामा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दिवर्णसंभूतोद्वितीयःस्वरसंयुतः व्योमोहकारस्तस्यादिःसकारःद्वितीयःस्वरःआकारइत्यर्थः नृपांतंभवदेन्मंत्राः सर्वेचाष्टादशप्रिये वैश्योवाचतनः
श्लोकाव्योमाद्याःपंचमंत्रकाः व्योमाद्यश्चद्योयेषामितिमृगनयनावत्समासः नृपस्योक्तिर्मंतिवर्णोद्वादशस्वरसंयुतः मांतवर्णोयः सचद्वादशस्व-
रेणैकारेणयुक्तः आदिर्भूतइत्यर्थः सकारोबिंदुसंयुक्तश्चांतेसोमनुरीदृशौ २५ मनुर्मनूइत्यर्थः वैश्योवाचपुनर्देविस्वरैकादशआदितः
स्वरैकादशःएकारः वन्हिबीजंबिंदुयुक्तमंतेस्यात्मनुपंचकम् वन्हिबीजंरमिति २० मार्कंडेयऋषिप्रोक्तंमंत्रत्रयमुदाहृतम् नादिवर्णंचभुवनस्वर-
युग्वारुणंपरम् भुवनस्वरऔतद्युक्तंवारुणंवौइति राजोवाचेतिषण्मंत्राआदितांताः शक्रभाननेभयोवाचऋषिर्ज्ञानमस्तीत्यादिस्करेश्वरी सर्वेश्वरे-
श्वरीचांतेमंत्रावैद्वादशस्मृताः राजीवाचेतिभगवानादिरंतेविदांवरः मंत्रत्रयमिदंख्यातंततोऋषिरुवाचह नित्यैवसायदाचादौप्रभुरंतेष्टमंत्रका
ब्रह्मोवाचततश्चोक्त्वंस्वाहादिमहासुरौ अंतेपंचदशैतेस्युर्मंत्राश्चपरमेश्वरि एवंस्कंत्यादिऋष्युक्तिर्वांतमंत्राश्चसप्तवै ततोभगवदुक्ति
स्तुभवेदादिमनुद्वयम् वंचितेतिचऋष्युक्तिर्मंत्रौद्वौपरमेश्वरि ऋष्युक्तिश्चतथैत्यादिमंत्रद्वयमुदाहृतं सर्वेश्लोकास्त्विहाध्यायेषुयुक्तसमनिक्र
मात् मध्येचतुर्विंशतिकाअर्द्धमंत्राः प्रकीर्तिताः सर्वाश्चाहुतयोज्ञेयाश्चतुरुत्तरकंशतम् उवाचांतास्तत्रबोध्यामंत्राभुवनसंख्यकाः १४ इतिभ
यमचरितनिर्णयोनामविंशतिपटलम् २० ईश्वरउवाच द्वितीयेऋष्युवाचेतिनवषट्स्याहुतिःक्रमात् ततस्तृतीयेध्यायेतुऋषिरुवाचदेशिके पं
चत्रिंशच्चवैमंत्राःश्लोकाज्ञेयावरानने देव्युवाचेतिमंत्रांतेमंत्रश्लोकोमतःप्रिये ऋषिरुक्तिःपुनश्लोकाःपंचमंत्राःसनातनाः एवमाहुतयस्तत्र च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वारिंशच्चतुर्युताः चतुर्थेऋमतोदेविऋषुक्तिःषट्चविंशतिः पुनस्तथैवऋषुक्तिः श्लोकौद्वौमंत्ररूपिणौ एवंस्तुतेतिमंत्रोयमतिगुह्यंसुपावन
म् देव्युवाचेतिव्रियतांमंत्रोयंषोडशाक्षरः देवाऊचुततश्चोक्तामगवत्याकृतंवदेत् मंत्रोयंशतवर्णाख्योद्वादशोत्तरयुक्पुनः ततोऋषिरु-
वाचेतिइतिमसादितैतिवै चतुःसंख्यास्तकेश्लोकामंत्रास्तावंतएवहि श्लोकाश्चतुर्थेध्यायेतुषट्त्रिंशत्परमेश्वरि अर्द्धमंत्रद्वयेनैवचत्वारिंश
द्विधक्पुनः एवंमध्यचरित्रस्यपंचाशच्चशतोत्तरं तथापंचयुतंमंत्रामहालक्ष्म्यादिभेदतः इतिमध्यमचरित्रंमंत्रनिर्णयएकविंशतितमंपट
लम् २१ ऋषिरुवाचेतिपुराविष्णुमायांमतुष्टुवुः षण्मंत्राःश्लोकरूपास्तेदेवाऊचुस्ततःपरम् नमोदेव्यादितःश्लोकास्त्रिंशद्विनमभूतिं
भिः विष्णुमायादितोम्यांतिरूपांतेत्रीणिषष्ठियुक् अवतारेपृथग्मंत्रास्तेषांत्रिषष्टिराहुतिः चितिरूपेणमंत्रेणआहुतित्रयमुच्चरेत् एवंमंत्रा
अशीतिस्तेऋषिरुवाचइत्यथ एवंस्तवादियुक्तानांत्वयाकस्मान्नगृह्यते मंत्राःसमदशैतेतुऋषुक्तिश्चनिशाम्यवै इत्यादिम्रितयेमैंत्रैः श
ड्भेदाःप्रकीर्तिताः अथदूतउवाचेतिदेविदैत्येश्वरःपरम् इत्यादिनवमंत्राश्चपुनाऋषिरुवाचह इत्यक्तेत्यादिमंत्रेणैकेनचसरस्वति दे
व्युवाचेतिश्लोकास्तुचत्वारोमंत्रभेदतः दूतोवाचेतिपुनरप्यवलिप्तासिइत्यथ मंत्राश्चत्वारिविज्ञेयादेव्युवाचततःपरम् एवमेतद्बलीशुंभो
सचयुक्तंकरोतुयत् इतिमंत्रद्वयंश्लोकावंगमंत्राश्चतेनव एकोनत्रिंशच्चशतादधिकामनुरूपकाः इतिपंचमोऽध्यायः ५ ऋषिरुवाचेत्या
कर्ण्यश्लोकाश्चत्वारईरिताः पुनाऋषिरुवाचेतितेनाष्टसस्ततःपरम् मंत्रत्रयमिदंप्रोक्तंदेव्युवाचेतिवैतदा दैत्येश्वरेणप्रहितोएकमंत्रःम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कीर्तितः ततश्चऋषिरुवाचइत्युक्तःसोभ्यधावतः इत्यादिद्वादशश्लोकैःषष्ठेऽध्यायेमकीर्तिताः चतुर्विंशतिभेदास्तादेवताहुतयःक्रमात् इ-
तिषष्ठोऽध्यायः ६ ऋष्युक्तिराजइत्यादित्रयोविंशतिमातरः ऋषिरुवाचतावानीतोमातृभेदद्वयंक्रमात् सप्तविंशत्यवदेविभवत्याहुतयःक्र-
मात् अत्राध्यायद्वयेदेवीधूम्राक्षीतुमकीर्तिताः इतिसप्तमोऽध्यायः ७ ऋषिश्चंडेचनिहतइत्यध्यायावसानकम् त्रिषष्ट्याहुतयःप्रोक्ताए-
काअर्द्धाहुतिर्मता रक्ताक्षीदेवताअष्टौमहाशक्त्यःमकीर्तिताः इत्यष्टमोऽध्यायः ८ राजाविचित्रमित्यादिश्लोकद्वयमुदाहृतम् ऋषिम-
कारकोपहिइत्यादिश्लोकरूपतः सप्तत्रिंशच्चविज्ञेयादेवतामंत्ररूपतः एकचत्वारिंशदितिआहुतिर्नवमेशुभे देवताभैरवीतारारृणुगोप्यं
वरानने इतिनवमोऽध्यायः ९ ऋषिर्निशुंभंनिहतमित्यादिद्वयरूपकम् ततोदेवीतिमंत्रौद्वौएकैवाहंमनूत्तमौ पुनर्देव्यैकमंत्रेणव्य-
क्तमंत्राउदीरिताः ऋषिस्ततःप्रवक्ष्यतेसार्द्धद्वाविंशतित्रयम् द्वाविंशन्मनवस्तत्रएकोत्यर्धमनुर्मतः दशमेसिंहमासीनाशूलपाशविधारि-
णी सुरक्याचतुर्भुजाबाणचापहस्ताशुभेक्षणा इतिदशमोऽध्यायः १० इतिद्वाविंशतितमंपटलम् २२ ऋषिःसुमेधाविख्यातःप्रोक्तोदे-
व्याहतेशुभे चतुस्त्रिंशत्तथाश्लोकामंत्रास्तत्संख्यकाश्चते ततोदेव्येकमंत्रेणवरदाहंस्करेश्वरी देवाऊचुस्तथासर्वबाधाप्रशमनंतया
श्लोकेनैकेनदेवेशिदेव्युवाचततःपरम् वैवस्वतेंतरेप्राप्तेश्वादिश्लोकाश्चतुर्दश सार्द्धासर्वाहुतिर्देविपंचाशत्पंचसंयुता वैष्णवीदेवतात्य ५३
त्रयहागरुडवाहिनी इत्येकादशोऽध्यायः ११ देव्युवाचेततएभिःस्तवैश्चमांसदा दूरेत्यर्धेनसहिताअष्टाविंशतिरूपकाः तत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्वऋषिरुवाचइत्युक्त्वाश्लोकमादितः अर्द्धयुक्त्वभिःश्लोकैर्मंत्रास्तत्संख्यकामताः एवंतु द्वादशेध्यायेएकचत्वारिंशदाहुतिः इतिद्वादशोऽध्यायः१२
ततस्त्रयोदशेध्यायेऋषिरुवाचइत्यथ एतत्तेकथितंभूपेत्यादिसार्द्धत्रयंमनुः मनुचतुष्टयमित्यर्थःमार्कंडेयउवाचेतिइतितस्यवचोदितः श्लो
कषड्भिंतकोदेवीउवाचपरमेश्वरी यत्प्रार्थ्यतेत्वयाभूपश्लोकेनैकेततोसकृत् मार्कंडेयउवाचेतिततोवक्ष्यंमनुत्रयम् देव्युवाचपुनश्चैवस्वल्पंश्लो
कत्रयेणवै अर्घानामेवमंत्रत्वाद्धवत्यत्रषडाहुतिः षट्संख्याहुतिरित्यर्थः ततोमार्कंडेयइतिइतिदत्तातयोरिति द्वौमंत्रौपुनरुच्चार्यसावर्णिर्भ
वितामनुः एकोनविंशत्संख्याकाहुतिरत्रविधीयते एवंत्रयोदशेध्याये होमतर्पणकर्मणि शतानिसप्तसंख्यानितवप्रोक्तानिशैलजे सकारादि
नकारांतोमनुःपरमदुर्लभः ससंप्रदायविधिनाज्ञातव्योममवल्लभे अन्यथाविफलोमंत्रःसत्यंसत्यंमयोदितं तत्रहोमेस्वाहांताएतेमंत्रानमोंताः
तर्पणेतर्पयाम्यंताः इतित्रयोविंशतिमंपठ्यतम् २३ केचित्तुमंत्रंपठित्वाततस्तदध्यायेदेवतायैनमइतिपूजनइत्याहुः एवंहोमाशक्तौजयंतीमंत्रेणैव
होमउक्तोन्यत्रपूजार्चेतिदिक् कात्यायनीतंत्रोक्तमंत्रविभागएवाभियुक्तैः स्पष्टीकृत्यदर्शितस्तथाहि अष्टसप्तत्यक्षराणांश्लोकानांशतपंचकं-
प्रोक्तंसप्तशतीस्तोत्रेतत्सप्तशतसंख्यया विभज्यजुहुयान्मंत्रमितिकात्यायनीमतं मार्कंडेयउवाचैकःसावर्णोद्यास्ततःपरं २ श्लोकमंत्राःससप्तदश
सार्द्धश्लोकात्मकस्तनः एकोनविंशदेवंस्युर्वैश्योक्तिर्विंशतिस्तथा ३ पुनरर्द्धंपुनश्लोकत्रयमर्द्धंपुनर्भवेत् पंचविंशतिरेवंस्याद्राजार्षिंशतिस्ततः
४ अर्द्धश्लोकात्मकौमंत्रौमंत्रसंख्याप्रकीर्तिता ५ पुनरर्द्धंपुनश्लोकत्रयमर्द्धंपुनर्भवेत् मार्कंडेयःपुनश्चार्द्धश्लोकः श्लोकात्मकःपुनः ६ अर्धश्लो-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कात्मकोमंत्रोराजार्धश्लोकमंत्रकः मंत्राश्चत्वारिंशदेवंश्लोकमंत्रचतुष्टयं ७ पुनरर्धमृषिश्चार्द्धंश्लोकमंत्राःपुनर्दश पुनरर्धःपुनाराजाएको
नाषष्टिरुच्यते ८ पुनरर्धपुनःश्लोकापुनरर्धंपुनर्ऋषिः पुनरर्द्धंपुनःश्लोकाषण्मंत्राःपुनरर्धकम् ९ निद्रांभगवतींविष्णोरतुलांतेजसःप्रभुः
इत्येवपाठोमंत्राणांमेकससतिरुच्यते १० ब्रह्मार्धश्लोकमंत्रोथश्लोकमंत्रास्त्रयोदश अर्धश्लोकऋषिश्चार्द्धंश्लोकश्लोकास्तुपंचवै ११
पुनरर्धंतुमंत्राणांसपंचनवतिःस्मृता भगवानर्द्धमंत्रेद्वेऋषिश्लोकार्धकंपुनः १२ श्लोकःपुनर्ऋषिश्लोकद्वयमंत्रद्वयंभवेत् श्लोकानामष्ट
ससत्याचतुर्षिरधिकंशतम् १३ अध्यायादावेवऋषिरुवाचेतिसकृन्मनुः अष्टषष्टिमिताःश्लोकास्तावंतोमनवःस्मृताः १४ एकोनससतिःसर्वे
ध्यायेमंत्राद्वितीयके आदावृषिरुवाचैकःपंचविंशत्ततःपरम् १५ निहन्यमानाद्याश्लोकासुरवरागाकुलाक्षरम् इत्यंतादेव्युवाचैकोगर्जगर्जे
तिचापरः १६ श्लोकाऋषिरुवाचेतिपुनश्चश्लोकपंचकम् चतुश्चत्वारिंशदेवंसर्वेमंत्रास्तृतीयके १७ आदौऋषिरुवाचेतिशक्राद्याःश्लोकमं-
त्रकाः षड्विंशास्तुऋषिश्लोकद्वयंदेवीततःपरम् १८ ध्रियतांध्रिदशाःसर्वेयदस्मत्तोभियांछितं इत्यर्द्धश्लोकमंत्रोथदेवाऊचुःस्ततःपरं १९
भगवत्याकृतंसर्वमित्यर्द्धश्लोकमंत्रकः यदयंनिहताद्यंचश्लोकमंत्रत्रयंभवेत् २० ऋषिश्लोकास्तुचत्वारोमनवः परिकीर्तिताः षट्त्रिंश-
च्छ्लोकेध्यायेचत्वारिंशद्द्व्याधिकम् २१ षट्ससतिश्लोकयुक्तेध्यायेमंत्रास्तुपंचमे एकोनत्रिंशदधिकंस्मृतंकात्यायनीमतम् २२ एको-
ऋषिरुवाचेतिपुराशंभादयश्चषट् श्लोकमंत्रास्ततोदेवाऊचुश्चैवाष्टमोमनुः २३ नमोदेव्यादिकाःश्लोकाःपंचमंत्राःप्रकीर्तिताः त्रयोदशैवं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection.

मंत्रास्तुयादेवीत्यादयोपिच २४ एकविंशतिकाः श्लोकाः त्रांत्यंतास्तेषुमंत्रकाः प्रतिश्लोकंत्रयोमंत्राज्ञेयाः सर्वेत्रिषष्टिकाः २५ पुनः श्लोकात्मकोमंत्रस्त्रिमंत्रःश्लोककःपुनः त्रयोविंशच्छ्लोककेषु मंत्रावैसप्तषष्टिकाः २६ यादेवीसर्वभूतेषु विष्णुमायेतिशब्दिता नमस्तस्यैइतिमोक्तोविंशत्यक्षरकोमनुः २७ नमस्तस्यैइतिमोक्तोद्वितीयश्चनुरक्षरः अष्टाक्षरस्तृतीयोपिनमस्तस्यैनमोनमः २८ एवंह्याविंशतिश्लोकैस्तेयंतन्त्रत्वयंबुधैः पूर्वैस्त्रयोदशैर्मंत्रैः सहाशीतिरुदाहृता २९ स्तुतासुरेतिचश्लोकद्वयंचैवपुनर्ऋषिः पुनःसप्तदशश्लोकाऋषिःश्लोकत्रयंततः ३० दूतश्चैवनवश्लोकाऋषिरेकोंबिकाततः एकइत्यस्यैकश्लोकइत्यर्थः चतुश्लोकीपुनर्दूतश्चतुश्लोकीपुनःशिवा ३१ श्लोकद्वयंमिलित्वातुचत्वारिंशन्मंत्रबाधिकं अशीत्यापिचसंयोगंएकोनविंशताधिकं ३२ शतमेवंतुविज्ञेयमाहुतीनांचपंचमे विंशतिश्लोकसंयुक्तेषष्ठेऽध्यायेप्रकीर्तिताः ३३ सर्वेश्लोकामंत्ररूपादैव्येकोयऋषिस्त्रयं चतुर्विंशतिमंत्राणामित्येवंपरिकीर्तिताः ३४ पंचविंशतिश्लोकयुक्तेध्यायेमंत्रास्तुसप्तमे सर्वेमंत्राःश्लोकरूपाऋष्युवाचद्वयंततः ३५ सप्तविंशतिरेवंतुमंत्रसंख्याप्रकीर्तिता सार्द्धैकषष्टिश्लोकाद्यैऽष्टमेध्यायेप्रकीर्तिताः ३६ एकषष्टिश्लोकमंत्राअंतेर्धश्लोकमंत्रकः आदावेकोऋषिश्चैवत्रिषष्टिर्मंत्रसंततिः ३७ एकोनचत्वारिंशद्भिः श्लोकैर्युक्तैसमीरिताः अध्यायेनवमेमंत्रास्तावंतोयमनुद्वयं ३८ राजाऋषिश्चेतिचैकचत्वारिंशन्मनुस्त्वयम् सार्द्धसप्तान्वितैर्विंशच्छ्लोकैस्तुदशमेचिते ३९ सप्तविंशतिमंत्रास्तुश्लोकरूपास्ततोंतिमः अर्धश्लोकात्मकोमंत्रोऋष्युवाचद्वयंतथा ४० देव्युवाचद्वयंचैवह्याविंशन्मंत्रसंग्रहः श्लोकानांसार्धपंचाशज्ज्ञेयमेकादशेस्फुटं ४१ पंचाशच्छ्लोक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मंत्रास्तु अंतेर्द्धश्लोकमंत्रकः शाकंभरीतिविख्यातिंतदायास्याम्यहंभुवि ४२ एषोर्द्धमंत्र इत्याहुः केचिदत्रविचक्षणाः देवीद्वयमृषिश्चैकोदेवाएकमि
तीरितं ४३ पंचाधिकांस्तुपंचाशन्मंत्राज्ञेयाःपरिस्फुटं अष्टविंशच्छ्लोकयुक्तेप्यध्यायेद्वादशात्मके ४४ चत्वारिंशच्चएकश्चमंत्रास्तत्राहुतिद्वयं अ
र्द्धश्लोकात्मकंश्लोकाःससत्रिंशन्मिताऋषिः ४५ देव्युवाचेतिचैकैकमेवंसंख्यास्फुटोदिता त्रयोदशेसार्धसप्तदशश्लोकाःप्रकीर्तिताः ४६ ऋषिरु
वाचेत्यारभ्यभोगस्वर्गापवर्गदाः इत्यंतापंचमंत्रास्तेमार्कंडेयस्ततःपरं ४७ इतितस्यवचःश्रुत्वेत्यर्द्धमंत्रस्तथास्मृतः श्लोकमंत्रास्ततोज्ञेयाःपंचैवा
प्यर्द्धपद्यकं ४८ देव्युवाचेतिमंत्रोयंततःश्लोकस्तुमंत्रकः मार्कंडेयस्ततोमंत्रःश्लोकौमंत्रद्वयंततः ४९ ततोदेवीषडर्धानिसप्तमंत्राःप्रकीर्तिताः
मार्कंडेयस्ततोमंत्रद्वयंमंत्रत्रयंस्मृतं ५० आवृत्यात्यधिकोमंत्रःसावर्णिर्भवितामनुः एकोनत्रिंशत्संख्याकामंत्राअत्रस्मृताबुधैः ५१ केचित्तुए-
कादशार्द्धाहुतयोद्वादशश्लोकमंत्रकाः उवाचवचनैःषड्भिर्मंत्रास्तेउक्तसंख्यकाइत्याहुः ५२ तत्रकात्यायनीतंत्रविरोधः स्पष्टएवेतिदिक् अथवारा
हीतंत्रे चंडीपाठफलंदेविशृणुष्वगदतोमम एकावृत्यादिपाठानांप्रत्यहंपठतांनृणां १ संकल्पपूर्वंसंपूज्यन्यस्यांगेषुमनून्सकृत् पश्चाद्बलिप्र
दानेनफलमाप्नोतिमानवः २ न्यासप्रकारश्चनवार्णविधानेनवक्ष्यते उपसर्गोपशांत्यर्थंत्रिरावृत्तंपठेन्नरः ग्रहदोषोपशांत्यर्थंपंचावृत्तंवरानने ३
महाभयेसमुत्पन्नेसप्तावृत्तमुदिरयेत् नवावृत्याभवेच्छांतिर्वाजपेयफलंलभेत् ४ मुच्येत्प्राणार्तिजाद्भयादितिवा ४ राजवश्यायभूत्यैचरुद्रा
वृतमुदीरयेत् अर्कावृत्याकामसिद्धिर्वैरिनाशश्चजायते ५ मन्वावृत्यारिपुर्वश्यस्तथास्त्रीवश्यतामियात् सौख्यंपंचदशावृत्त्याश्रियमाप्नोतिमा-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नवः ६ कलावृत्त्यापुत्रपौत्रधनधान्यगमंविदुः राजभीतिविनाशार्थंवैरस्योच्चाटनायच ७ कुर्यात्सप्तदशावृत्तंतथाष्टादशकंप्रिये महाऋणविमोक्षायविंशावृत्तंपठेन्नरः ८ पंचविंशावर्तनाच्चभवेद्बंधविमोक्षणं संकटेसमनुप्राप्तेदुश्चिकित्सभयेसदा ९ जातिध्वंसेकुलोच्छेदे आयुषोनाशआगते वैरिवृद्धौव्याधिवृद्धौधननाशेतथाक्षये १० तथैवत्रिविधोत्पातेतथाचैवातिपातके कुर्याद्यत्नाच्छतंवृत्तंततःसंपद्यतेशुभं ११ विपदस्तस्यनश्यंतितितोयातिपरांगतिं श्रियोवृद्धिःशतावृत्त्याराजवृद्धिस्तथापरा १२ मनसाचिंतितंदेविसिध्येदष्टोत्तराच्छतात् शतात्स मेधयज्ञानांफलमाप्नोतिसुव्रते १३ सहस्रावर्तनाल्लक्ष्मीरावृणोतिस्वयंस्थिरा नासोमनोरथान्कामान्नरोमोक्षमवाप्नुयात् १४ यथाश्वमेधःक्रतुषुदेवानांचयथाहरिः स्तवानामपिसर्वेषांतथासप्तशतीस्तवः १५ उत्पत्तिचरितस्तोत्रंरूपस्यत्रितयात्मिका अथवाबहुनोक्तेनकिमन्येनवरानने १६ चंडांशातावृत्तिपाठात्सर्वाःसिद्ध्यंतिसिद्धयः एताश्चैवकामनासुतत्तत्संख्याकस्तोत्रपाठेविशेषउक्तोमरीचिकल्पे १७ रात्रिसूक्तंजपेदादौमध्येसप्तशतीस्तवम् १७ प्रांतेतुजपनीयंवैदेवीसूक्तमितिक्रमः एवंसंपूरितंस्तोत्रंपूर्वोक्तफलदायकं १८ अत्ररात्रिसूक्तंदेविसूक्तंचवैदिकेइतिकेचित् रात्रिसूक्तंप्रथमाध्यायस्थं विश्वेश्वरीसूक्तंदेवीसूक्तंनमोदेव्याइत्यादिपंचमाध्यायस्थमित्यपरे अन्योपिप्रकारस्तंत्रोक्तः कृष्णाष्टमीसमारभ्ययावत्कृष्णचतुर्दशी वृद्ध्यैकोत्तरयाजाप्यंपूर्वसंपूरितंतुतत् एवंदेविमयाप्रोक्तःपौरश्चरणिकःक्रमः तदंतेहवनंकुर्यात्प्रतिश्लोकेनपायसं प्रतिश्लोकेनेतिकात्यायनीतंत्रोक्तमंत्रोपलक्षणम् रात्रिसूक्तंभणिक्वचंतथादेव्याश्चसूक्तकमितिपक्षांतरे ऋचमित्यक्तमंत्रोपलक्षणं हुत्वांतेप्रजपेत्स्तोत्रमादौपूजादिकंमनुरित्यपरश्च अथातःसंप्रवक्ष्यामिनवरात्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विधानकं जपेदेकोत्तरांवृद्धिंदिनानिनवसंख्यया नवाक्षरीविधानेनसंपूज्याथविचक्षणः सहस्रंप्रजपेन्मंत्रंप्रत्येकंचयथाविधि मध्येचैकोत्तरांवृद्धिंजपेद्दे-
व्याःस्तवंमम हुत्वादशांशतोहोमंतत्रसिद्धिंसमाप्नुयात् अपरश्चजपेद्बिल्वंसमाश्रित्यमासमेकंतुयोनरः हुत्वाबिल्वदलैर्मांसंमधुरत्रययोगतः हुत्वादशां
शतोवापिकमलैःक्षीरसंयुतैः धनदेनसमांलक्ष्मींप्राप्नुयादुत्तमांध्रुवं हरगौरीतंत्रे श्रीकामःपुष्टिकामोवासृष्टिमार्गक्रमेणतु जपेच्छक्रादिमारभ्यशुं
भदैत्ययथावधी आदिमारभ्यप्रजपेत्पश्चाच्छेषंसमाचरेत् शांत्यादिकामःसर्वत्रस्थितिमार्गक्रमेणतु सावर्णिःसूर्यतनयःसावर्णिर्भवितामनुः संक-
टेचांत्यमारभ्यपश्चादादिंसमापयेत् ब्राह्मणद्वाराकरणेतुदक्षिणाविशेषउक्तस्तत्रैव पंचस्वर्णाःशतावृत्तेलक्षावृत्तेतुतत्त्रयं पंचावृत्तेस्वर्णमेकंत्रिरावृ
त्तेनदर्धकम् एकावृत्तेपादमेकंदद्याद्वाशक्तितोबुधइति प्रथमचरित्रस्यब्रह्माऋषिः गायत्रीच्छंदः महाकालीदेवता नंदाशक्तिः रक्तदंतिकाबीजं अ-
ग्निस्तत्वंमहाकालीदेवता नंदाशक्तिः रक्तदंतिकाबिजं अग्निस्तत्वं महाकालीप्रीत्यर्थंजपेविनियोगः मध्यमचरित्रस्यविष्णुर्ऋषिः उष्णिकछंदः महा-
लक्ष्मीर्देवता शाकंभरीशक्तिः दुर्गाबीजं वायुस्तत्वं महालक्ष्मीप्रीत्यर्थंजपेविनियोगः अंत्यचरित्रस्यशंकरऋषिः अनुष्टुप्छंदः महासरस्वतीदेवताभी
माशक्तिः भ्रामरीबीजं रविस्तत्वं सरस्वतीप्रीत्यर्थंजपेविनियोगः शतावृत्तादौकामनाभेदेनहोमभेदउक्तः वाराहीतंत्रे हुनेत्प्रदीपितेवन्हौतिलधानादि
तंडुलान् धर्मार्थकामसंवृद्धौमोक्षार्थीपायसंहुनेत् मारणेमोहनेचैवतथोच्चाटनकर्मणि हुनेन्मासंत्रिमध्वक्तंमोहनेमधुपायसं स्तंभनेमातुलफलंवश्ये
तुसितसर्षपान् धर्मार्थकाममोक्षार्थेपूर्वाशाभिमुखोहुनेत् मोहनेमारणेचैवहुनेद्वैदक्षिणामुखः उच्चाटनेउत्तरास्यइत्याहभगवान्भवः क्रोडतंत्रेप्रत्येकावर्तनं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देविहयमेधेनसंमितम् त्रिरावृत्त्यालभेत्कामान्पंचावृत्यारिपून्जयेत् इतिसर्वेष्टसिद्धिः कात्यायनींविद्महे कन्यांकुमारींधीमहि तन्नोदुर्गाप्रचोदयात्
इत्येतद्गायत्रीयजुर्वेदे अथगायत्रीप्रयोगांतरंकात्यायनीतंत्रे पूर्वाण्हेशोडशांगुलमितंचतुरोन्नतंस्थंडिलंकृत्वा तत्रशुद्धेगोघृतेनैकस्मिन्पात्रेरुद्रवर्ति
षुत्रयोदशदीपान्प्रज्वाल्यतेषुप्रथमदीपेप्रथमाध्यायदेवतामावाह्य आसनपाद्यादिगंधदानांतांपूजांकृत्वापुष्पसमर्पणसमयेवक्ष्यमाणैर्नवभिःश्लोकैःप्रति
श्लोकंपुष्पाणिसमर्पयेत् ततःप्रथमाध्यायसमाप्तौवक्ष्यमाणश्लोकैःपुष्पाणिसमर्प्यधूपदीपौदत्वापायसनैवेद्यंदत्वातांबूलंदक्षिणांचदत्वानीराज्यएकंब्रा-
ह्मणंकुमारींसुवासिनींचभोजयेत् संकल्पयेद्वा एवंतत्तदध्यायदेवतावावाहनादिब्राह्मणभोजनांतंप्रत्यध्यायंकुर्यात् अंतेप्रभूतनैवेद्यादिभिर्महापूजा
अनुग्रहेपूर्वाण्हेसमाप्तिः निग्रहेपराण्हेश्लोकास्तुविश्वेश्वरींजगद्धा० १ स्तुतासुरैःपूर्वमभीष्टसंश्रया० करोतुसानःशुभहेतुरीश्वरी० २ यासांप्रतंचोद्धतदै
त्यतापितै० ३ याचस्मृतातत्क्षणमेवहंतिनःकरोतुसानःशुभहेतु० ४ सर्वबाधाप्रशमनं० ५ अत्रवैरिविनाशनमित्यत्ररोगविनाशनमित्याद्यूहः एवं
दैत्यतापितैरित्यत्रापि सर्वमंगलमांगल्ये० ६ सृष्टिस्थितिविनाशानां० ७ शरणागतदीनार्त० ८ सर्वस्वरूपेसर्वेशे० ९ एतेनुग्रहेनवश्लोकाःवश्येतुवि
शेषः ॐ ह्रीं रक्तचांमुंडेतूर्णममुकंमेवशमानयस्वाया अनेनप्रत्यध्यायमाद्यंतयोःपूजाःसर्वांतेअयुतमंत्रश्चदशसाहस्रं होमयेत्कटुतैलेनरक्तचंद
नराजिकाः सहस्राहुतिमात्रेणराजानंवशमानयेत् मधुनाचाशोकपुष्पंरात्रौहुत्वातुपूर्ववत् चक्रवर्तीभवेद्वश्यश्चंडीमंत्रप्रभावतः अंतेशतंब्राह्म
णाःकुमार्यश्चभोजनीयाः धर्मार्थंबिल्वपत्रैःपूजावश्यार्थंकरवीरैर्जपाकुसुमैर्वा पुत्रार्थंतुलसीदलं पुष्ट्यर्थंपंकजैः महाप्रयोगेतुषोडशमाषैः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वर्णमूर्तिंकृत्वाकलशस्थापनंकृत्वातद्भेयदेर्गलयंत्रेषादीपंस्थापयेत् यंत्रमंत्यंसर्वसाधारणंस्थापनंमहतिकार्येऽनपंचाशद्दिनानिमध्येचतुर्विंश-
तिः तदर्द्धमल्पेब्राह्मणास्त्रयोमहत्कार्येप्रयोगकर्तारः अल्पेएकः निग्रहेतुसर्वबाधाप्रशमनमित्यस्याग्रेएवमुत्कासमुत्पत्येतिपठेत् अत्रप्रयोगेक्व
चित्तर्पणमप्युक्तम् त्रयोदशपात्राणिदुग्धेनापूर्याद्यंतयोः पुष्पांजलिंदत्वाप्रतिश्लोकंप्रथमाध्यायदेवतांतर्पयामीतिप्रयोगेणतर्पयेत् ततस्त्रयो
दशस्वग्निषुक्रमोक्तत्तदध्यायदेवताआवाह्यसंपूज्यप्रतिश्लोकमोंप्रथमाध्यायदेवतायैनमः स्वाहेतिमंत्रेणपायसेनजुहुयात् प्रत्यहंयावत्प्रयोगसमा
सिः त्रयोदशब्राह्मणाःस्ववासिन्यःकुमार्यः एकोनुपनीतोअष्टवर्षएकउपनीतश्चभोजनीयाः परार्थेप्रयोगेतुसत्याः संतुयजमानस्यकामाइति
प्रतिश्लोकंप्रत्यध्यायंवापठेत् इदंसर्वत्रपरार्थेप्रयोगेतुबोध्यं अत्रत्रयोदशपात्रेषुत्रयोदशदीपाइत्युत्तमःपक्षः एकपात्रेत्रयोदशदीपाइतिमध्यमः
एकस्मिन्नेवपात्रेत्रयोदशदीपाइतिचैवताचेत्यधमःपक्षः यथोक्तविधिदीपेषु अक्षतपुंजेषुजलपात्रेषु अग्निषुकुमारीषुवाकार्यइत्यपवेशः अथप्र
योगांतराणिकात्यायनीतंत्रोक्तानि प्रतिश्लोकमाद्यंतयोः मंत्रंजपेन्मंत्रसिद्धिः सप्रणवमनुलोमव्याहृतित्रयमादौअंतेतुविलोमंतदित्येवंप्रतिश्लोकं
कृत्वाशतावृत्तपाठेनशीघ्रसिद्धिः प्रतिश्लोकमादौजातवेदसइतिऋचंपठेत् अपमृत्युनिवारणायादावंतेशतंत्र्यंबकमंत्रंजपेत् प्रतिश्लोकंतन्मंत्रंजपइ
तिवा प्रतिश्लोकंशरणागतदीनार्तश्लोकंपठेत्सर्वकार्यसिद्धिः प्रतिश्लोकंकरोतुसानःशंभित्यर्द्धंपठेत्सर्वकामासिद्धिः स्वाभीष्टवरप्राप्तौएवंदेव्यावरंलब्ध्वे
तिश्लोकंप्रतिश्लोकंपठेत् सर्वापन्निवारणार्थेप्रतिश्लोकंदुर्गेतिपठेत् अस्यकेवलस्यापिश्लोकस्यकार्यानुसारेणलक्षमयुतंसहस्रंशतंवाजपः सर्वत्रेत्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यलक्षजपेश्लोकोक्तंफलं इत्थंयदायदेतिश्लोकस्यजपेमहामारीशांतिः ततोवव्रेनृपोराज्यमितिमंत्रस्यलक्षजपेपुनाराज्यलाभः हिन
स्तिदैत्यतेजांसीत्यनेनसदीपबलिदानेघंटाबंधनेचबालग्रहशांतिः आद्यावृत्तिमनुलोमेनत्रयोदशाध्यायंपठित्वाततोविपरीतक्रमेणद्विती
यांकृत्वापुनरनुलोमेनेत्येवमावृत्तित्रयेउक्तेषुप्रकारेषुशीघ्रंकार्यसिद्धिः सर्वापत्तिनिवारणायदुर्गेस्मृतेत्यंतेर्द्धं ततोयदंतियच्चदुरकेइत्यृचंतदंते
दारिद्र्यदुःखेत्यर्द्धमेवंकार्यानुसारेणलक्षमयुतंसहस्रंशतंवाजपः कांसोस्मीत्यृचंप्रतिश्लोकंपठेल्लक्ष्मीप्राप्तिः मारणार्थमेवमुक्त्वासमुत्पत्येति
श्लोकंप्रतिश्लोकंपठेत्मारणोक्तावृत्तिभिःफलसिद्धिः ज्ञानिनामपिचेतांसीतिश्लोकस्तस्यजपमात्रेणसद्योमोहनमित्यनुभवसिद्धं प्रतिश्लोकंत
च्छ्लोकपाठेत्ववश्यं रोगानशेषानितिश्लोकस्यप्रतिश्लोकंपाठेपृथग्जपेवापिसकलरोगनाशः तन्मात्रपाठेपिसः इत्युक्त्वासाभगवतीगंभीरेतिश्लोक
स्यप्रतिश्लोकंपाठेपृथग्जपेवाविद्याप्राप्तिः भगवत्याकृतंसर्वमित्यादिद्वादशोत्तरशताक्षरोमंत्रःसर्वकामदः सर्वापन्निवारणश्चदेविप्रपन्नार्तिहरइति
श्लोकस्ययथाकार्यंलक्षायुतसहस्रशतान्यतमेप्रतिश्लोकंपाठेसर्वापन्निवृत्तिः सर्वकामाप्तिश्चएषुप्रयोगेषुप्रतिश्लोकंदीपाग्रेकेवलमेववानमस्कारकर
णेशीघ्रंसिद्धिः प्रतिश्लोकंकामबीजसंपुटितस्यैकचत्वारिंशद्दिनेषुत्रिरावृत्तौसर्वकार्यसिद्धिः एकविंशतिपर्यंतमुक्तरीत्याप्रत्यहंत्रयोदशावृत्तौवशीकर
णंमायाबीजसंपुटितस्यफट्बीजस्यपल्लवसहितस्यसप्तदिनपर्यंतंत्रयोदशावृत्तौउच्चाटनेसिद्धिः तादृशस्यैवदिनचतुष्टयमेकादशावृत्तौसर्वोपद्रवनाशः
एकोनपंचाशद्दिनपर्यंतंप्रतिश्लोकंबीजसंपुटितस्यपंचदशावृत्तौलक्ष्मीप्राप्तिः प्रतिश्लोकमैंबीजसंपुटितस्यशतावृत्त्याविद्याप्राप्तिः ॐ ऐंनम इत्येतत्सें

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुठितः प्रथमचरित्रस्य प्रतिश्लोकं पाठआदावंतेक्रमेणश्लोकांतेविपरीतक्रमेणेत्यर्थः एवमग्रेपि ह्रींनमइत्येतत्संपुटितोमध्यमचरित्रस्यश्लोकंप्रति
वापाठः ॐ क्लींनमइत्येतत्संपुटितोंत्यचरित्रस्यपाठेशीघ्रंकार्यसिद्धिः तत्रप्रथमचरितेह्रींबीजेनषडंगन्यासः त्रिगुणातामसीत्यादिषड्भिः रहस्यो-
क्तंध्यानं तत्रप्रथमचरित्रस्यमार्कंडेयऋषिः अनुष्टुप्छंदः महाकालीदेवतानंदाशक्तिः ऐंबीजंअग्निस्तत्वंइष्टसिद्धि० मध्यमचरित्रस्यरुमेधाऋषिः अ
नुष्टुप्छंदः महालक्ष्मीर्देवताशाकंभरीशक्तिः ह्रींबीजंवायुस्तत्वंइष्टसिद्ध्यर्थे० ह्रींबीजेनषडंगंसर्वदेवशरीरेइत्यादिसप्तभिः रहस्योक्तंध्यानं उत्तमचरि
त्रस्यशिवऋषिः अनुष्टुप्जगती महासरस्वतीदेवताभीमाशक्तिः क्लींबीजंसूर्यस्तत्वंकाम्यसि० क्लीमितिषडंग गौरीदेहात्समुद्भूताइत्यादिरहस्योक्तंध्या
नं ऐमितिबीजमाद्यचरितस्येत्यत्र ह्रीमितिआद्येश्रीमितिमध्यमेक्लीमित्यंतेएतान्येवक्रमेणततद्देवतापूजनेइत्यन्यत्र ऐमित्यंतेइत्यन्यत्र अत्रसर्वकाम
नाभेदेनध्यानभेदउक्तः वैश्येरक्ततरंध्यानं षौष्टिकेकबुरंउच्चाटनेधूम्रंमारणेकृष्णं संतानेच्छायांनीलोत्पलदलश्यामंरक्ताकारंध्यानं सर्वकामदंशुद्धेक
ल्पांतामिसमतयाध्यानंजलभयेऽपिमहिषयुक्तंध्यानंविषादिभयेपीयूषवृष्टियुतपूर्णचंद्रसदृशं० एकादिनेसंपूर्णं पाठाशक्तौपाठेयंविभ्रकारकः
एवंक्रमेणसप्तभिर्दिनैरेकावृत्तिः एकैकंचरित्रमेकस्मिन्दिनेइतिनिधिपतिर्वदंतिकेचित्ताः एतेषामूलानिकात्यायनीतंत्रेद्रष्टव्यानितत्रांतरे अस्यसप्तशतीमा
लामंत्रस्यनारायणऋषिर्गायत्रिछंदः शुंभमर्दिनीरूपादक्षिणामूर्तिर्देवताक्लींबीजंसोहंशक्तिः दुर्गाप्रीत्यर्थेजपेविनियो० ॐ यन्मा होज्ञानिनोरपिअंगु०
निद्रांभगवतींविष्णोरतुलांतेजसःप्रभुं० वराहीमुपजेदेवींवाराहीं शिवरूपिणीं० ॐ जयंतीमंगलाकालीभद्रकालीकपालिनी० दुर्गाक्षमाशिवाधात्री
स्वाहा ॐ जयेतिदेवाश्चमुदामध्यमाभ्यांवषट् ॐ आजघानभूजंसव्येअनामिकाभ्यांहुं ॐ हतेतस्मिन्महावीर्येकनिष्ठि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=11.12.19 16:24
,TRANSFERRED=2019/12/11 at 16:40:39
,PAGES=119
,TYPE=STD
,NAME=S0002329
,Book Name=M-2045-SHAPTSHATI
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE118=00000118.TIF
,FILE119=00000119.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection